This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰स॰ १ श्रीगणेशाय नमः ॥ श्रीधन्वंतरये नमः ॥ प्रणतविबुधमौलिस्फाररत्नांशुगर्भस्वरणनखरभासो भांति यो भक्तिभा-
जां ॥ दधदभिमतसिद्ध्यै कल्पवल्ल्या श्रियाश्रीः स जयति गजवक्त्रो दाननीरप्रशक्तः ॥१॥ स्फुरज्जनो हन्तमस्तिरस्तु नर
विविश्वांबुधेः सर्वदापारे तिष्ठति संस्पृशंति न जगद्वीजो भदोषामर्मय ॥ साक्षात्पश्यति यस्य विश्वमखिलं तत्वार्थवि
चांके विसंशुद्धं प्रणतारिव्याधिशमनं सर्वज्ञमीशं परं ॥२॥ नमोस्तु धन्वंतरये समस्तजरापराशांकविनाशनाय ॥ द्वि
जांगनासंततयौवनश्रीसंपत्तिदाय्यामृतसाधनाय ॥३॥ यस्मिन्नुदंचद्युतिरत्नवस्तूसौधेषु कांतावदनेः सम
त्वं ॥ व्रजस्य धः प्राप्नुमिवाकलंकः पृष्टः प्रकाशी सकलोपि चंद्रः ॥४॥ तस्मिन्पुरे श्रीपथमान्निवंचतद्यशोविधुः २
सद्गुणरत्नसिंधुः ॥ आस्ते स केशोमहमंदखानः श्रेतेयं प्रतिक्षिमपराभिधानः ॥५॥ युग्मं ॥ हर्म्येषु शृंगेषु समी
क्ष्य चित्रद्विपान्समाकुंचितनिश्चलांगाः ॥ पराक्रमभ्रांतियराधुंदे रिपुरेषु सिंहा अपि चित्ररूपाः ॥६॥ नमन्न
महाभद्रजमौलिमालास्खलत्सरागारुणपादपद्मे ॥ तस्मिन्क्षितौ राज्यपदं दधाने गृंथः कृतः श्रीमहमंदखा
ने ॥७॥ आस्ते पुरी सर्वजगत्प्रसिद्धा निवासलोला दिव्यत्नविस्मुः ॥ जन्मादंदे सर्वसतो विहाय यत्रैः ओकं वधाम

Acc. No. ~~8462~~ M. 1778
Title - लक्ष्मणोत्सव ग्रंथ
Author - लक्ष्मण माथुर
Date - शके 1784 / संवत् 1918 / A.D. 1861
Subject - Medicine.
folio - 189.
Xerox. - 379.

(A)
(A)

K K S U LIBRARY RAMTEK 441 106 M-1778 Dist. Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थुरेति नाम्ना ॥८॥ तस्यामभूत्सकलकायन्वयाभिरामः कायस्थवंशसरसीरुहकाननार्कः ॥ कामाधिकोजम
धनार्चितमार्गणौघो भास्वत्कुलोद्धमहिमोदयनागनामा ॥९॥ तस्यात्मजो जोडुलनामधेय आसीत्सदा सज्जनने
त्रपेयः ॥ पुन्यात्मधुर्ये प्रथमाभिधेयः ॥१०॥ तत्पुत्रः सहदेव इत्यनुगतः क्ष्मादेवदेवो भवन्नित्ज्ञाने सहदेव ए
व किमसौ सद्धर्मबंधुः सदा ॥ लोकालोकविलोकने परिपटुः कीर्त्तिर्यदीया शिखक्षोणीमंडलमंडने मलयजाले
पानुकारी भवत् ॥११॥ तत्सूनुः सहदेवसूनुरभवत्तद्दामोदरः पादपंकजरजस्संततद्विरेफः सदा ॥ गांभीर्येण सरि
त्पतिं वितरणैः कल्पद्रुमं धैर्यतो मेरुं देवगुरुं धिया च जितवान्यस्सेश्वरः संपदा ॥१२॥ तस्मात्समुद्रादिव धर्म
देवचंद्रीयथाभवत्कलानिधिप्रसवः ॥ सौंदर्यसंतर्जितकामदेवः सदा हृदिस्थापितवामदेवः ॥१३॥ जातोमोध
मदेवात्सकलगुणनिधिर्धर्मदेवादिदिगाभूत्स्वार्थीग्रः पार्थिवाग्र्यादरविविधमहारत्नसन्मानपात्रं ॥ सोऽसत्र
भूमिदेशार्पितविविधवसुधर्मरक्षःसमूलं ॥ चक्रे सकल्पनाभेदिविप्रकुलवरः स्वेतलक्ष्मीसितश्रीः ॥१४॥ वरे
पालस्तनयोश्च सद्गुणगणेन्द्रयशोमंडलो जातो सोढदिविरोत्तमः कविवरः सांप्रतेकलनस्य प्रभः ॥ आपासो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु॰ स॰
२

खिलसंपरामधिपदं धर्मश्रियामाश्रयः साधूनामवधिः समस्तसुहृदामास्थानकं सद्धियां ॥१५॥ तस्याभ
वद्गजपतिर्हिजराजकीर्तिः पुत्रो परस्थिर पृथास्थिरराजनामा ॥ तस्मत्कडूम्बरराजः सुरविप्रदोसो लोकत्रयोद्धत
सुरलविभास्त्रयस्ते ॥१६॥ कीर्तिर्भातिजत्रयेगजपते विंदुमुदाधारिणी शत्रुग्लानिविधायिनी गुणगणस्वच्छा
स्तुसद्मानिहिनी ॥ श्री तांशोपरिभाविनी श्रुचिनयः भूयो जगत्पावनि साधुस्वांतनिवासिनी सुरपते राश्चर्यसंदायि
नी ॥१७॥ आसंस्त्रयोगजपतेः पृथिता पृथिव्यां पुत्राः पवित्रचरिताः खलु कामराजः ॥ ख्यातस्ततो प्यमर
सिंह इति प्रसिद्धस्तस्यानुजो विदितजाल्पनामधेयः ॥१८॥ पुत्राः पवित्रचरिता स्थिरराजनाम्नो जातास्त्रयो
प्यमितविक्रमविक्रमश्रीः ॥ ज्येष्ठोपरः पृथुगणैकनिधिः पृथुश्रीः कीर्तनुजो धनदजिद्धनराजनामा ॥१९॥
पद्मापतिपदांभोजभ्रमरीभूतमानसः ॥ श्रीमानभ्रमरराजो भूदासैककस्यात्मसंभवः ॥२०॥ ज्येष्ठः सुतो गग
जपतेरपि कामराजो लोकामराजनश्रगो द्विजकामधाम ॥ यस्य द्गुणार्जितयशः शशिमंडलेन आकाशय
नूसुकविकेरवकाननानि ॥२१॥ कामराजसुतो यातो ख्यातो कीर्त्या यथासुरो ॥ अभृद् दूरणो स्यायां महानं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रोनुजस्तयोः॥२२॥ प्रासोदयो गजपतिप्रवरोदयाद्रेः स्फूर्जत्प्रभावमहिमामरसिंहभानुः॥ उत्सादयन्नपिस
मस्ततमः प्रवृत्तिं चित्रं न जातु जनतापमयं तनोति॥२३॥ येनाकारि समस्तमानसमलक्ष्मागोरतिर्वधतः शान्तो ये
न भवार्णवैकतरणिस्तत्वार्थधीराहृता॥ येनाकारि निजापरैक्यपतिना क्ष्मालोकरामोऽद्वयः श्रीमान्सोमरसिंह एव ज
यति सोऽलेसुकल्पद्रुमः॥२४॥ येनाभीष्टशकोऽन्तमान्य विलसत्प्रोढप्रतापानलज्वालालीढसमस्तवैरिनिव
हारण्यास्पदं प्रोज्झितं॥ लब्धाश्रीमहमदसुरत्राणसुनपात्रनु प्रत्यर्थिकान्तान्नोदंचद्वंद्वपराभवाय सततं शौर्येण
स्थापितं॥२५॥ योऽजाउमाख्यजननी शुभकल्पवल्ल्याः प्रादुर्भवं प्रसवसुस्तवकाभिरामः॥ अर्थिव्रजोऽवि
तविचित्रफलैकधामसोऽयं सभाति दिविसोमरसिंहनामा॥२६॥ येन प्रापि दयालुना क्षितितले वंदीजन
स्ताधनैर्निःस्वो नाचयिता विभक्तिरमणी लीलाकटाक्षो सत्रः॥ सिक्तो धर्मतरुर्निजाश्रुतजनेष्वानन्वतारलजा
न्नूरवाप्तिसोमरसिंह एष भवतात्कल्याणपात्रं सदा॥२७॥ दानेकल्पद्रुमोयः परिहितकरणे भास्करः सिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु० स०
३

धुराम्नो गांभीर्येवापि धैर्ये सकलजनितुषां तापनाशे शशांकः ॥ त्रिष्वंभोधौ निमज्जत्स्खलितवृषतरिर्गौरि
वे रत्नमानुः श्री मान्का यस्तुवर्यो भवतु बहुमुदामास्पदं सोमरश्मीः ॥ २८ ॥ तस्य द्वौ तनयौ प्रशस्तविनयौ जातौ
सदा सद्गुणैः ख्यातौ सूर्तिधरौ धरामधिगतौ किं भानुचंद्रावुभौ ॥ सर्वाशापरिपूरणोचितवसुर्भास्वत्प्रतापो
ज्वलो ज्येष्ठो लक्ष्मणसंज्ञकः समभवत्तस्यानुजो रावणः ॥ २९ ॥ सर्वाशाः परिपूरयन्नुपरि हरन्नत्र केषु तापं
यथांशुष्वङ्कशमनोत्रजानपि सदा हन्तोदकैः पोषयन् ॥ दृष्टिं सत्कमलो ममामपि शुभां मुंचन्समस्तो रावणाभो
दाश्चित्रमिदं न मस्त्रकुरुते कापि क्षितौ दुर्दिनं ॥ ३० ॥ विश्वप्रशस्तमहिमा गुणरत्नसिंधुस्त्रैलोक्यवंद्यपर मो
न्नमधर्मबंधुः ॥ दिक्कामिनीहृदनमंडनकीर्तिहारः श्रीमातिरावण इति क्षितिलोकसारः ॥ ३१ ॥ प्रस्तूतौ मर
सिंहात्स्माकासारात्कमलोपमः ॥ लक्ष्मणो भाति भूलोके करुणावरुणालयः ॥ ३२ ॥ जयति सदसि दक्षः
क्षिप्रविद्वेष्यपक्षः फलितसुकृतवृक्षः स्वीकृतः श्रेष्ठशिक्षः ॥ प्रशमितविहितराक्षः सत्कृतोत्मीयपक्षः सु

३

5

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धनविजितयक्षो लक्ष्मणः कल्पवृक्षः ॥ २३ ॥ यस्योदारविवेकमंदरगिरिप्रक्षुब्धनानागुणाकूपारोत्थय
शोविधुर्धवलयन् त्रैलोक्यमुज्जृंभते ॥ अर्थिव्रातचकोरलोचनमिदं कुर्वन्नपास्यद्रुतं मन्मित्रोदयमोहतेऽन्यज
नतातापं हरन् सर्वदा ॥ २४ ॥ सौंदर्येण मनोभवो महिमतो नो संभमिद्विषिणश्चंद्रो नैव यतः कलंकरहितो दृस्तो
पि नैको यतः ॥ भूमासन्नयनीति वामनयनाचेतोहर त्र्यक्षमावालुं पंकवयोपि सक्षिति तनको प्रोद्यासते लक्ष्मणः
२५ ॥ प्राकुली नोजलधौ चिरं तदनु जो जातः सुमेरौ सिरो वांछामात्रफलप्रदो तिकठिनस्तद्धृत्कल्पद्रुमः ॥ वां
छातीतवसुप्रदोपि नु मनुर्नम्रः सदा लक्ष्मणस्त्रैलोक्यप्रकटीभवन्निजगुणैस्तेनोपमेयः कथं ॥ २६ ॥ त्रैलो
क्यः प्रसरत्कीर्तिसलिलाभ्राजत्स्फशीतेऽद्य सद्वीवित्रान पवित्रतारिवलजगत्प्रासृतयन् निर्मलं ॥ देवी
भोलिकसंज्ञका सुरसरित्स्रोयन्त्रिवर्गोदयं धर्मं मूर्तिरिवावेदितं सजयुतिश्रीमान् सदा लक्ष्मणः ॥ २७ ॥ येना
कारि निजार्जितारिपिन ग्रामेषु भादीधिकानि संसज्जनमार्गणैकवसतिर्योधर्मशालाप्रथानू ॥ सोयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰स॰ सर्वजनानां विलोकय विविधातंकार्दितान्लक्ष्मणः कर्तुं तान्नु चिरजः करोति करुणासिंधुर्निबंधं शुभं ॥ ३८ ॥
४ दृष्ट्वा सुश्रुतवाग्भटात्रिचरकाद्यायोदितोः संहिताः भेडाचार्यमतं विलोकय वकुराः श्रीनित्यनाथादिभिः ॥ प्रो
क्तं चापि विविच्य सर्वमखिलं सारं गृहीत्वा ततो ग्रंथं नाम सुलक्ष्मणोत्सवमिदं ब्रूते सुधी लक्ष्मणः ॥ ३९ ॥ ग्रंथे
शुभे परिचिते सुधियां रसज्ञानां स्याद्दूषणकथावसरस्तथापि ॥ चंद्रे मलेपि धरणीप्रतिबिंबयोगः प्रोक्तो
जनैरमनवछिकरः कलंकः ॥ ४० ॥ संत्येव निर्मलगुणाः मदसद्विवेकं कुर्वंति ये परगुणान्प्रथयंति संतः ॥
संत्येव दुग्धजलभेदविधानदक्षाः स्तन्वंति मानसगुणा न पिशुभ्रपुक्षाः ॥ ४१ ॥ इति श्रीमाथुरकायस्थवंशा
वतंस अमरसिंहात्मज श्रीलक्ष्मणानाम प्रथिते लक्ष्मणोत्सवे ग्रंथे श्रीलक्ष्मणवंशावर्णनं नाम प्रथमः
समुल्लासः ॥ १ ॥ अथ शारीरं कथ्यते ॥ ॥ धर्मार्थकाममोक्षाणां शरीरं साधनं यतः ॥ तत्स्वरूपमतो
ज्ञात्वा तु शारीरं प्राकृ निगद्यते ॥ १ ॥ शुक्रशोणितसंबंधे आत्ममात्रे स्वकर्मभिः ॥ जीवो विशति सोऽगर्भं म

४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

णेरग्निर्यथेंधने ॥ २॥ शुक्रशोणितसंबंधो वायुनेनुविधीयते ॥ धातुदोषमलादेर्व्यद्वायुरेवप्रवर्तकः ॥
३॥ शुक्रशोणितसंबधः संघट्टः श्रोततोरिवु ॥ यदैवजायते गर्भस्तदारभ्य प्रवर्त्तते ॥ ४॥ द्रवरूपं तदेकाहा
त्कललं जायते ततः ॥ बुद्बुदः सप्तदिवसैः पक्षेण कठिनो भवेत् ॥ ५॥ मासेन पिंडतां याति सैव पेशी निगद्य
ते ॥ शिरो मासद्वयेन स्यात् पाणिपादौ त्रिमासके ॥ ६॥ कटूदरं तु जोरुपं चतुर्थे मासि जायते ॥ पंचमं मासमारभ्य गर्भे
चेष्टा प्रवर्तते ॥ ७॥ तत्रैव पृष्ठवंशः स्यात् षष्ठे कर्णस्य नासिका ॥ अंगप्रत्यंगसंबंधो नखरोमादि सप्तके ॥ ८॥ सूक्ष्म
भावस्थितं पूर्वं युगपज्जायते खिलं ॥ ओजोष्टमे संसंचरति गर्भे मातरि वा सकृत् ॥ ९॥ तेन दुःस्थानमुद्दिष्टे स्यात्तां जा
तो न जीवति ॥ स देही नवमे मासि सर्वलक्षणसंयुतः ॥ १०॥ ज्ञानन्तु शुभाशुभं कर्म संस्मरन् पूर्वजन्मजं ॥ मातरो वि
विधा दृष्टा पितरो भ्रातरस्तथा ॥ नानायोनिरहं भ्रान्तः पशुकीटादिपक्षिणां ॥ ११॥ तत्रोषितो ति दुःखेन वपुःमू
त्रमलान्वितः ॥ उल्वसंवेष्टितो भग्नपृष्ठग्रीवास्थिसंहतिः ॥ १२॥ गर्भाशये स्थितो देही सान वानुचिंतयन्ति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊ॰सं॰
५

द ॥ किं मया दुष्कृतं कर्म कृतं गर्भाभिधेयतः ॥ १३ ॥ पतितो निरये घोरे हेतत्सर्वं विचिन्तयन् ॥ यदि गर्भाद्विनिर्या
मि करिष्यामि तदा शुभं ॥ १४ ॥ येन भूयो न गर्भवासदुःखं दुःशामि न बन्धितं ॥ ततः स दशमे मासि नवमे वा निजैर्ब
लात् ॥ १५ ॥ निःसारितो निदुःखातो योनिमार्गेण यन्त्रवत् ॥ निर्गतो योनितो देही मायया श्लिष्यते पुनः ॥ १६ ॥ त
त्क्षणात्तस्माद्विज्ञानविनाशादिवरोदिति ॥ नाभौ गर्भस्य मातुश्च हृदि नाडी प्रवर्तते ॥ १७ ॥ यया संपुष्टिमाप्नोति के
दार इव कुल्यया ॥ शोणिताधिक्यतो नारी शुक्राधिक्यात्पुमान् भवेत् ॥ १८ ॥ शुक्रशोणितसाम्येन षंढः सत्रो
पजायते ॥ परस्पराभिघातात्तु प्रभिन्ने कललं द्विधा ॥ १९ ॥ द्विधा तनुः प्रवर्तते युग्मं तस्मात्प्रजायते ॥ बहु
नारीस्तु नाभेर्दाने जायन्ते बहवः स्ततेरा ॥ २० ॥ नारी धातु दोषेण विकृताश्च वियोनयः ॥ कुब्जवामनखंजाद्या जाय
न्ते च विकृतास्ततः ॥ २१ ॥ एवं पञ्चमहाभूतसम्पातमयं वपुः ॥ तस्मिन्नुपलकं ठिनं साम्भूस्तज्जलं यद्द्रवात्मकं
२२ ॥ तेजो भवेद्यदुष्णं तत्संभवेद्यः समरूत् ॥ सुषिरं यत्तदाकाशमिति पञ्चात्मकं वपुः ॥ २३ ॥ तत्रास्थि
५

9

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मांसनाडीत्वक्‌श्लेदांसीति महाभवेत्॥ स्वेदो मूत्रमसृक्शुक्रं लालेति जलमुच्यते॥२४॥ क्षुत्तृषा क्रोधकांतीच
तृष्णा तेजोगुणा इति॥ प्रसारा कुंचनं चैव [illegible] वायोर्धावनचालने॥२५॥ आकाशं जडता निद्रा मूकता मोह विस्मृतिः
श्रवणे व्योमतो वायोस्त्वङ् नेत्रं तेजसो जातं॥२६॥ रसना भूमितो घ्राण मिति पंचेंद्रियोद्भवः॥ श्रुत्याशब्दं त्व
चा स्पर्शं रूपं जानाति चक्षुषा॥२७॥ रसं [illegible] सनया तत्र गंध घ्राणेन मानवः॥ ज्ञानेंद्रियाणां विषया बाह्यानां पंच
कीर्तिताः॥२८॥ जिह्वाया वचनं कर्म ह[illegible]तयोः पादयोर्गतिः॥ पायोरुत्सर्ग आनंद उपस्थस्येति कीर्तिताः॥
२९॥ कर्मेंद्रियाणां विषया मनस्यात्सर्व गोचरं॥ नाभिकुंदादधो नाड्यः प्रसृता दश सर्वतः॥३०॥ इडा पिं
गा तथा दृष्टे वामदक्षिण पार्श्वयोः॥ एवं चतुर्विंशतिभि मुख्याभि व्याप्यते वपुः॥३१॥ नाडीभिस्ताभिरेवान्याः
सूक्ष्माः समभवंत शिराः॥ प्रसृता सर्वतो गात्रमापादतल मस्तकं॥३२॥ आप्याय्यते वहंतीभिः याभिरन्ना
दिजं रसं॥ वायुना प्रेर्यमाणे सर्वशिरासु व्याप्ति जो रसः॥३३॥ शरीरे वायवः पंच प्राणो हृदयमाश्रितः॥उ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०सं० दा॰ कंठदृग्गलस्तेषु समानो नाभिदेशगः ॥२४॥ मलादिप्रेरकोऽपानो व्यानो व्यापक उच्यते ॥ कलाः सप्ताशयाः
६ सप्त धातवः सप्त तन्मलाः ॥२५॥ सप्तोपधातवः सप्त त्वचः सप्त प्रकीर्तिताः ॥ मांसासृङ्मेदसां तिस्रो यकृत्
प्लीह्नोश्चतुर्थिका ॥२६॥ पंचमी च तथांत्राणि षष्ठी चाग्निधरा मता ॥ रेतोधरा सप्तमी स्यादिति सप्त कलाः स्मृताः
२७ श्लेष्माशयः स्यादुरसि तस्मादामाशयस्त्वधः ॥ ऊर्ध्वमग्न्याशयो नाभेर्वामभागे व्यवस्थितः ॥२८॥ तस्यो
परि तिलं ज्ञेयं तदधः पवनाशयः ॥ मलाशयस्त्वधस्तस्य बस्तिर्मूत्राशयः स्मृतः ॥२९॥ जीवरक्ताशयमुरो
ज्ञेयाः सप्ताशयास्त्वमी ॥ आशया योषितामन्ये पुरुषेभ्योऽधिकास्त्रयः ॥ स्तनौ स्तन्याशयो गर्भस्थे त्रं गर्भा
शयः स्मृतः ॥३०॥ रसासृग्मांसमेदोऽस्थिमज्जाशुक्राणि धातवः ॥ जायन्तेऽन्योन्यतः सर्वे पाचिताः पित्त
तेजसा ॥३१॥ जिह्वानेत्रकपोलानां मलं पित्तं च रंजकं ॥ कर्णविट् रसनादंताकक्षामेढ्रादिजं मलं ॥ नखनेत्र
मलं वक्त्रे स्निग्धत्वं पिटिकास्तथा ॥५२॥ जायंते सप्तधातूनां मलान्येवमनुक्रमात् ॥ स्तन्यं रजश्च नारीणां

11

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसास्वेदस्तथा रदाः ॥४३॥ ओजश्च सप्तमं प्रोक्तं एते सप्तोपधातवः ॥ ख्याताबभासिनी पूर्वा सिध्मा रोग
निवासभूः ॥४४॥ लोहिता स्माद्द्वितीया स्यात्तिलकालकसंश्रया ॥ श्वेता स्मृता तृतीया स्या स्थानं चर्मदल
स्य सा ॥४५॥ ताम्रा ज्ञेया चतुर्थी स्यात् कुष्ठ किलास श्वित्र रोगभूः ॥४६॥ पंचमी वेदिनी प्रोक्ता यत्स्यात्कुष्ठसमु
द्भवः ॥ लोहिता च तथा षष्ठी ग्रंथिगंडापचीस्थितिः ॥४७॥ स्थूलाख्या सप्तमी ज्ञेया विद्रध्यादिस्थितिर्मता ॥ इति
सप्तत्वचः प्रोक्ताः स्थूला व्रीहिद्विमात्रया ॥४८॥ वायुः पित्तं कफश्चेति त्रयो दोषाः समासतः ॥ प्रत्येकं पंचधा दोषाः
शरीरस्थितिसाधनात् ॥ बलवानुत्तमः पवनः सर्वधातुप्रवर्तनात् ॥ रजोगुणमयः सूक्ष्मः शीतो रूक्षो लघुश्च
लः ॥५०॥ प्राणादिपंचभेदात्मा सर्वदेहे प्रवर्तते ॥ पित्तमुष्णं द्रवं पीतं नीलं सत्वगुणात्मकं ॥५१॥ कटु तिक्तरसा
श्चैव विदग्धं चाम्लतां व्रजेत् ॥ अग्न्याशयमवेस्थितं अग्निरूपं तिलोन्मितं ॥५२॥ त्वचि कांतिकरं तेषु लेपाभ्यं
गादिपाचकं ॥ दृश्यं पक्कतिपास्थितं तदु शोणितं नयेत् ॥५३॥ यस्थितं नेत्रयुगले रूपदर्शनकारितत् ॥ प

12

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु॰सं॰ स्थितं हृदयतिष्ठन्मेधाप्रशाकृत्तं च तत् ॥५४॥ पाचकं भ्राजकं चैव रंजकालोचके तथा ॥ साधकं चेति पंचैव
७ पित्तनामान्यनुक्रमात् ॥५५॥ कफः स्निग्धो गुरुः श्वेतः पिच्छलः शीतलस्तथा ॥ तमोगुणाधिकः स्वादुर्विदग्धो
लवणो भवेत् ॥५६॥ कफो आमाशये मूर्ध्नि कंठे हृदि च संधिषु ॥ तिष्ठन् करोति देहस्य स्थैर्यं सर्वांगपाटवं ॥
५७॥ क्लेदनः स्नेहनश्चैव रसनश्चावलंबनः ॥ श्लेष्मकश्चेति नामानि कफस्योक्तान्यनुक्रमात् ॥५८॥ स्ना
नी यवो बंधीभूता देहे नवशतमिताः ॥ शिराः सप्तशतं प्रोक्ता धमन्यो रसवाहिकाः ॥५९॥ चतुर्विंशतिराख्या
ता संधयस्तु दशाधिकं ॥ शतद्वयं तथा स्नायुशतत्रयमुदाहृतं ॥६०॥ सप्तोत्तरं मर्मशतं दश रंध्राणि मान
वे ॥ त्रयोदश तथा स्त्रीणां द्वे द्वे चैव कुचयोः ॥६१॥ नासाद्वे च तथा प्रोक्ते रंध्रे त्वेकेन मुच्यते ॥ मेहनापानव
क्त्राणां दशमं मस्तके स्मृतं ॥६२॥ स्तनयोर्द्वे गर्भवर्त्मा स्त्रीणामत्र त्रयोदश ॥ अन्यानि सूक्ष्मरंध्राणि त्वचि
प्रोक्तानि देहिनां ॥६३॥ रक्तवाही शिरामूलं प्लीहा संकीर्त्यते बुधैः ॥ यकृद्रंजकपित्तस्य स्थानं रक्तस्य सं ७

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रयः ॥ ६५ ॥ जलवाहिशिरामूलं तृष्णाच्छादनकं तिलं ॥ बीजवाहिशिरामूलं धारो वृषणो पोरुषावहो ॥ ६५ ॥ ग
र्भधारणकं लिंगमप्यनं वीर्यमूत्रयोः ॥ हृदयं चेतनास्थानमोजसश्चाश्रयो मतः ॥ ६६ ॥ नाभिस्थः प्राणपवनः
स्पृष्ट्वा हृत्कमलांतरं ॥ निर्गच्छति बहिः कंठात्पातुं विष्णुपदामृतं ॥ ६७ ॥ स पीत्वाकाशपीयूषं पुनरायाति वेगतः
प्रीणयन्देहमखिलं जीवयञ्जठरानलं ॥ ६८ ॥ शरीरप्राणयोरेवं संयोगादायुरुच्यते ॥ कालेन तद्वियोगाच्च
पंचत्वं कथ्यते बुधैः ॥ ६९ ॥ धातुदोषमलादीनां साम्यमारोग्यमुच्यते ॥ आरोग्याच्च भवेदायुस्तस्मादारोग्यमि
ष्यति ॥ ७० ॥ इति माथुरकायस्थवंशावतंसामरसिंहात्मजश्रीलक्ष्मणनाम प्रथिते लक्ष्मणोत्सवे शारी
रकथनं नाम द्वितीयोऽध्यायः ॥ २ ॥ आयुरारोग्यसंपत्त्यै प्रातरुत्थाय मानवः ॥ धर्मार्थकाममोक्षार्थं चिंतये
दात्मनो हितं ॥ १ ॥ कोष्ठशुद्धिं च शौचादिं विधाय स्मृतिनोदितं ॥ दंतकाष्ठं प्रयुंजीत विधिवद्विहिते दिने ॥ २
तीक्ष्णक्षीरकषायाणां कटुकटकिनामपि ॥ दंतकाष्ठमुपादाय दंतपांसान्यपरुयन् ॥ ३ ॥ अर्कक्रांतिवरेरी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० स्मि: करंजेवीर्यकर्दनं ॥ अंकोठोरुचिरसाढ्य तुष्टिपुमंदेसुधासमता ॥४॥ दाडिमीरूपवान्प्रोक्ता निर्गुंडी पिनताशि
४ नी ॥ अपामार्गे धृतिर्मेधा प्रशस्या श्रद्धायुंबरे ॥५॥ बदरी मधुर: स्वर: ॥ अन्येषां चैव काष्ठानां नकुर्याद्दंतधावनं ॥
६॥ दंतान्प्रक्षाल्य जिह्वां च संशोध्य क्षालयेन्मुखं ॥ मलंवैरस्यदौर्गंध्यं न भवंति मुखेजरा ॥ रविवेश्मद्युलघुना आयं ने
ई न धावनात् ॥ अजीर्णांश्वासरमथुकासातध्याज्वरार्दिता: ॥ कर्णास्यनेत्रहृद्रोगी दंतकाष्ठं नसेवयेत् ॥८॥ भुक्त भ
वान्तु दुर्बलश्रांतो हिक्कामूर्छादिपीडित: ॥ उन्निद्र: छर्दिमान्शोषी नकुर्याद्दंतधावनं ॥९॥ दृष्टि: प्रसादमारोग्य
ग मस्योसौवीरमंजने ॥ स्निग्धपक्ष्ममनोज्ञत्वे कुर्यात्तेनतदाचरेत् ॥१०॥ नेत्रे प्रक्षालयेत्प्रातः ज्ञस्त्रिफलाक्वाथवारि
वारिणा ॥ दृशोरोगा विनश्यंति न भवंति पुनस्तत: ॥११॥ उन्निद्र: छर्दित: श्रांतो भुक्तवान्स्वरपीडित: ॥ शिर
स्नातं नकुर्वीत दृशोरंजनधावने ॥१२॥ गंडूषपूरणं स्नेहे मुखरोगाद्विनाशयत् ॥ रसज्ञाजातोथ्यपारुष्यस्वरमा
द्यादि नाशयेत् ॥१३॥ मुखोष्माद्कगंडूषकेफकंडूमलापह: ॥ शोषमूर्छामदातीनांशोणानारक्तपित्तिनां ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रान्तानां तु षष्टनेत्राणां गडूषो न प्रशस्यते ॥ मुखप्रक्षालनं शीतवारिणा रक्तपित्तजित् ॥१५॥ पिंडिकानीलिकाव्यंग
शोषं च रक्तस्य नाशयेत् ॥ तांबूलभक्षणं वक्त्रमलदौर्गंध्यनाशनं ॥१६॥ कषायं रोचनं तीक्ष्णं सरं तिक्तोषणं लघु ॥
कामकृत्कफवातघ्नं तांबूलं रक्तपित्तकृत् ॥१७॥ शोषमूर्छाविषार्तानां क्षतानां सक्तपित्तिनामपि ॥ वर्जयित्वाम
दार्तानां तांबूलं दुष्टचक्षुषां ॥१८॥ भुक्तः सुप्तोत्थितः स्नातः वान्तानां तत्प्रशस्यते ॥ कर्मसामर्थ्यकृद्धृष्टो दीपनो रो
षहृत्तनोः ॥१९॥ दार्ढ्यकृद्धृति नांशस्तो व्यायामः स्निग्धभोजिनां ॥ शरीरे लाघवं मेदःक्षयमाहारपाचनं ॥ बलिपलि
तनाशं च व्यायामः कुरुते नृणां ॥२०॥ वसंते ग्रीष्मसमये प्रायो व्यायाम इष्यते ॥ सामर्थ्यार्थिभिरन्यत्र सेवनीयो
यथाबलं ॥२१॥ देहसंधिषु नासायां ललाटे कक्षयोरपि ॥ येन संजायते स्वेदः सामर्थ्याद्धं तदादिशेत् ॥२२॥ व्य
वायी भुक्तवान् रोगी कृशः श्रान्तश्च तं त्यजेत् ॥ बलवानेव कुर्वीत व्यायामो रोगदोऽन्यथा ॥२३॥ आयुस्त्वग्दृष्टि
बलकृत्वातश्रमजरापहः ॥ स्वप्नकांतिकरोऽभ्यंगः सेवनीयः सदा नरैः ॥२४॥ विशेषात् पादयोर्मूर्ध्नि चक्षुः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सू० स० केशाहिमोयत ः॥ हनुमन्याशिरःकर्णीः शूलघ्नं कर्णपूरणं॥२५॥ रसाद्येभोजनात्पूर्वं तैःआद्यैरसगोरवो॥ स
९ जेत्र वज्रवरोबांतो मीणाभ्युंगनिरुद्वान्॥२६॥ कफमेदोहरं गात्रस्थैर्यकृत्वक्प्रसादनं॥ उद्वर्तनं मदाश्रुक्रव
र्तनं श्रमनाशनं॥२७॥ स्नानमायुःकरं ह्युं श्रमतामलापहं॥ ओजोबलकरं वृष्यं कामदं च त्रिदोषहृत्।
२८॥ स्वेदकंडूतृषातंद्रा तु स्यहस्तुष्टिवुद्धिदं॥ उष्णं वारि सदा स्नाने शीतं शीते प्रशस्यते॥२९॥ नेत्रप्रक्षा
लनेचास्यशस्तं पर्युषितं जलं॥ न स्नानमाचरेद्भुक्त्वा नातुरो नाद्विले जले॥३०॥ नाजीर्णे न च शीतातेना
स्पर्थं शीतवारिणा॥ अनुलेपो दाहमूर्छान्तःश्मादौर्गंध्यनाशनः॥३०॥ कर्पूरचंदनोद्भूतो लेपः परमशीतलः
कुंकुमागरुकस्तूरीकृतं मुष्णं विलेपनं॥३१॥ कुसुमानि सुगंधीनि संशिरसि धारयेत्॥ रूपप्रसादो मनो
हर्ष्य सौभाग्यं तेन जायते॥३२॥ आयुरारोग्यसंपत्तिर्धर्मादेवेह जायते॥ अर्थकामापवर्गाश्च तस्माद्धर्मपरो
भवेत्॥३२॥ यद्धितं तस्य जानीयात्परस्यापि तदाचरेत्॥ अनिष्टं यद्भवेत्स्वस्य न परस्य तदाचरेत्॥३३॥ आ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्मवत्सर्वभूतानि मातृवत्परयोषितः ॥ लोष्ठवत्परवस्तूनि पश्येद्धर्मपरो नरः ॥ ३३ ॥ संयमात्संयमो मूलं म
हाणां पुण्यपापयोः ॥ तयोर्मूलं मनः तस्मात्मनः कुर्वीत संयतं ॥ ३४ ॥ मनसः संयमे हेतुर्वैराग्यं तद्विवेकतः
संसारासारताज्ञानमाश्रित्य मतिश्रमः ॥ ३५ ॥ इंद्रियाणि समाहृत्य विषयेभ्यो मनस्ततः ॥ चिंतयेत्परमात्मानं
संसारार्णवतारणं ॥ ३६ ॥ अभयं सर्वभूतेभ्यो इह लोके परत्र च ॥ सर्वदा प्राणिनां प्राणा यस्मादाहारमाश्रिताः ॥ ३७
तस्मादाहारदानेन प्राणदानादि भिद्यते ॥ भोजयन्ति विप्रांश्च कुर्वत्यभ्यागतादिकान् ॥ यानकाश्रितदीनांधा
न् पश्चाद्भोजनमाचरेत् ॥ शास्त्रं संचिंतयेन्नित्यं स धर्मज्ञानबोधकं ॥ ४० ॥ दानमन्नं च विप्रेभ्यो ज्ञोदानं वै धर्ममिच्छ
तां ॥ परिचर्यां प्रकुर्वीत रोगिणां विविधौषधैः ॥ ४१ ॥ रोगशांतिं च सर्वेषामुपकारपरो भवेत् ॥ मिथ्याग्रह परग्र
ह भक्ष्याभक्ष्य चौर्यं नत्वं ॥ ४२ ॥ असत्यं च परुषं पैशुन्यं परस्त्रियः ॥ हिंसास्तेयमसत्यं च त्यजेत् मनोवाक्कायकर्मभिः
४३ ॥ हितं मितं च वाच सत्यं वदेत्सः शुभं भवेत् ॥ नैकोभुंजीत वै मिष्टं न किंचिन्मर्माणि स्पृशेत् ॥ ४४ ॥ विश्वस्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ० स० बहवि स्ससमरा समसंगतिं भवेत् ॥ परस्परविरुद्धं च न त्रिवर्गं समाचरेत् ॥ ४५ ॥ त्रिवर्गारंभरहितं न कालं गमय
१० येत् क्वचित् ॥ कृत्तरोमनखश्मश्रु शुद्धवेषधरो भवेत् ॥ ४६ ॥ नार्कं पश्येन्न नग्नां स्त्रीं बाहुभ्यां न नदीं तरेत् ॥ नभि
न्नां नावमारोहेन्नैकः शून्यवनं व्रजेत् ॥ ४७ ॥ जृंभणःक्षुतहास्यानि कुर्यान्नासंवृताननः ॥ नोर्ध्वजानुश्चिरं तिष्ठेन्नना
सातो कुरुकश्चिरं ॥ ४८ ॥ सायंप्रातर्मति स्य मुध्या ज्ञानपूर्वमाचरेत् ॥ भोजनं मधुरं पूर्वं मध्येऽम्ललवणात्मकं
४९ ॥ अंते कटुकतिक्तं च विरुध्याध्यशनं त्यजेत् ॥ भोजनांते पिबेत् क्षीरं न च पश्चात् पिबेद्दधि ॥ ५० ॥ नातिस्तोकं नाति
भूरि नाजीर्णे भोजनं चरेत् ॥ आचम्य जानुनी पूर्वं स्पृशेद्दक्षिणपाणिना ॥ ५१ ॥ चक्षुषी च स्मरेत् पश्चात् अगस्त्या
दीनृषीन् बहून् ॥ अगस्त्यं कुंभकर्णं च शनीं च वडवानलं ॥ आहारपरिणामार्थं संस्मरेच्च वृकोदरं ॥ नाव्रं
चेद् सहाहिदत्वा विभ्राय भक्षयेत् ॥ ५२ ॥ शनैः पदशतं गच्छेत् सर्वके सविशेत्ततः ॥ भुक्त्वा शं विशान्तस्तु दं वलु
मुह्यानशायिनः ॥ ५४ ॥ आरोग्यं वामशयनात् भवेन्मत्कश्च धावतः ॥ व्यवायभोजनं निद्रां संध्यास्वाध्ययने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मरेत् ॥ ५५ ॥ धर्मशास्त्रोक्तविधिना सर्वमाह्निकमाचरेत् ॥ निशि पर्वादिरहिते दिने यौवनशालिनी ॥ ५६
सानुरागां स्त्रियं गच्छेत् स्नातां चारुविभूषणां ॥ न रजस्वलां नातुरां गच्छेत् दुष्टां नव मलान्वितां ॥ ५७ ॥ नानिच्छान्
रजोयुक्तां स्त्रियं नान्यस्य नो दिवा ॥ पुरुषः षोडशादूर्ध्वं यावत्सप्ततिसंमितिः ॥ ५८ ॥ तावत्सेवेत युवतीं याव
त्कालं यथाबलं ॥ निशा षोडश नारीणां ऋतुः स्यात् दिनत्रयं ॥ ५९ ॥ हितास्तत्र शुभे चंद्रे लग्ननक्षत्रे तासु संव्रजेत्
युग्मासु जायते पुत्रो निशास्वन्यासु कन्यका ॥ ६० ॥ शुचिर्भूत्वा स्त्रियं स्पृष्ट्वा शयनात्तां विशेत्ततः ॥ एकः शेते
द्विरस्नाति त्रिर्मलं यो विमुंचति ॥ ६१ ॥ सोऽन्यमैथुनरुग्जीर्णं तं षण्मास्त्रेकृतसमाः ॥ एवं दिनोदितां चर्यामा
चरेयुः समानवाः ॥ ६२ ॥ सर्वरोगविनिर्मुक्तो नात्र शुभं कचिदाप्नुयात् ॥ इति श्री माथुरकायस्थवंशावतंससामर
सिंहात्मजश्री लक्ष्मणेन नामप्रथितेन श्री लक्ष्मणोत्सवे ग्रंथे दिनचर्याभिधानो नाम द्वितीयोऽध्यायः ॥ २ ॥ अ
थर्तुचर्या ॥ माघ । फाल्गुन । शिशिरः पुष्पसमये ग्रीष्मो वर्षा शरद्धिमान् ॥ माघादिमासयुग्मैः स्युः ऋ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ०स० तुवः षट् क्रमादिने ॥१॥ उत्तरायणमाघेस्त त्रिभिः स्याद्दक्षिणायनं ॥ आयुमुख्यंवत्सहरं नत्रान्युद्दल
११ दृहिमं ॥ २॥ तुषारजालाप्तिहितानियत्र सबाष्पनीरानिमुखानि भानुः ॥ प्रातः प्रसन्नानिकरोतिनिःस दिशांव
धूनामिवसंवृतानां ॥ ३॥ प्रियंगुपुन्नागकरोधरेणु रजभ्रमे वीतिहिमाद्रिवायुः ॥ आच्छादयन्धूमवितान
नीदं विद्यादृतुं तंहिमनामधेयं ॥ ४॥ नीहारानिलसंस्पर्शात् बलवान्मारुतोयतः ॥ अतोहेमंतसमये सेव्या
शुंठी हरीतकी ॥ ५॥ तिलैस्तैलेन शिरसो गात्रस्याभ्यंगमाचरेत् ॥ सेवेदादित्यकिरणान् निर्दंमं चक्रनाशनं ॥
६॥ आच्छादयेच्चकौशेयं प्रावारंचित्रमंबरं ॥ कार्पासिकं नवं सेव्यं गृहं चागरुधूपितं ॥ ७॥ हेमंतेकुद्दति
क्षोभ्रमम्लक्षारंच तंदधि ॥ गोधूमातिलमाषेक्षुविकारान्भक्षयेद्दृढं ॥ ८॥ कस्तूरिकागरुविमि
श्रितकुंकुमार्द्रदेहं निषेव्यरमणी रतिखेदखिन्नः ॥ शेतेकृती हिमविशालनिशागमेषु तारुण्यपीनकु
चयोगनिरस्तशीतः ॥ ९॥ इति हेमंतः ॥ तपसि फाल्गुन ॥ अथ शिशिरः ॥ पत्रामतद्युतिकरं व्रजस

११

21

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिकटु[illegible]व्या मारिशश्च प्रवैरेक तुषारजाले ॥ स्वर्द्धं नु भस्त्रा हिमपीडितवज्जवन्हे राशाशु पैति तपनः शिशिरः सका
लः ॥ ९ ॥ हिमोक्तचर्या शिशिरे पिकार्या पथ्याश्च सेव्याः सहपिप्पलीभिः ॥ पिशात्रकं सूरणशृंगवेरमिश्रं सदामृ
रकादि योज्यं ॥ ११ ॥ इति शिशिरः ॥ अथ वसंतः ॥ चैत्रवैशाखः ॥ यत्रागास्ति हरिस्मरतपवन व्याधूतनूतद्रुमारामो
दारपरागपुंजपिहितं व्योमा निरीशा जने ॥ छिन्नं रेणुचयैरिव स्मरविभोर्या त्रोडुतैरिछतो जेतुं सर्वजगंति सस्मर
सखो सेव्यो वसंतोदयः ॥ १२ ॥ तत्र श्लेष्मा वलोपे मारुपाक्षिजठरानलं ॥ रोगान् करोति बहुशस्तेन पूर्वं कफं जयेत्
१३ ॥ हरीतकीक्षौद्रयुताश्च सेव्या श्रमो विधेयश्च बलानुरूपः ॥ भंग्या वल्ली कोकिलनादरम्या रामाश्च रामा सहि
ते निषेव्याः ॥ १४ ॥ तीक्ष्णं रूक्षं च कटुकं कषायं तिक्तकं लघु ॥ सेव्यं पुराणगोधूममुद्गशालियवादिकं ॥ १५ ॥ उद्वर्तनं
चरेन्नित्यं दिवास्वप्नं तु नाचरेत् ॥ गुरुस्निग्धं च मधुरं शीतमम्लं च वर्जयेत् ॥ १६ ॥ रामां प्रसन्नशशिमिंदुमुखीं वि
निद्रपंकेरुहाक्षीं तिदृशिं धनवासवेषां ॥ आलिंग्य मारुतवयं परिस्तुं अपितं भुक्त्वा जयेत् कफरुजं स्मरमित्रकाले ॥ १७

22

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऋ॰सं॰ इति व... तः ॥ अथ ग्रीष्मः ॥ ज्येष्ठ आषाढः ॥ यत्र प्रचंडकिरणप्रबलप्रतापसंशोषितह्रदमलतातनपावारिपूरः ॥ उ
१२ ज्जृंभ... पवनवेगविकीर्णरेणुच्छिन्नाभ्रमंति न दृशा स निदाघकालः ॥१८॥ निदाघे भास्करः प्राप्ततेजः क्षिपति भानुर
भिः ॥ ... स्निग्धच्छायं गृहं सेव्यं सेव्या पथ्या गुडान्विता ॥१९॥ आराम भूरुहनिरस्तरविप्रतापो वाप्यः प्रसन्नक
मला... कमलाकराश्च ॥ नद्यश्च चंदनरसो घनसारमिश्राः सेव्याः स्रजो विधुकराश्च निदाघकाले ॥२०॥ भो
ज्यं शी... तं च मधुरं लघु पुनः व्याहारं मृदुः ॥ स्निग्धं इक्षुरसा... द्रिपानकं शीतलं पिबेत् ॥२१॥ सुकंदना... तान्सुशीत
वारि... शर्करान्विताम् ॥ मध्ये ... जलं वारि पिबेत्कर्पूरवासितं ॥२२॥ सुजले ... कान्तिकोष्म लवणाम्ल विभ
दाह... त ॥ ...यामं सिंधुपाने च भास्करस्य करोधितं ॥२३॥ इति ग्रीष्मः ॥ अथ वर्षा ॥ श्रावणभाद्रपद ॥ यत्रें
नीव... भवारिधरैर्निरुद्धाः काष्ठान भश्च विमलीकुरुते न भानुः ॥ अंभः समीकृतमरुस्थलनिम्नगाम्भश्या
मा... घोरभिनैवैः खलु नाम वर्षाः ॥२४॥ शशिकरमरुत्स्पर्शाहरणी बाष्पयोगतः ॥ सरिद्वाविलतोयेश्च

१

23

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दोषाः स्युस्तत्र कोपिनः ॥ २५ ॥ पथ्या सैंधवसंयुक्ता सेव्या गेहं समुन्नतं ॥ शुष्कं प्रकाशवच्चित्रं सुधनोगुरु
धूपितं ॥ २६ ॥ स्निग्धमम्लं सलवणं जीर्णशालियवादिकं ॥ मस्तु सैंधवसंयुक्तं पंचकोलावचूर्णितं ॥ २७ ॥
क्वथितं तोयं निशेषेत दिव्यं कौपं जलं पिबेत् ॥ भवेद्यानेन गमनः शुष्कधूपितवस्त्रवान् ॥ २८ ॥ सरोनद्या
दिसलिलस्नानपाने विवर्जयेत् ॥ दिवास्वप्नं श्रमं घर्मं प्रावृट्काले विवर्जयेत् ॥ २९ ॥ इति वर्षाप्रावृड्वर्ण
नं नाम ॥ अथ शरदृणनं ॥ पत्रोज्वला जलमुचो विशदेंदुबिंबतारं नभो विकचनीरजकैरवाणि ॥ नीराणि
मानससनिभानि समंतादि भांति काशाग्निकीर्त्तिसदृशानि च सा शरत्स्यात् ॥ ३० ॥ पित्तं प्रावृट् समुत्पन्नं शरत्का
ले प्रकुप्यति ॥ तेन शर्करया सार्द्धं सेवनीया हरीतकी ॥ ३१ ॥ कषायं मधुरं तिक्तं सततं लघु शीतलं ॥ शालि
मुद्गान्नमश्नीयात् पिबेदुग्धं सशर्करं ॥ ३२ ॥ धात्रीपटोलगव्याज्यं सर्वमिक्षुविकारजं ॥ सेव्यं नदीसरोवा
री करजाल्हेन्दशीतगोः ॥ ३३ ॥ तीक्ष्णमम्लं च लवणं दधि तैलातसवातपं ॥ दिवास्वप्नं पुरोवातं शरत्काले वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र०स०
१३

वर्जयेत् ॥ ३४ ॥ इतिशास्त्रं ॥ पूर्वं तु प्रोक्तस्य समाहात्म्यभाविनो विधिमाचरेत ॥ स्त्रीसं ईक्षणसंयोगात् स तु सं
धियतो भवेत् ॥ ३५ ॥ इति श्री माथुरकायस्थवंशावतंस मामरसिंहात्मज श्री रूपनारायण प्रथिते रूपमणौ सेवग्रं
थे स तु स्वर्णविर्णनो नाम चतुर्थो ध्यासः ॥ ४ ॥ अथ परिभाषा ॥ मुक्तिर्मार्निर्विना ते वृद्धमाणं जायते क्वचि
त् ॥ अतो द्रव्योपयोगार्थं मानमादौ निगद्यते ॥ १ ॥ त्रसरेणुर्निगदितस्त्रिंशता परमाणुभिः ॥ सएर
रश्च्यते वंशी आसे भाति विज्ञेयते ॥ २ ॥ षड्वंशीभिर्मरीचिस्यात् षड्मरीचिस्तु राजिका ॥ तिसृभिः सर्षपस्ता
भिर्यवः स्यादष्टसर्षपैः ॥ ३ ॥ यवैश्चतुर्भिर्गुंजा स्यात् षड्गुंजो माषको भवेत् ॥ हेमधान्यक संज्ञाभ्यां मा
ष एव निगद्यते ॥ ४ ॥ चतुर्भिर्माषकैः शाणः टंकश्च धरणः स्मृतः ॥ शाणद्वयं तु कोलः स्यात् टंकोक्षुद्रमश्च
सः ॥ ५ ॥ द्रक्षणश्च सएरस्यात् कर्षः कोलद्वयं भवेत् ॥ कथ्यते कर्ष एवाक्षः तिंदुकं पाणिमाणिका ॥ ६ ॥ पिचुः
पाणितलं चैव विडालपदकं तथा ॥ उदुंबरं हंसपदं किंचित्पाणितलं सुवर्णिकं ॥ ७ ॥ कवलग्रह इत्युक्ताः य

25

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पर्याया [illegible] वीवाचिकः ॥ कर्षद्वयेन शुक्तिः स्यात्सैवार्द्धपलमुच्यते ॥ तथैवाष्टमिका नाम फलं शुक्तिद्वयं
भवेत् [illegible] रत्नमाम्लं प्रकुंचश्च भवेन्मुष्टिश्चतुर्थिका ॥ ७ ॥ एते पलस्य पर्यायाः प्रसृतिः स्यात्पलद्वयं ॥ प्रस
तिभ्यां [illegible] द्वाभ्यामंजलिः कुडवश्च सः ॥ ९ ॥ अष्टमानं च कथितं तथैवार्द्धशरावकः ॥ कुडवाभ्यां भवेद्द्वाभ्यां श
रावो [illegible] तथा ॥ १० ॥ शरावाभ्यां भवेत्प्रस्थश्चतुः प्रस्थैस्तथाढकः ॥ चतुर्भिराढकैः प्रोक्तो द्रोणो राशि घटा
कुम्भः ॥ ११ ॥ शूर्पको मणिउन्मानो नल्वणो लुभुनो घटः ॥ एते द्रोणस्य पर्यायाः कथिताश्च भिषग्वरैः ॥ १२
द्रोणा [illegible] शूर्पकुंभौ च चतुःषष्टिशरावकः ॥ कुंभाभ्यां च भवेद्द्वाभ्यां गोणी द्रोणिवहोपि च ॥ १३ ॥ चतुर्द्रोणी
भवेत् [illegible] रीकणवस्यधिकाचसा ॥ चतुःसहस्रपलिका खारी पर्यायसंज्ञका ॥ १४ ॥ तुलापलशतं ज्ञेया विं
शति [illegible] रसंज्ञितः ॥ माषः शाणाक्षबिल्वानि कुडवः प्रस्थमाढकं ॥ १५ ॥ राशी द्रोणी खारिकेति यथोत्त
रन्व [illegible] णाः ॥ रक्तिकादिकमारभ्य यावत्कुडवो भवेत् ॥ १६ ॥ द्रवशुष्कादिवस्तूनां तावन्मानं समं स्मृतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०स० प्रस्थादूर्ध्वं तु मानं स्याद्द्विगुणं तु द्रवार्द्रयोः ॥१७॥ द्विगुणं न भवेन्मानं तुलायामपि कर्हिचित् ॥ मृत्तिका
१४ काष्ठलोहादेर्यत्पात्रं चतुरंगुलं ॥ उत्सेधं वापि विस्तीर्णं तन्मानं कुडवं भवेत् ॥ इति मागधपरिभाषा ॥ मंदस
स्वाग्निमात्राणां पुंसां योगस्य सिद्धये ॥ हितं कालिंगमानं तु यथावदभिधीयते ॥१९॥ अथ कलिंगपरिभाषा
गौरसर्षपकैः प्रोक्तो यवो द्वादशभिर्बुधैः ॥ गुंजा यवद्वयेन स्यान्निःपादस्यात्त्रिगुंजकः ॥२०॥ वल्लः सए
दगदितो माषः स्याद्दष्टगुंजकः ॥ सप्तगुंजोपि वा माषस्तैश्चतुर्भिस्तु शाणकः ॥ निष्कटंकश्च कथितः
शाण एवान्यमान्यकः ॥ दशमाषस्तु कर्षस्यात्स च कर्षचतुष्टयं ॥२१॥ पलैश्चतुर्भिः कुडवं अन्यत्सर्व
मिहादिशेत् ॥ इति कलिंगपरिभाषा ॥ नवमेव सदा ग्राह्यं द्रव्यं भेषजकर्मणि ॥ विना मध्वाज धान्या
क विडंग गुड पिप्पली ॥ शुष्कमेव सदा योज्यं द्रव्यं सकलकर्मसु ॥२४॥ ग्राह्यं तु द्विगुणं मानाद्रार्द्रमौषधक
र्मणि ॥ शतावरी गडूची च शतपुष्पा प्रसारिणी ॥२५॥ वासा कुटजकूष्मांड सहदेव्यश्वगंधिका ॥ नि

१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यमाद्रूप्रयो त्कथ्यामानतोद्विगुणा न हि ॥ २६ ॥ कालेनूक्तो प्रभा नं स्यात् मूलमंगा विवेचने ॥ साम्यं भागा
निरूक्तौ तु मन्मथं पात्रसंशये ॥ एकस्मिन्नपि प्रयोगे ह्यौषधं द्विर्निगद्यते ॥ तत्प्रमाणात्प्रयोक्तव्यं द्विगुणं
तु चिकित्सकैः ॥ २८ ॥ वर्षाद्रूर्ध्वं भवेद्वीर्यहीनं केवलमौषधं ॥ चूर्णं मासद्वयादूर्ध्वं गुणहीनं प्रजापते ॥ २९
स्यात्तोन्व गुटिकालेहो वर्षो संवत्सरात्परं ॥ स्नेहाः संपूर्णवीर्याः स्युरूर्ध्वं मासचतुष्टयात् ॥ ३० ॥ वीर्यहीनं भवे
त्पक्वं घृतं संवत्सरात्परं ॥ तैलं गुणप्रदं पक्वमपक्वं वा चिरस्थितं ॥ ३१ ॥ औषध्यो ब्दात्परं हीनवीर्याः स्यु
र्गाधवावहाः ॥ आसवास्यु गुणोत्कृष्टा पुराणा धातवो रसाः ॥ ३२ ॥ गुणप्रोक्तमपि त्याज्यमौषधं यन्न युज्य
ते ॥ रोगेनुक्तमपि ग्राह्यं यद्युक्तं तत्र दृश्यते ॥ ३३ ॥ आदित्यवासरे श्रेष्ठ दिने मौनी समाहितः ॥ नमस्कृत्य शि
वं भक्त्या प्राङ्मुखः शुद्धभूमिजं ॥ ३४ ॥ उद्धरेदौषधं धीमान् प्रागुत्तर संस्थितं ॥ श्मशान श्वभ्र वल्मीक मा
र्गकुत्सित देशतः ॥ ३५ ॥ हिमवद्विक्रुमि व्याप्ता नौषध्यः कार्यसिद्धिदाः ॥ प्राणानुनिजानपातुमुपात्तयं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० नोगृह्य यथोक्तानि च भेषजानि ॥ हिंसाभवेन्नत्र यथा न जंतोस्तथा सुधीः सर्वमुपाददीत ॥ ३६ ॥ आर्द्रद्रव्याणि मृ
२९ ला दियानि यत्रोपयुज्यते ॥ तावदेव भवेद्ग्राह्यं मल्लुछेदेन शोभनं ॥ ३७ ॥ गृण्हीयाद्दोषधं वेधः सरसं कर्मसि
द्धये ॥ शरत्सु सर्वकार्यार्थं यतो वीर्याधिकं तदा ॥ ३८ ॥ स्थूलानि यानि मृदूनि तथानि कठिनानि च ॥ ग्राह्या
स्तेषां त्वचो न्यानि कृत्स्नान्येव समाचरेत् ॥ ३९ ॥ निंबादेर्वल्कलं ग्राह्यं फलं तु त्रिफलादितः ॥ पटोलादेश्च पत्रा
णि मारोबे बीजकादितः ॥ ४० ॥ अथ दशौषधं लिख्यते ॥ रसः कषायः फांटश्च हिमकल्कश्च चूर्णकं ॥ अ
वलेहो वटश्चैह संधानं दशौषधं ॥ ४१ ॥ पिष्टाद्द्रव्य निश्चूतो द्रवः स्वरसमुच्यते ॥ निर्यासः सुरश्चैत्रिमा
त्रा तस्य पल्लार्द्धकं ॥ ४२ ॥ यस्याद्रस्य रसो न स्यात् तत्पिष्ट्वा तुल्यवारिणा ॥ क्षिप्त्वा पर्युषितं कृत्वा रसो ग्राह्य
स्ततो बुधैः ॥ ४३ ॥ अंभस्यष्टगुणे शुष्कं द्रव्यं संसाधयेत्ततः ॥ पादशेषे जले ग्राह्यं स्वरसानामसंभवे ॥ ४४
लेपोद्व्यंगुलमात्रः स्याज्जंबुपत्रादिवेष्टितः ॥ षडंगुलसमः कार्यः पुटपाकविधौ बुधैः ॥ ४५ ॥ लेपस्या

९१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गारवर्णत्वे यातेनिःसाम्यमुन्मितः॥ रसंनिःपीडयेत्तस्मात्पुटपाकरसस्मृतः॥४६॥ स्वरसस्याग्निसि
द्धस्यनिशिपर्युषितस्यवा॥ पलमेकं प्रयुंजीत द्रवत्वात्पूर्ववत्तयोः॥४७॥ क्षौद्रं सितागुडक्षारोजीरकंल
वणंतथा॥ चूर्णघृततैलादिकोलमात्रं रसे संक्षिपेत्॥४८॥ तंडुलानष्टगुणिते कंडितान्क्षालयेज्जले॥ तत्तं
डुलजलंग्राह्यं योज्यंपत्ररिवलकर्मसु॥४९॥ इतितंडुलजलं॥ द्रव्यचूर्णजलेसाध्यं द्रव्यात्षोडशमात्रके॥ अष्ट
मांशंजलंग्राह्यं सक्वाथःस्मृतसूचितः॥५०॥ शृतःकषायोनिर्यूहःतस्यमात्रापलद्वयं॥ चतुःपलमपीत्येके
सेपंतत्रबलाबलं॥५१॥ मृदौचतुर्गुणंदेयं द्रव्येतुकठिनेपुनः॥ जलमष्टगुणंचातिकठिनेषोडशांशकं॥५२
अनुक्तौप्रमाणस्यामृद्वादिद्रव्यसंहतौ॥ जलमष्टगुणंदेयं अयंसाधारणोविधिः॥५३॥ चतुःषष्टिगुणेनी
रेक्वाथ्यद्रव्यंतुसाधयेत्॥ चतुर्थांशंजलंग्राह्यं शस्तंवमनकर्मणि॥५४॥ क्वाथेसितांवातथापित्तेश्लेष्मसुप्र
क्षिपेद्भिषक्॥ चतुर्थाष्टमभागाभ्यांषोडशांशेनचक्रमात्॥५५॥ लवणंजीरकंक्षारं गुग्गुलुंचशिलाजितुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सू०
६

हिंगुत्रिकटुकं क्वाथे प्रक्षिपेत् शाणमात्रकं ॥ ५६ ॥ घनं तैलं जलं क्षीरं माईकं मूत्रकादिकं ॥ चूर्णके कीदिकं क्वाथे कर्षमात्रं तु निक्षिपेत् ॥ ५७ ॥ इति कषाय ॥ क्षुण्णद्रव्यपलं वारि क्षिपेदुष्णं चतुर्गुणं ॥ मृत्पात्रे श्रावयेद्रस्तात् फांटश्चूर्णद्रवो पि सः ॥ ५८ ॥ सितामाक्षो गुडादीनि प्रक्षिपेत् क्वाथवत्सुधीः ॥ फांटः ॥ द्रव्यचूर्णपलं क्षिप्त्वा शीतं भासि चतुर्गुणे ॥ ५९ ॥ मृत्पात्रे मथयेत् यो को मंथस्तद्द्विपलं पिबेत् ॥ सूक्ष्मचूर्णपलं नीरे षड्गुणे च निशोषितं ॥ ६० ॥ हिमः शीतकषायः स्यात् मानं फांटवदिष्यते ॥ इति हिमः ॥ आर्द्रद्रव्यं शिलापिष्टं सतोयं शुष्कमेव च ॥ ६१ ॥ कल्कः प्रक्षेपकावापास्तेषु मानं तु कार्षिकं ॥ कल्के मधु घृतं देयं द्विगुणं तस्य मात्रया ॥ ६२ ॥ सितां गुडं समं दद्यात् द्रवा देयाश्चतुर्गुणाः ॥ संशुष्कं यत् शिलापिष्टं द्रव्यं वस्त्रावगालितं ॥ ६३ ॥ तच्चूर्णमुच्यते सोद्रो रजो मात्रा स्यात् कर्षकः ॥ गुडस्तुल्यः सिता चूर्णे द्विगुणो दीयते बुधैः ॥ भर्जं हिंगु प्रदातव्यं अन्यथा क्लेदकारकं ॥ द्रवैः सर्वैर्लिहेच्चूर्णं घृताद्यैर्द्विगुणोन्मितैः ॥ ६४ ॥ चतुर्गुणैः पिबेच्चूर्णं मात्रो आनि द्रवैः

१६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सद्य ॥ टिका चूर्णलेहानां कल्कस्याप्यनुमानकं ॥६६॥ कफे वाते च पित्ते स्यादेकद्वित्रिपलैर्मितां ॥ नैव द्विं
दुर्यं प्य माच्छादयति वेगतः ॥ अनुपानात्तथा देहे भेषजं परिसर्पति ॥ रसेन भावना चूर्णं सर्वभावो द्वि
तैर्भवे ॥६८॥ भिषग्वराः प्रकुर्वन्ति भावनाभावनाविधिः ॥ पुनः पाकात्कषायादेर्घनत्वं सारसक्रिया ॥
६९॥ वले हश्च लेहश्च मात्रा तस्य पलं मतं ॥ द्विगुणोत्र गुडो देयः सितादद्याच्चतुर्गुणां ॥७०॥ चतुर्गुणो द्र
वोपि देयः साधारणो विधिः ॥ तंतुमत्त्वं भवेत्पाके तथा नीरे निमज्जनं ॥७१॥ गंधवर्णोद्भवो नीरसो मुद्रा
चपी ॥ पंचमूलकषायस्य क्षारमिश्रस्य साध्यपि ॥७२॥ यथायोगं तथा रोगमनुपानं प्रशस्यते ॥ चतुर्गुणा
सितं के द्विगुणो वा गुडो भवेत् ॥ गुग्गुलोस्तु समं चूर्णं क्षिप्त्वा कुर्यात्ततो वटीः ॥ मोदको वटको वर्तिर्गु
डः पि वकथ्यते ॥७४॥ लेहपाकविधानेन गुटिकापाकमुच्यते ॥ मात्रा कर्षो भवेत्तस्य यथाबलमपीष्यते ॥
७५॥ स्कोस्नेहसतो द्रव्यं दद्याद्वारि चतुर्गुणं ॥ पादशेषं जलं ग्राह्यं स्नेहतैलेन साधयेत् ॥७६॥ पश्चाद्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ स॰ १ त्रिगुणं कल्कं स्नेहे क्षिप्त्वा तु साधयेत्॥ स्नेहः सिद्धो भवेत्तस्य मात्रा प्रोक्ता पलोन्मिता॥७७॥ मृदौ चतुर्गुणं दे
१७ यं द्रव्ये तु कठिने पुनः॥ जलमष्टगुणं चाति कठिने षोडशांशकं॥७८॥ अनुक्ते तु प्रमाणस्य मृद्वादिद्रव्यसंह
तौ॥ जलमष्टगुणं देयमयं साधारणो विधिः॥७९॥ अंबुक्वाथरसैर्यत्र स्नेहः साध्यः पृथग्भवेत्॥ प्रदद्यात्त
त्र कल्कांशं चतुर्थं षष्ठमष्टमं॥८०॥ दधिमस्तुरसैः क्षीरैर्यत्र स्नेहस्य साधनं॥ तत्र स्नेहाष्टमांशः स्यात्कल्
कल्को वारि चतुर्गुणं॥८१॥ पंचाधिकानि यत्र स्युर्द्रवाणि स्नेहसाधने॥ स्नेहतुल्यानि तत्र स्युरन्यथाथार्य
थोदितं॥८२॥ विना कल्केन कषायेण स्नेहपाको प्रदोच्यते॥ क्वाथद्रव्यस्य कल्को वा तत्र स्नेहे प्रयुज्यते॥८३॥
स्नेहकल्कस्य वर्तिः स्यात् यदा संमर्दितस्य तु॥ शब्दमग्नौ न कुर्याच्च स्नेहः सिद्धस्तदा भवेत्॥८४॥ फेनोद्गमे
न तैलस्य फेनाभावेन सर्पिषां॥ गंधवर्णरसोत्पत्तौ सिद्धं स्नेहं विनिर्दिशेत्॥८५॥ अंगुलीभ्यां न गृह्णाति वर्त्ति
तो वर्तिः सिद्धवेत्॥ स्नेहकल्कस्तदा स्नेहं सिद्धपाकं विनिर्दिशेत्॥८६॥ मधुर्नेस्य मध्यमो घपाने बस्तौ च श
१८

33

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यते अभ्यंगे च खरस्नेहो होमध्यपाके स्तपो वरः ॥ किट्टतुल्ये मृदुः कल्के मध्यमो मदनोपमं ॥ खरः कृष्णे
म घ ने तु घृति स्नेह उच्यते ॥ ८७ ॥ अवलेहं तथा स्नेहमेकेनाह्नान साधयेत् ॥ न शोषितानां प्रकुर्वीत त्रिगुणो
त्कर्षं ततो भवेत् ॥ ८९ ॥ चिरकालोषितं द्रव्यं द्वैवसं धानमुच्यते ॥ गंधवीर्यरसाकार विकारं समुपागतं ॥ ९०
अरि ष्ट श्रमु खे भेदैर्भिन्नं तद्रेषजोचि ॥ धान्यद्राक्षागुडादिभ्य स्त्वासुनं बहुधा भवेत् ॥ ९१ ॥ इति श्री माथु
र का स्थ श्री लक्ष्मणोत्सवे ग्रंथे परि षाकल्पनं नाम पंचमोऽध्यासः ॥ ५ ॥ अथ धातुशोधनं ॥ स्वर्णं रूप्यं
ता म्र रीरी नागं वंगं च तीक्ष्णकं ॥ विशेष धातवः सप्तान् यथावद्विधिशोधयेत् ॥ १ ॥ स्वर्णरौप्यारताम्राणां च र
क्तो पत्राणि तापयेत् ॥ निषिंचेन् सप्त तानि तक्रे तैले तु कांजिके ॥ २ ॥ कुलत्थानां कषाये च गोमूत्रे च त्रिधा
त्रिधा ॥ एवं हेमादिधातूनां विशुद्धिर्जायते ध्रुवं ॥ ३ ॥ प्रतप्तौ नागवंगौ च गालितौ तैर्निषेचयेत् ॥ त्रिधा त्रिधा
द्वि भवेच्छुद्धं रवेदुग्धेन च त्रिधा ॥ ४ ॥ अथ धातुविधेः स्वर्णमारणं ॥ स्वर्णस्य द्विगुणं सूतं सहाम्लेन विमर्दयेत्

34

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुं० रस० तमे [illegible] समं गंधं प्रदद्यात्तु तरोत्तरं ॥५॥ शरावसंपुटे गाढं सन्निरुध्यात्र गोलकं ॥ चतुर्दशपुटान् दद्यात् त्रिंश

१८ द्वन्मे [illegible] बुधः ॥ ६ ॥ गंधं दद्यात्त्रिपुटं निरुत्थं भस्म तद्भवेत् ॥ अथापरप्रकारः ॥ सुवर्णे गलिते सीसं प्रक्षिपे

त्षे [illegible] शकं ॥ अम्लेन मर्दयित्वा च कृत्वा तस्य च गोलकं ॥ ७ ॥ गंधकं गोलकसमं विनिक्षिप्याधरोत्तरं ॥ श

राव [illegible] टे कृत्वा सन्निरुध्य प्रतापयेत् ॥ ८ ॥ त्रिंशद्वनोपलैरग्नौ समस्थैवं मृतं भवेत् ॥ इति सुवर्णमारणं ॥ अ

थरू [illegible] रणं ॥ अम्लेन मर्दयेत्तालं मा माईं त्रिगुणस्य च ॥ हरितालेन पत्राणि रूप्यस्य परिलेपयेत् ॥ ९ ॥ मू

षा [illegible] संरुध्यात् पत्रे त्रिंशद्वनोपलैः ॥ समुद्धृत्य पुनर्दत्वा तालं गूढ पुटे पचेत् ॥ १० ॥ चतुर्दशपुटैरेवं तारं

भस्म [illegible] त्यवं ॥ अथापरप्रकारः ॥ पिष्टं मेरुदुग्धेन माक्षिकं तेन लेपयेत् ॥ ११ ॥ रूप्यपत्राणि ता[illegible]स्य

प्रका [illegible] पुनः पुनः ॥ पचेच्चतुर्दशपुटैस्तारं भस्म यतो भवेत् ॥ १२ ॥ इति तारभस्मीकरणं ॥ अथ ताम्रभस्मी

करणं [illegible] विधाय ताम्रपत्राणि सूक्ष्माणि स्वेदयेद्भिषक् ॥ अम्लेनात्र दिनं यावत् ततः स्वल्पं विनिक्षिपेत् ॥ सू

१८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं च तुर्यभागं तु दत्वाम्लेन विमर्दयेत् ॥ १४ ॥ पत्राणि याममात्रं तु ततउक्षस्य गंधकं ॥ अम्लघृष्टं प्रकुर्वीत तद्वि
गुणेन विलेपयेत् ॥ १५ ॥ गंधकेन तु पत्राणि ततः कुर्याच्च गोलकं ॥ पिष्ट्वा तत्र श्ववांगेरी मीनाक्षी वा पुनर्नवा ॥
१६ ॥ लेपयेत्तेन कल्केन गोलमंगुलमुन्मितं ॥ भांडे धृत्वा च तद्गोलं शरावेण निरोधयेत् ॥ १७ ॥ लवणेन भूतिभि
र्वाथ वालुकाभिः प्रपूरयेत् ॥ मुखे मुद्रां च पत्रस्य दत्वा चूर्ण्यां विपाचयेत् ॥ १८ ॥ चतुर्यामानवच्छिन्नम दुजा
ले भवन्हिना ॥ स्वांगशीतलमादाय घर्षयेत्सूरणद्रवैः ॥ १९ ॥ दिनमेकं ततः कृत्वा गोलं गंधेन लेपयेत् ॥ स
धेन तेन ततो मूषापुटे गजपुटे पचेत् ॥ २० ॥ स्वांगशीतं समुद्धृत्वा मृतं ताम्रं शुभं भवेत् ॥ इति ताम्रमारणं ॥ अ
थारमारणं ॥ दुग्धेनार्कस्य संघृष्य गंधं तेन विलेपयेत् ॥ तुल्येनारस्य पत्राणि संशोध्याम्लरसैः पुनः ॥ मूषा
पुटे निधायाथ पचेद्गजपुटेन च ॥ आरं पुटद्वयेनैव भस्मसंजायते ध्रुवं ॥ २२ ॥ अथ कांस्यमारणं ॥ कांस्यमप्या
रवद्भस्म प्रकुर्याद्विधिनामुना ॥ अर्कक्षीरवदाज्यं स्यात् दुग्धं निर्गुंडिकापि च ॥ २३ ॥ ताम्ररीतिध्वनिवधे तु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र०क्ष्मु० स्यगंधकयोगतः॥ इति कांस्यमारणं॥ अथ नागमारणं॥ नागवत्क्षीररसैः पिष्ट्वा शिलां लिप्त्वा पुनः पुनः॥ द्वा
१९ त्रिंशद्भिः पुटैः पक्वो नागो भस्मत्वमाप्नुयात्॥ अथापरो नागविधिः॥ चिंचाश्वत्थत्वचोश्चूर्णं चतुर्थांशं विनि
क्षिपेत्॥२५॥ मद्राजने द्रुते नागे लोहदर्व्यास्य चालयेत्॥ यामैकेन तु भस्म स्यात् समं तेन मनःशिला॥२६॥ द्र
वं पिष्ट्वारनालेन पचेद्दृढपुटेन च॥ पेषयेत्स नागशीतेन तु काञ्जिकेन शिलाजले॥२७॥ शरावाभ्यां पचेद्भूयः
एवं षष्टिपुटावधिः॥ इति नागमारणं॥ अथ वंगमारणं॥ मद्राजने द्रुते वंगे पिप्पलाम्लीत्वचोरजः॥२८॥
क्षिप्त्वा तस्य चतुर्थांशं लोहदर्व्या प्रचालयेत्॥ यावत्यामद्वयं वंगो भस्म संजायते ध्रुवं॥२९॥ ततस्तु स्यंहरिता
लं च प्रक्षिप्याम्लेन घर्षयेत्॥ पश्चाद्गजपुटे पक्त्वा पुनरम्लेन घर्षयेत्॥३०॥ यामैकं दशमांसेन पश्चाज्जाले
न वै पुनः॥ पुटैरेवं चतुर्दशभिर्वंगो भस्म प्रजायते॥३१॥ इति वंगमारणं॥ अथ लोहमारणं॥ विशुद्धायो भ
वं चूर्णं पातालगरुडीरसैः॥ संमर्द्य च पचेदग्नौ कुर्यादेवं पुटत्रयं॥३२॥ कुमार्यश्च रसैः कुर्यात्ततः सम्यक्पु

१९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द ॥ पुटषट्कं ततः कुर्यात् कुठारछिन्नकारसैः ॥ २२ ॥ लोहचूर्णं भवेदेवं मम तेनमवौषधोचितं ॥ अथापरो वि
धि लोहचूर्णद्वादशांशं क्षिप्त्वा हिंगुलकं द्रवैः ॥ २३ ॥ कुमार्या मर्दयेत्सम्यग्यामयुग्मं ततः पुटेत् ॥ इत्थं सप्त
पु लोहचूर्णभस्म भवेद्ध्रुवं ॥ २४ ॥ तत्न्येन वार्कदुग्धेन पातालगरुडीरसैः ॥ रसैः कुठारछिन्नायाः लोह
से भवेन्मतिः ॥ २५ ॥ द्विगुणं पारदाद्गंधं क्षिप्त्वा कुर्याच्च कज्जलीं ॥ अयश्चूर्णसमं ताभ्यां कुमार्या मर्दयेद्
से ॥ २६ ॥ या मार्द्दीनातपे भूयो धान्यराशौ विनिक्षिपेत् ॥ शरावमुद्रितं कृत्वा त्रिदिनान्ते समुद्धरेत् ॥ २७ ॥
व त्रेण गालयेत्सिद्धा भवेद्वारितरं सदा ॥ एवं स्वर्णादिलोहानां सर्वेषां मारणं भवेत् ॥ २८ ॥ मनःशिला
गं धकार्कक्षीरार्कैः सर्वधातवः ॥ पुटे द्वादशभिर्यान्ति भस्मतां नात्र संशयः ॥ २९ ॥ इति सप्तधातुमारणं ॥ अ
धं पथानुशोधनमारणाविधिः ॥ यावत्सूतं न शुद्धं न च मृतममृतं मूर्छितं गंधबद्धं नो वज्रं मारितं वा नवग
ग नवधो नोपसर्गाश्च बद्धाः ॥ स्वर्णाद्यं सर्वलोहं विषमपि नमतं तैलपाको न जातस्तावद्देहो कमिदो भक्ष

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र०स० २०

त्रिवसुभुजां मंडलेश्लाघ्ययोग्यः॥ रसरत्नाकरात्॥ पारदं गंधकं तुत्थं हरितालं मनःशिला॥ अभ्रकं
माक्षिकं चैव प्रोक्ताः सप्तोपधातवः॥ ५१॥ काष्ठोदुंबरिकादुग्धैः रसं किंचिद्विमर्दयेत्॥ तद्दुग्धभृष्टहिं
गोश्च मूषायुग्मं प्रकल्पयेत्॥ क्षिप्त्वा तत्संपुटे सूतं तत्र मुद्रां प्रदापयेत्॥ धृत्वा तं गोलके प्राज्ञो मन्मूषासं
पुटे धिके॥ ५३॥ पचेत्समपुटे नैव सूतको याति भस्मतां॥ नागवल्लीरसे घृष्टः कर्कोटीकंदगर्भितः॥ ५४
मन्मूषासंपुटे पक्वः सूतो यात्येव भस्मतां॥ आयुर्वृद्धिं वपुःपुष्टिमारोग्यबलवर्द्धनं॥ बुद्धिदीप्तिप्रकाशं च कु
र्यात्पारदो मृतः॥ ५५॥ वस्त्रेबध्वा तु जेपालं गोमयस्योदके न्यसेत्॥ पाचयेद्यामभात्रं तु जेपालः शुद्धतां व्रजेत्॥
अन्यच्च॥ जेपालं रहितांकुरं तु सुपचेद्यामं रसे माहिषे निक्षिप्तं त्वहमुष्णवारि विमले खल्वे दिनं मर्दनं॥ लिप्तं नू
तनखर्परे च विगतः स्नेहं रजःसंनिभं निंबूकांबु विभावितं च बकुराः शुद्धं गुणाढ्यं भवेत्॥ ५८॥ अथ गंधकशोध
नमाह॥ अयःपात्रे घृतं क्षिप्त्वा वह्निनाऽल्पं प्रतापयेत्॥ आज्येतत्से गंधकस्य चूर्णतुल्यं विनिक्षिपेत्॥ पारदोर

२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सराजश्चरसः तकोहरसंभवः॥रसश्चेतिरसेंद्रस्यप्रोक्तासंज्ञाभिषग्वरैः॥७६॥विज्ञायविद्रुमंगंधंसीरमध्येवि
निक्षिपेत्॥एवंसंशोधितंकृत्वासर्वकर्मसुयोजयेत्॥७७॥पारदंकंचुकोपेतमशुद्धंयोनियोजयेत्॥सवेपः पापमा
प्नोतिरसस्यात्सर्वदोषकृत्॥७८॥मालिन्यविषवन्ह्याख्योखांडुप्योकांचीनचापलं॥कासंर्प्यचेतिरसेंद्रस्यसप्तदो
षान्विशोधयेत्॥८०॥भेदीलघुर्द्वैधांक्षीपटलीपिप्पलीतथा॥अंधकारीद्वदीवेतिसप्तसप्ततस्यकंचुकाः॥८१
कांजिकैः स्वेदयेत्पूर्वंरसराजंदिनत्रयं॥अंकोलत्वग्विबंहंतिपावकोहंतिपावकं॥८२॥कुमारीकंचुकाः सप्तम
लंहंतिवरांकुरः॥त्रिफलायाःकषायश्चकांचमाचीरसस्तथा॥८३॥पृथक्पृथक्दिनैकैकंहंतिदोषान्विमर्दि
तान्॥मूषाद्वयमपामार्गबीजचूर्णैःप्रकल्पयेत्॥८४॥पारदंतत्पुटेकृत्वामलपूर्णरसंयुतं॥एवंशुद्धतरोजा
तः सूतः सर्वौषधोचितः॥८५॥इतिपारदशोधनं॥अथभस्मीकरणं॥द्रोणपुष्पीप्रसूतानिविडंगमरिचेद्वैः
चूर्णमेषामधश्चोर्ध्वंदत्वामुद्रांप्रकल्पयेत्॥८६॥विधायगोलकंसम्यक्मन्मूषासंपुटेपचेत्॥शोषमेसुद्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ०त्त०
२१

तं ह... पचेद्गजपुटैस्ततः ॥ ५७ ॥ पारदो भस्मतां याति कृच्छ्र कुपुटैर्नैकेनमिच्छति ॥ अथ तुत्थकशोधनं ॥ मर्दयेत् विष्ठया
तुत्थं ...रावत्कपोतयोः ॥ दशांशं टंकणं दत्वा ततो लघुपुटे पचेत् ॥ दध्ना पुटं च मधुना दत्वा तुत्थं विशोधयेत् ॥ ५९ ॥
इति तुत्थकशोधनं ॥ अथ हरितालशोधनं ॥ चूर्णं विधाय तालस्य काञ्जिके तु विनिक्षिपेत् ॥ दोलायंत्रेण यामैकं रसैः
कूष्मा...जैस्ततः ॥ याममात्रं पचेत्तैले तिलानां त्रिफलाजले ॥ ६० ॥ याममेकं पचेदेवं यंत्रे यामचतुष्टयं ॥ पचेदेवं
भवे...द्धं तालमौषधसिद्धये ॥ ६१ ॥ इति हरितालशुद्धिः ॥ अथ मनःशिलाशोधनं ॥ अजामूत्रे त्र्यहं पक्त्वा दो
लायंत्रे मनःशिला ॥ तस्मिन्न भावनाः सप्त दत्वा मूत्रेण तापयेत् ॥ नराणां तेन शुद्धा स्यात् ...षजार्थं मनःशिला
६३ इति मनःशिलाशुद्धिः ॥ अथाभ्रकशोधनं ॥ कृष्णाभ्रकं समादाय वन्हौ तीक्ष्णे खरे पचेत् ॥ पृथक्कुपुटं
चा...कृत्वा कृत्वा धान्याभ्रकं ततः ॥ ६४ ॥ अर्कक्षीरैर्दिनेकं खल्वे चक्राकारं च कारयेत् ॥ वेष्टयेदर्कपत्रैश्च सम्य
ग्गजपुटे पचेत् ॥ ६५ ॥ पुनर्मर्द्यं पुनः पाच्यं सप्तवारं प्रयत्नतः ॥ ततो वटजटाक्वाथैर्देयं तद्वत्पुटत्रयं ॥ ६६ ॥ स्त्री

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ०स०
२१

मेघ पचेद्गजपुटेनुतः ॥५७॥ पारदो भस्मतामिच्छन्कुपुटैर्नैकेनगच्छति ॥ अथ तुत्थकशोधनं ॥ मर्द्दयेत्त्रिविष्टया
तुत्थ रावत्तकपोतयोः ॥ दशांशं टंकणं दत्वा ततो मृदुपुटे पचेत् ॥ दध्ना पुटं च मधुना दत्वा तुत्थं विशोधयेत् ॥५९॥
इति तुत्थकशोधनं ॥ अथ हरितालशोधनं ॥ चूर्णं विधाय तालस्य काजिके तु विनिक्षिपेत् ॥ दोलायंत्रेण यामैकं रसैः
कूष्मांडजैस्ततः ॥ याममात्रं पचेत्तैले तिलानां त्रिफलाजले ॥६०॥ याममेकं पचेदेवं यंत्रेण्या मत्र तुष्टयं ॥ पचेदेवं
भवेच्छुद्धं तालमौषधसिद्धये ॥६१॥ इति हरितालशुद्धिः ॥ अथ मनःशिलाशोधनं ॥ अजामूत्रे त्र्यहं पक्त्वा दो
लायंत्रे मनःशिला ॥ तस्मिन्न भावनाः सप्त दत्वा मूत्रे न तापयेत् ॥ नराणां तेन शुद्धा स्याद्दूषणार्थं मनःशिला
॥६२॥ इति मनःशिलाशुद्धिः ॥ अथाभ्रकशोधनं ॥ कृष्णाभ्रकं समादाय पूर्वं होतीक्ष्ण खरे पचेत् ॥ पुनः कुपुटं
चतुः कृत्वा कृत्वा धान्याभ्रकं ततः ॥६३॥ अर्कक्षीरे दिने रवत्वे चक्राकारं च कारयेत् ॥ वेष्टयेदर्कपत्रैश्च सम्य
गजपुटे पचेत् ॥६४॥ पुनर्मर्द्यं पुनःपाच्यं सप्तवारं प्रयत्नतः ॥ ततो वटजटाक्वाथैर्दद्यात्तत्पुटत्रयं ॥६६॥ म्री

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्नेनात्र संदेहो सर्वयोगेषु योजयेत्॥ म्लुगाभ्रेण समं सर्पिः पिबेदायसभाजने॥६७॥ जीर्णसर्पिस्तदभ्रं तु सर्व
कर्मसु योजयेत्॥ इत्यभ्रकशोधनं॥ अथ स्वर्णमाक्षिकशोधनं॥ माक्षिकस्य त्रयो भागा भागैकं सैंधवस्य च॥
६८॥ बीजपूरभवैर्वा नीरैर्जंबीरैर्वा रसैः पचेत्॥ चाल्यमायसपात्रे पात्र्यावत्स्याल्लोहितं॥ भवेदेवं विशुद्धं तु स्व
र्णमाक्षिकमुच्यते॥ अथ शिलाजतुशुद्धिः॥ गोक्षीरे त्रिफलाक्वाथे भृंगद्रवे तथा॥७०॥ मर्दितं ग्राहयेत्पा
त्रे दिनैकैकं शिलाजितु॥ आतपे स्थापितं ग्रीष्मे ततः शुद्धिमवाप्नुयात्॥७१॥ अथापरः प्रकारः॥ नीलाशि
लाजतु श्रेष्ठं ग्रीष्मतप्तशिलास्नुतः॥ सूक्ष्मखंडं तु तत्कृत्वा प्रक्षिपेदुष्णवारिणा॥७२॥ यामैकं स्थापयेत्पश्चान्म
नतः संमर्दयेत्सुधीः॥ वस्त्रेणागालितं नीरं मृत्पात्रे तं निधारयेत्॥७३॥ अधःस्थितं जले न भ्यो मर्दयित्वा शि
लाजितु॥ वस्त्रेण गालितं ग्राह्यं तोयमेवं पुनःपुनः॥ यावन्निःशेषतां याति तत्सतो मे शिलाजतु॥ तन्नीरं स्थाप
येत्पश्चान्मृद्धर्मे घनं नयेत्॥७४॥ एवं शुद्धं भवेद्देहे लोक्षिप्तं यच्छिगवद्भवेत्॥ धूमो न जायते तस्माद्विशुद्धं वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० शिलाजतु ॥७६॥ इति शिलाजतुशोधनं ॥ अथ मंडूरशोधनं ॥ पुरातनं समादाय किट्टं लोहसमुद्भवं ॥ अक्षां
२२ गारैर्धमेद्दग्धो बिभीतकसमुद्भवैः ॥ काष्टपात्रे गवां मूत्रपूर्णे तत्सप्तधा क्षिपेत् ॥७७॥ चूर्णयित्वा ततः लोहे अथ त्रि
फलायाः कषायकैः ॥ गोमूत्रैश्च पुनः सिक्तं मंडूरं मद्दमादिशेत् ॥७८॥ इति मंडूरशोधनविधिः ॥ इति श्री
माथुर कायस्थ लक्ष्मणोत्सवे ग्रंथे धातु पधातु शुद्धिकथनं नाम षष्टोऽध्यासः ॥६॥ अथ भेषज्यकालो निरूप
णं ॥ प्रातरेवोपयुंजीत भेषजं सर्वदा बुधः ॥ साधारणो विधिस्त्वेषां विशेषस्तु निगद्यते ॥१॥ समयाः पंच विज्ञे
या नृणां भेषधभक्षणे ॥ भास्करस्योदिते जाते दिवसाहारकर्मणि ॥२॥ तथा सायंतनाहारे निशि चापि मुहुर्मुहुः
पित्ते कफे च कुपिते विरेकाय प्रशस्यते ॥३॥ वमनाय च भैषज्यं प्रभाते रेचनाय च ॥ मध्याह्ने भोजनस्यादौ ग्रा
से रूक्षैकरैः सह ॥४॥ अरुचौ भेषजं ग्राह्यं रसव्यंजनसंयुतं ॥ आहारे चाई संभुक्ते भेषजं ग्राहयेद्विपकू ॥
५॥ समानमारुतोद्रेके मंदाग्नौ चाग्निदीपनं ॥ व्यानोद्रेके च भैषज्यं भोजनांते समाचरेत् ॥६॥ कंपाक्षेपक
२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हि कासश्वा गार्ते चौषधं भुंजे ॥ सायं भुक्ते प्रतिग्रासमुद्गारे कुपिते निले ॥ ७ ॥ आहारभेषजं मात्रः स्वरभंगा
दि कारिणि ॥ कुद्धे प्रायेपि साध्यस्य भोजनांते प्रशस्यते ॥ ८ ॥ औषधं प्रायशो वैद्यैः प्राणस्तास्थकरं परं ॥ छिकाउ
द्गितृषाश्वासगरेषु च मुहुर्मुहुः ॥ ९ ॥ अनेन सहितं ग्राह्यं भेषजं सर्वदा बुधैः ॥ पाचने शमने चाद्यं मत्रुशोधव भेषजं
१० ॥ विनान्नं निशितं ग्राह्यं ग्रहणं प्रत्यलेखनं ॥ औषधग्रहणे चैव पंचकालाः प्रकीर्तिताः ॥ ११ ॥ प्रातः काले भवे
च्छ्रेष्ठ स्तेषु साधारणो यतः ॥ एकमासस्य बालस्य देया भेषजरक्तिका ॥ १२ ॥ एकैके वर्षे वृद्ध्या मासिताभिः संग
योजिता ॥ एकैकां वर्द्धयेत्तावत्यावत्संवत्सरो भवेत् ॥ १३ ॥ एकैकमाषवृद्धिः स्याद्यावत्षोडशवत्सरा ॥ मात्रा
स्थिरा भवेदूर्ध्वं यावत्स्याद्वर्षसप्ततिः ॥ १४ ॥ ऊर्ध्वं च सप्ततेर्मात्रा हेया मासैः शनैः शनैः ॥ नियमो नास्ति मा
त्राया देशकालं वयो बलं ॥ रोगमग्निं भेषजं च ज्ञात्वा मात्रां प्रकल्पयेत् ॥ अभ्यंगस्वेदनस्नानं अंजनं चानुले
पनं ॥ १६ ॥ वमनं प्रतिकर्मापि जन्मारभ्य प्रशस्यते ॥ पंचमासात्संशास्त्रः कवलः कर्मवाष्टकात् ॥ १७ ॥ रेच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध०सा०
२३

नं [...] गारदृष्टान् मैथुनं विशानेः परं ॥ जीर्णाहारे प्रदातव्यं भेषजं सर्वदा बुधैः ॥१८॥ भोजनं चापि दातव्यं जीर्णे

ए[...] वर्जे ॥ अजीर्णे भेषजं भुक्तमपि रोगकरं द्वयं ॥१९॥ रसो गुणोथ वीर्यं च विपाकः शक्तिरेव च ॥ पंचाव

स्था[...] मादेनाः द्रव्याणां चान्ययोगजाः ॥२०॥ मधुरोम्लश्च लवणः कटुतिक्तकषायकः ॥ नानाद्रव्यं समाश्रि

त्य[...] षकटुसाद्रसे ॥२१॥ भूपयोग्नि धराकाशि तेजोभिर्मानिलैः क्रमात् ॥ अग्निवायु महीवातै रसास्तु भूति

मु[...] ः ॥२२॥ आयुष्यो वातपित्तघ्नो धातूनां बलवर्द्धनः ॥ गुरुस्निग्धो हिमो वृष्यः प्रीतिदो मधुरो रसः ॥

२[...] त्यर्थं सेवितः कुर्यात् मेदो वृद्धिं कफामयान् ॥ स्पैकेसाग्निमांद्यमेहादीनपकोज्वरकृद्रसः ॥ २४

अ[...] ग्निकरः स्निग्धो रोचनः पाचनः स्मृतः ॥ वायुदोषहरो हृद्यो नात्यर्थं सेवितो हितः ॥ अम्लोतिसेवि

तः [...] द्विदाहं तिमिरं भ्रमं ॥ कुष्टप्रमेहवीसर्पशोफपांडुकफामयान् ॥२६॥ अग्निकृत्तेवदनेतीक्ष्णो भेजनो

रो[...] तथा ॥ छेदनस्तंभसंधानद्रावणो लवणो रसः ॥२७॥ सोष्मभ्यस्तो बलं हंति करोति पलितं वली ॥ तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कुष्ठविषछर्दिविसर्पानिलजानामयान् ॥२८॥ तिक्तः पित्तज्वरोत्क्लेदकुष्ठदाहकफान्जयेत् ॥ तस्मात्मूर्छावि
बंहति क्रिमिहृद्वह्निवर्द्धनः ॥२९॥ रसो हिमो लघुमेध्यस्तन्यकंठप्रसादनः ॥ सोत्यर्थं सेवितः कुर्यात्तगात्रधातूपशो
षणं ॥३०॥ कटुरग्निकरो रूक्षः पाचनो घ्राणशोधनः ॥ व्रणावसादनः कुष्ठकफकंठामयापहः ॥३१॥ छेदनो वात
बंधघ्नो मेदः श्रोतःप्रसादनः ॥ तथा माकुंचनं कंपकटिपृष्ठादिषु व्यथां ॥३२॥ कषायः कफपित्तघ्नः स्तंभनो मेदोवि
शोषणः ॥ आमसंस्तंभनो रूक्षो ग्राहकस्त्वक्प्रसादनः ॥३३॥ कटुरत्यासेवितः कुर्यान्मूर्छां शुक्रबलक्षयं ॥ सोत्य
र्थं शीतलः कुर्यात् श्रोतोरोधं मलग्रहं ॥३४॥ विष्टंभं पोरुषभ्रंशानद्ध्काश्यध्मानकृतरुजः ॥ सामान्येनात्र
निर्दिष्टा गुणाः षड्रससंभवाः ॥३५॥ रसानां योगतोपि स्याद्द्रव्ये एव गुणोदयः ॥ संयोगात्तु विषतां याति स
माज्येन माक्षिकं ॥३६॥ अमृतत्वं विषं याति विषदष्टस्य वै यथा ॥ प्रायः कफकरं स्वादु पुराणं सुसितां वि
ना ॥३७॥ क्षौद्रशालियवान्मुद्गान्गोधूमांश्च पुरातनान् ॥ आम्लं पित्तकरं प्रायो विनाधात्रीं च दाडिमान् ॥३८॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु०स० ल[…]णं प्रायशो दृष्टा नेत्र्यो सैंधवं विना ॥ प्रायस्तिक्तं कटु भवेदरुच्यं वासकोपलं ॥ ७९ ॥ विना मृतापटोलाभ्यां
२५ कु[…]ना सुंठीरसोनकैः ॥ भूयिष्ठं पित्तजननं प्राक्तं कषायं तु शिवां विना ॥ ८० ॥ इति रसनिरूपणं ॥ लघुः सरश्च तीक्ष्णश्च
स्नि[…]धश्चैव गुरुर्मतः ॥ इति साधारणाः प्रोक्ताः गुणा द्रव्यसमुद्भवाः ॥ ८१ ॥ वीर्यमोष्णं च शीतं च द्विविधं प्र
मु[…]ते ॥ स्वभावाद्वा रसोत्कर्षात्संयोगाद्वा यथोचितं ॥ ८२ ॥ इति वीर्यं ॥ मधुरो लवणः प्रायो माधुर्यं नैव प
च्य[…]ते ॥ कटुस्तिक्तकषायश्च रसे पाकः कटुर्भवेत् ॥ ८३ ॥ इति रसविपाकः ॥ कफो विपाको मधुरः पित्तमम्ल
वि[…]पाकतः ॥ कटुपाकाद्भवेद्वायुरित्थं पाकस्त्रिधा भवेत् ॥ ८४ ॥ प्रभाववत्तु यथा धात्री पनसस्वरसादिभिः
तु[…]ल्यापि सर्वरोगाणां विनाशं कुरुते ध्रुवं ॥ ८५ ॥ कार्यं कुर्यात्किंचिदन्यं प्रभावादेव केवलं ॥ शिरोवृद्ध्या यथा
हंति सह देवी ज्वराज्वरं ॥ ८६ ॥ इति शक्तिकथनं ॥ शक्तिर्विपाको वीर्यं च गुणाश्चैव रसोऽपि च ॥ कस्मिंश्चिद्व्या
श्रिताः सर्वे स्वस्वकार्यं कुर्वते वै ॥ ८७ ॥ वायुः पित्तं कफश्चैव त्रयो दोषाः प्रकीर्तिताः ॥ वृद्धिसाम्यक्षये

२१

47

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धा लेस्तु प्रत्येकं च पुनस्त्रिः ॥ ४८ ॥ वृद्धिक्षयौ त्रिधोत्कर्षमध्यहीनतया पुनः ॥ तेभ्यापि नो पि वपुषो धोमुख्यो
द्दुःसमाश्रिताः ॥ ४९ ॥ वायुश्चाभेरयोपित्ते हृन्नाभ्योरंतरे स्थितः ॥ कफस्तु हृदयादूर्द्ध्वं प्रायशो वर्त्तते नरो ॥
५० ॥ शुक्रार्त्तवस्थितैर्दोषैः पुत्रायो गर्भसंस्थितो ॥ तिस्रः प्रकृतयो नृणां जायंते स्वस्वलक्षणाः ॥ ५१ ॥
विषेण विषकीटस्य यथा स्याद्विषरूपता ॥ चलचित्तः कृशो रूक्षो वाचालोल्पकेशकं ॥ ५२ ॥ व्योमचा
रीभवेत्स्वप्ने वातप्रकृतिको नरः ॥ अकालपलितो रक्तेरी बुद्धिमानतिकोपनः ॥ ५३ ॥ स्वप्ने स्यात्तेजसां द्रष्टा पित्तप्रकृ
तिको नरः ॥ महाबलः स्निग्धकेशः स्थूलो गंभीरचेतनः ॥ ५४ ॥ स्वप्ने जलाशयं द्रष्टा कफप्रकृतिको नरः ॥ मिश्रि
तैर्लक्षणैर्ज्ञेया मिश्रप्रकृतिनानणां ॥ ५५ ॥ यादृशं हि निदानं स्यात् कार्यं तद्गुणरूपेण ॥ स्वभाव [illegible] सिद्धै [illegible]
ग्यं वपुषो भवेत् ॥ [illegible] व्याधिर्जायते मरणादिकृत् ॥ धातवस्तापोधातवश्च मलाश्चैव प्रकोपिनः ॥ ५७
दूषयंति रसादिस्था दोषाः संप्राप्य कारणं ॥ कटुतिक्तकषायैश्च रूक्षैर्लघ्वन्नभोजनैः ॥ ५८ ॥ व्यायामे मैथुने वै

48

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०सं० गरोधेरोहारवर्जितैः॥ तोयावगाहनेनैर्निशाजागरैरतिसाधनैः॥५९॥ शोकैः पुरोनिलैर्मेघैः वायुर्देहे प्रकुप्य
२५ ति॥ कट्वम्ललवणैस्तीक्ष्णैः क्रोधैरुष्णैर्विदाहिभिः॥६०॥ स्त्रीसंपर्कोपवासैश्च सुरानेत्रातपैरपि॥ भोजनेजी
र्णेतिग्रीष्मशरत्काले दिनार्द्धके॥६१॥ अर्द्धरात्रे च पित्तस्य प्रकोपो जायते नृणां॥ मधुरैर्गुरुभिः शीतैर्भुक्तेनीरा
त्रभोजनैः॥६२॥ लवणैर्दधिभिर्दुग्धैः नैदेदिवसनिद्रया॥ स्निग्धैर्वनाक्रमाषाद्यैर्वसंतसमये तथा॥६३॥
आदौदिने च रात्रौ च कफः संजायते नृणां॥ दोषोद्वयोवा त्रयोदोषा युगपत्स्वस्वहेतुभिः॥६४॥ मिलिते च प्रकु
प्यन्ति कुर्वन्ते रोगसंकरं॥ विरुद्धाहारतो रोगा जायन्ते विषमाशनात्॥६५॥ तथा चाध्यशनान्मिथ्या विहारस्य च
सेवनात्॥ उक्तं विरुद्धं युगपत् पयोमत्स्यादिभोजनं॥६६॥ अकालेबहु चाल्पं वा भोजनं विषमाशनं॥ भुक्त
स्योपरि यद्भुक्तं मध्यशनं स्मृतं॥६७॥ मल्यान्मिथ्याविहारेण भवेत्कामादिसेवनं॥ स्वहेतुभिश्च ना दो
षाकारा पथ्यादिकं पुनः॥६८॥ आप्यकोपं प्रकुर्वन्ति भूत्यनीकाघसंभवेत्॥ निजागंतुकभेदेन रोगाश्च द्विवि

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चशमयत्यपि ॥ विरेकलंघनाद्यैश्च पथ्यैश्चौषधसेवनैः ॥७३॥ आधिः शाम्यति शारीरः प्रतिषिद्धविवर्जनैः ॥ बुद्धि

धामता ॥६९॥ अधिष्ठानं वपुश्चित्तं रोगाणां द्विविधं स्मृतं ॥ औषधं च द्विधा ज्ञेयं शोधनं शमनं तथा ॥७०॥ का-
याधिष्ठानरोगाणां शोधनं भेषजं स्मृतं ॥ कोपनं शाम्यकृत्तद्वच्छमनं च त्रिधोदितं ॥७१॥ विहाय कोपनं द्व्यम-
प्युक्तं सदौषधं ॥ बुद्धिधैर्यात्मविज्ञानविवेकादिर्हि मानसं ॥७२॥ चिंतारोगनिवृत्तिश्च व्याधिं शमयति स्व-
यं ॥ असाध्यो याप्यतां याति याप्यमाप्नोति साध्यतां ॥७४॥ साध्यः शीघ्रं शमं याति पथ्यौषधनिषेवणात् ॥ आ-
दौ याप्यतां साध्यो याप्यो व्याधिरसाध्यतां ॥७६॥ हंति प्राणानसाध्यस्तु नरस्याप्रतिकारिणः ॥ ॥ इति श्री
माथुरकायस्थवंशावतंसामरसिंहात्मजश्रीलक्ष्मणनामग्रथिते श्रीलक्ष्मणोत्सवे ग्रंथे भेषजकालरसादि
दोषचयप्रकोपादिकथनं नाम सप्तमोऽध्यायः ॥७॥ यः स्वप्नेषु नरः पश्येद्रक्तकृष्णाम्बराननान् ॥ कृष्णांश्च
विकृतान्व्यंगान्दंडपाशधरानपि ॥१॥ कुर्वतो भर्त्सनं त्रासं दक्षिणाशां समाश्रितान् ॥ खरोष्ट्रमहिषारूढा
न्पुरुषान्योषितोऽपि वा ॥२॥ स्वस्थः स लभते रोगं रोगी च प्राणसंशयं ॥ उच्चाद्धोपतनं पंकनीरे वाग्नौ वि-

र्ज्ञानविवेकाभ्यां धीमानसं ॥७४॥
स्मृतिर्युक्तिश्च सद्भिः ३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स०
२६

लीयते ॥ ३ ॥ स्वापदैर्वा विहंग्यैर्न मत्स्यैर्वा निगीर्यते ॥ दंशो यस्य विलीयेते दीपः स्वप्ने प्रशाम्यति ॥ ४ ॥ तैलं पि
बेत्तिलं लोहं लभते करीषपतन् ॥ महिषोष्ट्रखरारूढो दक्षिणां वा दिशं व्रजेत् ॥ ५ ॥ स्वस्थः सन् भवेद्रोगी रोगी च
प्राप्नोति पंचताम् ॥ ६ ॥ दुःस्वप्नमिसाहिनवंद्हलकस्यचिद्बुधः ॥ ७ ॥ प्रातः स्नानं विधायादौ दद्यात्स्वर्णमयस्ति
लान् ॥ जपेत्स्तोत्राणि देवानां वसेद्देवालये निशि ॥ ७ ॥ एवं दिनत्रयं कृत्वा दुःस्वप्नेभ्यः प्रमुच्यते ॥ यः
स्वप्ने पुनरः पश्येद्देवान् विप्रान्महीपतीन् ॥ ८ ॥ सुहृदश्च शुभाकारान् गोवृषं वाजिनं गजं ॥ स रोगी मु
च्यते रोगान्निरोगी शुभमाप्नुयात् ॥ ९ ॥ स्वच्छनीराणि तीर्थानि समृद्धं यज्ञपावकं ॥ युद्धे वा तमनं यं दृष्ट्वा
नरः ससुखमाप्नुयात् ॥ १० ॥ वृषाश्वगजसौधाग्रनौशैलाद्रिवनस्पतीन् ॥ आरुह्य स्यात्संरवी रोगी स्व
स्थः सुखमवाप्नुयात् ॥ ११ ॥ शुभ्राणि वस्त्रपुष्पाणि मांसमत्स्यफलानि च ॥ लब्ध्वा भवेत्सुखी रोगी स्व
स्थः श्रियमवाप्नुयात् ॥ १२ ॥ अगम्यागमनं विष्टालेपो मरणरोदने ॥ आममांसाशनं स्वप्ने धनारोग्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विनिर्दिशेत् ॥१३॥ उरगो वृश्चिको भंगो माक्षिक श्वजलौकसः ॥ स्वप्ने दंशान्ति यं नस्य धनारोग्ये विनिर्दिशेत् ॥१४॥ इत्यादिकानुशुभान्स्वप्नान्दृष्ट्वा फलसमृद्धये ॥ स्नात्वा देवान्द्विजातिभ्यो दद्यात्स्वर्णं च भोजनं ॥१५॥ इति स्वप्नकथनं ॥ अथ दूतलक्षणानि ॥ दूतस्य गच्छतो वैद्यमाने तु रोगिणः कृते ॥ प्रदीप्तं शुभदं प्रोक्तं सौम्यं न शकुनं शुभं ॥१६॥ दूतोऽश्वपरयोऽभंगाः शुभ्रलेपांबरः स्रजः ॥ वृषवाजिसमारूढा चारु चेष्टा सुजातयः ॥१७॥ सुखिनः समये प्राप्ता सजीवदिशिमाश्रिताः ॥ उनस्तस्या प्रसन्नास्या रोगिणः सुखहेतवः ॥१८॥ यस्याप्राप्ता नासि ... तिसा नाडी जीवसंयुता ॥ द्विविभागोपितस्यायसजीवः संनिगद्यते ॥१९॥ भंगादं ... युधधराउद्विग्ना रोदुर्दशनाः ॥ जीर्णार्द्रमलिनाशुक्लाः पस ... कांबरास्तथा ॥ रूक्षामंगलौ विकारः स्पृशन्तो नासिकां तनुं ॥ छिंदंति स्तृणकाष्ठानि विलिखंतो वसुंधरां ॥२१॥ तुषांगारकपालास्थिभस्मोपलधराश्च ये ॥ वस्त्राग्रदंतनखरा नासिकाकेशसंस्पृशः ॥२२॥ पंकतैलविलिप्तांगाः काष्ठोपा

स॰
८

नक्षत्राश्रये ॥ दृष्ट्वा मंगलचिन्हानि दधतश्चापराण्यपि ॥ २३ ॥ भानौ मध्यं गते वास्तमायाति वैद्यमुपस्थि
ता: ॥ अनिष्टसूचका प्रोक्ता दूत इत्यादिलक्षणः ॥ २४ ॥ इति दूतलक्षणकथनं ॥ वैद्यस्य गच्छत: कर्तुं चिकि
त्सां रोगिणो भवेत् ॥ शकुनं सिद्धिदं सौम्यं दीप्तं नैव प्रशस्यते ॥ २५ ॥ विप्रपूर्णघटच्छत्रसुमनोनृपगोवृषा:
अलंकृतास्तथा कन्या वेश्या पात्रा सुसिद्धिदा ॥ २६ ॥ मत्स्य: फलं सवत्सा गौ: सपुत्रा कामिनी शुभा ॥ दधि दूर्वा हि
रण्यानि मंगल्यान्यपराणि च ॥ २७ ॥ भवंति दर्शनादेव भिषज: कार्यसिद्धये ॥ वेदध्वनिर्भवेण्णां शंखसिं
हपयोमुचां ॥ २८ ॥ शार्दूलगजाश्वहंसानां ध्वनि: शुभवचो नृणां ॥ कार्यसिद्धिं प्रशंसंति श्रवणादेव देहिन:
२९ ॥ प्रशस्तं दक्षिणाद्वामगमनं श्वशृगालयो: ॥ वामाद्दक्षिणगा: शस्ता न शस्त: सर्पदर्शनं ॥ ३० ॥ शश
स्य दर्शनं निंद्यं इत्यादि शकुनं भिषक् ॥ विचार्यैव चिकित्सां वै कर्तुं यायाच्च रोगिण: ॥ ३१ ॥ इति शकुनक
थनं ॥ अथ कालज्ञानं ॥ अकस्मात् शीतविभ्रंशोऽप्यकस्मादाररूपता ॥ अकस्मात्संनिपातार्तिरकस्मा

२८

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिंद्रियो यः ॥ इत्यादिकमविध्वंयज्जायते तत्तगुणामुखं ॥ शांतं प्रतमव यस्क न संगच्छान्निश्री नवनं ॥ स्नाता
नुलिम पियं सेवंते नीलमसिका ॥ नमोनां ह्रीधुऔ यस्य प्रभातेयः स्मन्निश्चयं ॥ ३५ ॥ अकस्मादेवमुंचंति
नं वदं गतामुखं ॥ उत्पन्नश्रीनपि डिकोवसुनायश्रपीडयते ॥ ३६ ॥ मूढतिं वा स्यजेद्देहो यस्य सक्षीपाजो वि
नं ॥ अरं तिश्कं यस्क विष्मोरपि पदत्रयं ॥ ३६ ॥ नयश्मेत्सगतामु स्याच्चुरीयमान मंडलं ॥ उर्ध्वेष्ठौ इविव
क्षिप्रे माधो ध्वधरः पतेत् ॥ ३७ ॥ अंबुफलाभ्रंदंतो भवेद्धासनजीवति ॥ रसनां धत्ती से पाघ्राणार्थं च
श्रवंति ॥ ३८ ॥ भ्रुवोर्मध्ये पदं विष्णोस्तारकामात मंडलं ॥ भ्रुवलं मस्तकं यस्य नास्यस्थं यो भ्रमाहरेत ॥ ३९
दीपगंध योवेत्ति नास्य मास्यगुणोत्रयं ॥ दंतायस्य विभुष्यंति श्री सकालंतमादिशेत् ॥ ४० ॥ यः समुत्था
प्यमानो मोहमेवप्रपद्यते ॥ दुर्बलो वाबलो पेतस्तं वदंति गतामुखं ॥ ४१ ॥ श्यामा मा स्नायते जिक्का यस्यास्यं
कुंकुम भं ॥ अंगकं पोगति भ्रंशो यदिवा स नजीवति ॥ ४२ ॥ यो अनेकुंडली -- नाभिस्थाहारबंधनात्

54

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० तन तथाहार सर्वेषामतिं प्रजेत्॥४३॥ रश्मिहीनं रवेर्बिंबं पावकं रश्मिमालिनं॥ दृष्ट्वानेकादशाद्
२८ सा जीवति मानवः॥४४॥ वांतो यस्य सरूक्मूत्रं रजतं हेमवा पतेत्॥ प्रत्यक्षं यदि वा स्वप्ने दशमासान्
जीवति॥४५॥ स्वर्णवर्णतरून् पश्येत् गंधर्वनगराणि च॥ पः पिशाचान् तथा प्रेतान् तस्यायुर्नव मासि
कं॥ अकस्माच्च कृशः स्थूलो भवेत् स्थूलोऽथवा कृशः॥ प्रकृतिं च त्यजेत् शीघ्रम् अष्टमासान् स जीवति।
॥ पादयोः पादाग्रयोर्यस्याप्यसमग्रं पदं भवेत्॥ रेणौ वा कर्दमे सप्तमासान्नैव स जीवति॥४८॥ कपोतो
तो गृध्रः काको वा योऽस्य मूर्द्धनि॥ क्रव्यादो वा निलीयेत षण्मासायुः प्रजायते॥४९॥ आप्यते पांशुव
का रूपसैश्च वता अते॥ स्वप्नेषु यो नरस्तस्य मासु मासिच नुश्यात्॥५०॥ विद्युतं दक्षिणस्यां यो दिशि
तु पश्येद्दिना॥ जले चेंद्रधनुर्वापि त्रिमासान् समानव॥ आदर्शे यो घृते तैले जले वा नैव पश्यति
ं वा शिरोहीनं पश्येन्मासं स जीवति॥५२॥ त्वा पयित्वा करं भ्रमो निरुध्यं मध्यमांगुलिं॥ प्रहरेणा

२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवेन्मासैकपर्यन्तं निश्चेष्टो नाभिका ॥५३॥ यस्याभिविलक्रगात्रस्य हृदि नीरं प्रशुष्यति ॥ पिबतोपि जलं शोषः स्या-
द्दशाहं स जीवति ॥५४॥ कर्णयोर्यदि नो शब्दस्तर्जनीभ्यां निरुध्ययोः ॥ जायते श्रामकालस्य लक्षणं तत्समादिशे-
त् ॥५५॥ मध्याह्ने विमले खेरे दिनमणिर्बिंबं जले निर्मले पश्येत्साश्रगतेन रागतवपुः पूर्णं नरा स्याच्छुभं ॥ ही-
नं दक्षिणपश्चिमोत्तरपुरो भागेषु मासक्रमात् षट्त्रिद्व्येकमितेन मीतिर्दशाहेन च्छिद्रं सधूमं क्रमात् ॥५६॥ र-
स्यादिलक्षणे ज्ञात्वा मरणं निकटे स्थितं ॥ आकर्द्य सुखं श्राद्धं धर्ममेव समाचरेत् ॥५७॥ सौम्याकारे द्विपः
श्रोतादि श्रावकान्वितिं दृष्ट्वा ॥ सम्यक्स्पर्शरसं गंधं रोगी रोगात्प्रमुच्यते ॥५८॥ स्वल्पो ज्वरो भवेद्यस्य जिह्वा
भवति कोमला ॥ ओष्ठौ पादौ तथा पाणी स रोगी सुखमाप्नुयात् ॥५९॥ ज्वरस्वेदविहीनः स्यात् कंठः कफविवर्जि-
तः ॥ नासामार्गगतिः प्राणो यस्य रोगी स जीवति ॥६०॥ भवेन्निद्रा सुखं यस्य स्मृतिभ्रंशो न जायते ॥ नाकारवर्ण-
हानिः स्यात् स रोगी जीवति ध्रुवं ॥६१॥ इत्यादिलक्षणैर्वैद्यः साध्यं विज्ञाय रोगिणं ॥ आयुर्वेदोक्तमार्गेण चि-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ॰ ख॰ वि॰ सांसम्यगाच्चरेत् ॥६२॥ इति श्री माथुर कायस्थ वंशे सामरसिंहात्मज ग्रंथे स्व प्रह्लत शकुन काल
२१ ज्ञानादिकथनं नामाऽष्टमोऽध्यायः ॥८॥ अथ नाडी परिक्षा ॥ हस्तांगुष्टस्य मूले या सा नाडी प्राण साक्षिणी
तस्या गतिवशाद्विद्यात् सुखं दुःखं च रोगिणः ॥१॥ वातेऽधिके गतिः कुर्यात् जलौका सर्पयोरिव ॥ पित्ते को
पे तु सा नाडी काक मंडूकयोरिव ॥२॥ हंसस्य च कपोतस्य गतिं पारावतस्य च ॥ नाडी धत्ते त्रिदोषे तु गतिं ति
त्तिर लावयोः ॥३॥ कदाचिन्मंदगा नाडी स्यात् कदाचिच्छीघ्रगा ॥ दोषद्वयोद्भवे रोगे विज्ञेया सा भिषग्व
रैः ॥४॥ रोगिणः प्राणनाशं सा नाडी कथयति ध्रुवं ॥ उष्मा वेगगतिर्नाडी ज्वर कोपे प्रजायते ॥५॥ उद्वे
ग क्रोध कामेषु भय चिंता तोदयोस्तथा ॥ भवेत् क्षीणगतिर्नाडी स्कंधे वैवस्वत मेः ॥६॥ क्षीणधातोश्च मं
दाग्नेर्भवेन्मंदतरा ध्रुवं ॥ गुर्वी शोष्मा च रुधिरपूर्णा नाडी प्रजायते ॥७॥ सामा गुर्वी भवेन्नाडी दीप्तेग्नो
लघुर्वेगिनि ॥ सुस्थिर स्थूलं भवेन्नाडी स्थिरा बलवती तदा ॥८॥ क्षुधार्तस्यापि चपला भाष्यिरा तृप्तस्य सा भवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्॥ नाडीपरीक्षा॥ रौद्ररूपे च धूम्राभे नयने नेत्रचंचले॥ तथाभ्यंतररूक्षाभे भवतो वातरोगिणः॥
१॥ तरोगे लुपीताभे नीले वा रक्तवर्णके॥ सततं भवतो दीपं सहेते नावलोकितं॥१०॥ ज्योतिर्हीने च शुक्लाभे
जन् षीसमीरजे॥ मंदावलोकने नेत्रे भवतः कफकोपतः॥११॥ तन्द्रामोहाकुले श्यामे निर्भुग्ने रूक्षरोहके॥
रक्त नीभवतो नेत्रे दोषत्रयोहितं॥१२॥ दोषत्रये भवेच्चिन्हं नेत्रयोरस्त त्रिदोषजं॥ दोषमच्च प्रकोपतु
भवे षद्वयोहितं॥१३॥ एकदृष्टिर्यदा नेत्रे साधीनेन च रोगिणः॥ उन्मीलितेन भवतः क्षणादेव निमी
ल्पे ॥१४॥ संततोन्मीलिते नेत्रे द्वयं निस्पनिमीलिते॥ वक्रमरूक्षामारेव भ्रमधूम्रोग्रतारके॥१५॥
वर् वर्णेन भयतो विरक्ती तामेकेवर्षेन॥ नेत्रेमस्पंकथयतो रोगिणो नाच संशयः॥१६॥ सौम्यदृष्टिप्रस
नो प्रकृतिस्थे मनोरमे॥ नेत्रेकथयतः शीघ्रं रोगशांतिं तु रोगिणः॥१७॥ इति नेत्रपरीक्षा॥ अथमु
स्व रिक्षा॥ वातकोपे मुखं रूक्षं स्तब्धं वक्रं गतभ्रमं॥ पित्तकोपे भवेद्रक्तं पीतं वा परितमकं॥१८॥ कफ

58

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०त्स० श्वे सुस्निग्धं भवच्छून प्रिवाननं॥ त्रिलक्षणं त्रिदोषे स्यात् द्विचिन्हं तु द्विदोषके॥१८॥ इति मुखपरीक्षा॥
३० अ जिह्वापरीक्षा॥ वातकोपे प्रसुप्ते च स्फुटिता मधुरा भवेत्॥ सन्ध्यावर्णा न हरिता जिह्वा लाला प्रमुंचति॥ पि
त्ते तु रक्ता भाति रक्ता दग्धेव जायते॥ जिह्वा दाहान्विता विद्धा कंटकैरिव सर्वतः॥२०॥ कफकोपे भवेत् जिह्वा
स्थू श्वेता विलेपनी॥ सुस्थूला कर्कटकोपेता क्षारा बहुकफावहा॥२१॥ दोषद्वयात् द्विदोषोत्का लक्षणा रसना
भवे॥ सर्वचिन्हा त्रिदोषे स्यात् विकृतानेकलक्षणा॥२२॥ इति जिह्वापरीक्षा॥ अथ मूत्रपरीक्षा॥ रात्रेश्च
तुर्थ मस्य घटिकानां चतुष्टये॥ समुत्थाय परीक्षेत मूत्रं वै यत्न रोगिणः॥२३॥ पूर्वधारां परित्यज्य म
ध्य कांचभाजने॥ धारयेत् कांस्यपात्रे वा कृत्वा मूत्रं प्रदापयेत्॥२४॥ ततः सूर्योदये जाते प्रकाशे मूत्रभाज
ने॥ वा मूत्रं समाशोध्य कुर्यात्तस्य परीक्षणं॥२५॥ वाते तोयसमं मूत्रं रूक्षं बहुतरं भवेत्॥ रक्तवर्णाभ
वे पीतं वा स्वल्पमेव च॥२६॥ कफे श्वेतं घनं स्निग्धं मूत्रं संजायते भृशं॥ द्विदोषे द्वंद्वचिन्हं स्यात् सर्व

३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चिन्हं त्रिदोषजे ॥ २७ ॥ उषाकाले गृहीतं यन्मूत्रं घर्मे निधापयेत् ॥ तैले बिंदुं क्षिपेन्मूत्रे निश्चलेऽथ स
तमः ॥ २८ ॥ यदा प्रसारमाप्नोति तैलं क्षेमं तदादिशेत् ॥ बिंदुरूपं स्थितं तैलं असाध्यत्वाय रोगिणः ॥ २९ ॥ प्र
सरेत्पूर्वदिग्भागे पश्चिमे वा तथोत्तरे ॥ तैलबिंदुस्तदा रोगविमुक्तं रोगिणो दिशेत् ॥ ३० ॥ दक्षिणस्यां तथैशा
न्यआग्नेय्यां नैर्ऋते तथा ॥ वायव्ये चापि दिग्भागे प्रसरेत्स्म स्कसत्वकं ॥ ३१ ॥ निमज्जति यदा मूत्रे भ्रमवान्ने
वसर्पति ॥ तदारिष्टं विजानीयात् रोगिणो नात्र संशयः ॥ ३२ ॥ तैलप्रसरणात्सूत्रे विक्रताकारमूर्त्तयः
हलकूर्मखरोष्ट्रादेर्भवंति न तत्सूचकाः ॥ ३३ ॥ यदि मूत्रगते तैले हंसछत्रादिकं भवेत् ॥ रोगी रोगविमु
क्तः स्यात्तदा पुण्या पुण्या चिरं ॥ ३४ ॥ इति श्री लक्ष्मणोत्सवे ग्रंथे नाडीमूत्रपरीक्षा मूत्रलक्षणो नाम न
वमोल्लासः ॥ ९ ॥ अथ कर्मविपाकः ॥ रोगाः कर्मोद्भवाः केचित् केचिद्दोषसमुद्भवाः ॥ कर्मदोषोद्भवाः के
चिद्देवं रोगास्त्रिधा स्मृताः ॥ १ ॥ ये रोगा नैव शाम्यंति कृतैर्व्यौषधकर्मभिः ॥ धर्मेणैवोपशाम्यंति ते रोगाः क

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु० सं० मजि॰ समताः ॥२॥ प्रायश्चित्तेऽपि विहिते तन्न शाम्यति विनौषधं ॥ येऽदृष्टहेतुसंभूतास्ते रोगाः दोषजाः स्म
३१ ताः ॥३॥ येषां सर्वात्मना हानिर्भवेत्स्वल्पेन केवलैः ॥ न केवलौषधैर्नापि रोगास्ते कर्मदोषजाः ॥४॥ दृष्टि
हेतुसमुत्थायुक्तं किंचित्कर्मनिवर्तते ॥ सहकारि भवेत्किंचित् किंचिद्धेतुस्तु केवलं ॥५॥ सर्वप्राणिगुणेऽरे यं स
र्वं कर्म दारुनकं ॥ फलं संभुज्यते तस्मात्कर्मशुद्धिं समाचरेत् ॥६॥ तथा चोक्तं ॥ यस्मिन्देशे च काले च वयसा
यादृशा न च ॥ कृतं शुभाशुभं कर्म तत्तथा तेन भुज्यते ॥७॥ नरकान्नाधिनो घोरान् भुक्त्वा तत्सापशेषतः
उद्भिज्जा स्वेदजत्वानि तीर्य कृत्स्नं प्राप्नुवंति ते ॥८॥ ततस्तेनैव पापेन दरिद्रा नीचवंशजाः ॥ कुष्ठांधापंगवो
व्यंगा जायंते रोगिणो नराः ॥९॥ तथा चोक्तं ॥ पूर्वजन्मकृतं पापं व्याधिरूपेण बाधते ॥ तच्छांतिरौषधैर्दा
नैर्जपहोमार्चनादिभिः ॥१०॥ इत्थं च पुण्यनिचयैरपनीयमाना प्राक्पापजातमशुभं शुभतां प्रयाति ॥ त
स्मात्संदेहदातव्यं विचिकित्सस्य सुखाधिभिः ॥११॥ विचिकित्से तेन यथा भोगा ग्रीष्मप्रकुसरिघ्यथा ॥ प्राय२

३१

61

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चित्तं ततः पूर्वं कुर्याद्रोगप्रशांतये ॥ ११ ॥ रोगार्हे तौ स्थिते पापे व्याधिः शाम्यति नौषधैः ॥ असाध्यस्यापि
रोगस्य प्रायश्चित्तं समापयेत् ॥ १२ ॥ अन्ये पापि निवस्यर्थं रोगी भावी पुनर्जन्मसु ॥ तथा चोक्तं ॥ महापापोद्भ
वं चिन्हं सप्तजन्मनि जायते ॥ १३ ॥ उपपापोद्भवं पंच त्रीणि पापात्समुद्भवं ॥ महापापेषु सर्वस्मात्तदर्धमुपपा
तके ॥ १५ ॥ तुर्यात्सापेषु षष्ठांशं कल्प्य व्याधिबलाबलं ॥ सामान्यं सर्वरोगाणां शांतये दानमुच्यते ॥ १६ ॥ त
थाजपादिकं किंचित्शेषशास्त्रविलोकयेत् ॥ प्रत्यक्षं सर्वरोगघ्नं छायापात्रविधानतः ॥ १७ ॥ चतुःष
ष्टिपलैः कांस्यभाजने निर्मिते शुभे ॥ घृतेनापूरिते तत्र स्वर्णानिष्कं विनिक्षिपेत् ॥ १८ ॥ तत्राज्ये स्वतनोः
छायां आपादतलमस्तकं ॥ दृष्ट्वा रोगी ततो दद्यात् भाजनं तत् द्विजन्मने ॥ १९ ॥ पूजिताय विधानेन ततो
दद्याच्च दक्षिणां ॥ यशोयमुत्तमः प्रोक्तः कांस्यपात्रं सुवर्णयोः ॥ २० ॥ इत्यादितानुसारेण पात्रं स्वर्णं च बु
द्धिमान् ॥ आयुर्वर्द्धं यशो वर्च्चः आज्यं स्वर्णं तथामतं ॥ २१ ॥ आधारस्तेजसां यस्मादतः शांतिं प्रयच्छते ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क०स०
३२

इ[illegible] नमंत्रः ॥ मंत्रेणानेन विप्राय सर्वरोगप्रशांतये ॥ २२ ॥ पात्रं सुवर्णसहितं दद्यात्संकल्प्य पूर्वकं ॥ इति छा
या[illegible] दानविधिः ॥ २३ ॥ दद्यात्सर्वरुजां व्याधिप्रतिरूपं निवर्तये ॥ सुवर्णेन स्वरूपेणापि स्वशक्तितः ॥ २४
नि[illegible] तु शतेनैकेन निष्काणां वा तदर्धतः ॥ त्रिंशता वाथ यथाशक्ति दद्यात्तु कृतविधानतः ॥ २५ ॥ तं तु लैः पूरितैर्व्या
धि[illegible] रूपेषु भाजने ॥ निधाय वेष्टयेद्वस्त्रेण समलंकृत्य भूषणैः ॥ २५ ॥ समभ्यर्च्य विप्राय पूजिताय नि
वेद[illegible] ॥ पठन् मंत्रमिमं व्याधिप्रतिरूपमयो सृजेत् ॥ २६ ॥ येमां रोगाः प्रबाधन्ते देहस्था सततं मम ॥ गृह्ण
ध्व[illegible] रूपेण तान् रोगान् द्विजसत्तमान् ॥ २७ ॥ वार मिलेवन दूपंग ह्यो या ब्राह्मणस्तथा ॥ ततो रोगप्रदा
तासे[illegible] र्धमायुः प्रपद्यते ॥ २८ ॥ तं दुग्धा नाव्यपत्रां मुख्यं ततो संभवं ॥ दत्वा दानं तु तत्काले द्विजास्य न वि
लो[illegible] तु ॥ २९ ॥ इति व्याधिप्रतिरूपदानविधिः ॥ सर्वरोगविनाशाय जपः कार्यो विशेषतः ॥ म. संक. जप
स्य र[illegible] प्रहोमं कुर्याद्दशांशकं ॥ ३० ॥ आगमोक्तविधानेन रोगनाशो भवेद्ध्रुवं ॥ सर्वरोगप्रशांत्यर्थं अभिषे

३

63

CC-0. In Public Domain,Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं समाचरेत् ॥३१॥ सहस्रकलशैः शुंभैर्विष्णोर्वा शाधिकः शुभैः ॥ देवमभ्यर्च्य विप्रेभ्यो दद्यान्मिष्टान्न
भोजनं ॥३२॥ तेभ्यश्च दक्षिणां दत्वा रोगेभ्यो मुच्यते ध्रुवं ॥ कार्यः षडुगरुद्रस्य जपो वा रोगशांतये ॥३३॥ शात
रुद्रियकं वापि जप्त्वा रोगात्प्रमुच्यते ॥ जपं होमं च रुद्रस्य त्वादिशात्सोत्राक्त माचरेत् ॥३४॥ महारुद्रविधानेन सा
ध्यरोगोपशांतये ॥ अपामार्जन संज्ञेन मालामंत्रेण वा हरेः ॥३५॥ सर्वरोगोपशांत्यर्थं सततं व्याधिमानृज
पेत् ॥ सर्वेषु सात्त्वरोगेषु प्रदद्यात्सततं नरः ॥३६॥ पानीयपायसंमुद्गान्शर्करा घृत संयुतान् ॥ प्रतिकूल
ग्रहाणां च जपं होमं च पूजनं ॥३७॥ तत्तद्दोषविनाशार्थं दानं कुर्याद्यथोदितं ॥ प्रतिरोगं च यत्प्रोक्तं जपहोमा
दिकीर्तितं ॥३८॥ प्रायश्चित्तं तु तत्कृत्वा चिकित्सामाचरेत्ततः ॥ ॥इति श्रीलक्ष्मणोत्सवे ग्रंथे प्रायश्चि
त्तकथनं नाम दशमोध्यासः ॥१०॥ अथ रोगाणां गणना ॥ रोगाणां परिसंख्यानं यदुक्तं मुनिभिः पुरा ॥ सं
क्षेपाद्दत्र वक्ष्येहं तत्सर्वमुपयोगकृत् ॥१॥ अष्टौ ज्वराः पंच कृच्छ्र संख्याताः गंतुजाः स्मृताः ॥ अतीसाराः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु०सं० स..गाः संमेकककमिश्रितदोषजाः ॥२॥ आमोद्भवा तथा शोका त्कथ्यं तेसंव सवलक्षणैः ॥ चत्वारो ग्रहणीरोगाः
३३ प्र..कारिवलसंभवाः ॥३॥ आर्शो रोगाश्च षट्प्रोक्तास्समस्तस्तरकजाः ॥ चर्मकीलास्त्रयो ज्ञेया वातपित्तक
के..वाः ॥४॥ जठराग्निस्त्रिधा मंदस्तीक्ष्णश्च विषमस्तथा ॥ क्षीणाधिके वातपित्तकफरोगकराः स्मृताः ॥
५॥ पित्तमारुतजः प्रोक्तस्त्वेक एव सभस्मकः ॥ चतुर्विधमजीर्णं स्यात्पित्तश्लेष्ममरुद्रसैः ॥६॥ केचिद्दु
श्च निर्दोषमजीर्णं दिनपाकिमपत् ॥ षष्ठं वदंति वाजीर्णं प्राकृतं प्रतिवासरं ॥७॥ सप्तमं च विषाजीर्णं विरु
द्धाशनोद्भवं ॥ त्रिस्रो विषूचिका ज्ञेयाः दोषैः साजीर्णकैः स्त्रिभिः ॥८॥ साजीर्णश्लेष्मवाताभ्यां मल
श्च..प्रकीर्तिता ॥ अजीर्णेकफवाताभ्यां उत्पन्नैका विलंबिका ॥९॥ चतुर्दश कृमयो बाह्यमलश्लेष्माश्र
वि..द्भवाः ॥ पंचमो रोषभेदश्च भेदसंहमद्भवाः ॥१०॥ पांडुपित्तप्रकोपोत्थं निर्दिष्टं कामलाद्वयं ॥ पांडु
पि..द्भयोद्भूतमेकं प्रोक्तं हलीमकं ॥११॥ रक्तपित्तं त्रिधा रक्तात्पित्तवमपुकफानुगो नृ ॥ क्षयास्त्रय स्त्रिभि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दोषैः श्चतुर्थः क्षतजोपि च ॥१२॥ उरःक्षतमिति प्रोक्तं केचिच्च महर्षयः ॥ कासाः पंच क्षतश्लेष्मपित्त
वातक्षयोद्भवाः ॥१३॥ श्वासाः पंचविधा ज्ञेयाः क्षुद्रस्तमकस्तथा ॥ ऊर्ध्वश्वासो महाश्वासः छिन्नश्वास
श्च पंचमः ॥१४॥ हिक्काश्च पंच विज्ञेयाः क्षुद्रस्यादन्नजास्तथा ॥ गंभीरा यमला चैव पंचमी महती स्मृता
॥१५॥ अरोचकाः पंच भिन्नैः मिलितैः स्वाततापजः ॥ स्वरभेदाश्च षट्प्रोक्तैः समस्तैर्मेदसः क्षयात् ॥१६
षट् छर्दयो व्यस्तमिश्रकृमिनिंघाबलोमनैः ॥ कृमिषट् व्यस्तसर्वेपि सग्रेश्वरसहानिनः ॥१७॥ मदाः
सप्त व्यस्तसर्वदोषाः सकृद्विषमद्यजाः ॥ मूर्च्छा सप्त मदैरेव तुल्या हेतुसमुद्भवाः ॥१८॥ एक एव तु संन्या
सो युगपत्कुपितैर्मलैः ॥१८॥ चत्वारश्च पृथक् सर्वदोषजास्तु मदात्ययाः ॥१९॥ दाहाः सप्त स्मृताः पित्ताद्
रक्तपित्तात्तथा परः ॥ धातुक्षयान्मर्मघातात्तथा तृष्णानिरोधतः ॥ रक्तपूर्णोदरोत्थश्च सप्तमो रक्तसंभवः ॥
२०॥ देवदानवगंधर्वयक्षपन्नगराक्षसैः ॥ पिशाचैः प्रेतकूष्मांडकर्कोटोनरपाख्यैः ॥२१॥ गुह्यकिन्नरवेतालकृ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र०स०
३७

...गुरुशापतः ॥ पितृगृहे ः क्षेत्रपाले च यमुन्माद संभवः ॥ २२ ॥ अपस्माराश्च चत्वारः पृथक्‌ लिंगितदो
षाः ॥ अशीतिर्वातरोगाश्च चत्वारिंशत्तु पित्तजाः ॥ २३ ॥ स्थाननामानुरूपैस्तान्‌ लिंगैरेव तु कीर्तयेत्‌ ॥ आक्षेप
को ...हनुस्तंभोरुस्तंभः शिरोग्रहः ॥ २४ ॥ बाह्यायामोंतरायामः पार्श्वशूलं कटिग्रहः ॥ दं
डापतानकः खल्ली जिव्हास्तंभस्तथार्दितं ॥ २५ ॥ पक्षघातं क्रोष्टुशीर्षं मन्यास्तंभश्च पंगुता ॥ कलायखंजता
तूनी प्रतितूनी च खंजता ॥ २६ ॥ पादहर्षो गृध्रसी च विश्वाची चावबाहुकः ॥ अपतानो व्रणायामो वातकंपो
...कः ॥ अंगभेदोंगशोषश्च मिन्मिनत्वं च कल्लता ॥ प्रत्यष्ठीलाष्ठीलिका च वामनत्वं च कुब्जकं ॥ २८ ॥ अं
ग...गशूलं च संकोचस्तंभ वक्षता ॥ अंगभेदोंगविभ्रंशो विग्रहो बद्धविड्‌ता ॥ २९ ॥ मूकत्वमपि जृंभा
स...अस्थिहरो नेत्रकूजनं ॥ वातेन हृत्‌ विस्फुरणं शिराणां पूरणं तथा ॥ ३० ॥ कंपः कार्श्यं श्यावतानुप्रलापः
हि...मूत्रता ॥ निद्रानाशः स्वेदनाशो दुर्बलत्वं बलक्षयः ॥ ३१ ॥ अतिप्रवृत्तिः शुक्रस्य कार्श्यं नाशाश्च रेतसः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अ ...स्निग्धत्वं चित्तत्वं काठिन्यं विरसास्यता ॥ ३३ ॥ श्वाश्वासता मसुसिश्च गंधा ज्ञातं तं ह श्राक्षपः ॥ इत्यादयो म
रु ...ताः कथ्यं नेशीतिसंश्रिताः ॥ ३४ ॥ अथपित्तभवा रोगाश्चत्वारिंशदिहोदिताः ॥ धूमोद्गारो विदाहः स्यादुष्णां
त्व ...गोम्लमः ॥ ३५ ॥ कांतिहानिः कंठशोषो मुखशोषोल्पशुक्रता ॥ तिक्तास्यता म्लवक्रत्वं स्वेदश्चांगपाक
ता ...३६ ॥ क्लमो लोहितवर्णत्वमतृप्तिः पीतकायता ॥ रक्तगावांगदरणं लोहगंधास्यतातथा ॥ ३६ ॥ दौर्गंध्यं
पी ...मूत्रत्वं मरतिः पीतविट्कता ॥ पीतावलोकनं पीतनेत्रतापीतदंतता ॥ ३७ ॥ शीतेच्छा पीतनखता तेजोद्वे
वे ...षोल्पनिद्रता ॥ कोपश्च गात्रसादश्च भिन्नविट्कत्व वंधता ॥ ३८ ॥ उष्मोच्छ्वास उष्मत्वं मूत्रस्य च मलस्य
च ...तमसो दर्शनं पीतमंडलानां च दर्शनं ॥ ३९ ॥ तिक्तत्वं चैव पित्तस्य चत्वारिंशदुभ्रमताः ॥ कफस्य विंश
ति ...का रोगास्तत्रातिनिर्दिष्टाः ॥ ४० ॥ गौरवं मुखमाधुर्यं मुखलेपः प्रसेकता ॥ श्वेतावलोकनं श्वेतः विट्कत्वं
श्वे ...मूत्रता ॥ ४१ ॥ श्वेतांगवर्णता चैव मुष्मेक्षा तिक्तकामता ॥ मलाधिक्यं शुक्रस्य बाहुल्यं बहुमूत्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु०सं० ३५

ता ॥ ४२ ॥ आतुरस्य मंदबुद्धित्वं तमिवैर्विरवाभ्यता ॥ अथैतन्यं च गदिता विंशतिः श्लेष्मजा गदाः ॥ ४३ ॥ भिन्नं
द्वादशधा वातनरक्तवाताधिकं तथा ॥ रक्ताधिकं पित्तपुष्टं कफभूयिष्ठतो ध्रुवं ॥ ४४ ॥ वामुरक्तोल्बणं वातपि
त्ताधिकं त्वथ षष्ठकं ॥ कफवातोद्भवं रक्तपित्ताद्यं कफरक्तजं ॥ ४५ ॥ कफपित्ताधिकं चान्यत्रिचतुःकोपजं द्वयं ॥
समासमवात प्रत्येकं द्वंद्वत्रयसमुद्भवाः ॥ ४६ ॥ शूलान्यष्टौ पृथक् द्वंद्वसंघातामसमुद्भवाः ॥ हृदि वाताद्रसात्कु
क्षौ कुक्षौ वातामजो भवेत् ॥ ४७ ॥ पार्श्वयोः कफवाताभ्यां वस्तौ मारुतकोपतः ॥ वातेन विषमं त्वेवं समशूलोऽयं
मतापरा ॥ ४८ ॥ परिणामजशूलानि प्रोक्तान्यष्टौ भिषग्वरैः ॥ केवलद्वंद्वसंघातजातान्यत्र रसोद्भवं ॥ ४९
उदावर्तोनिलाद्देक एकानाहो निरामजः ॥ गुल्मोष्टधा अस्त्युग्मसन्निपातासृगुद्भवः ॥ ५० ॥ हृद्रोगाः
पंच पृथक्मिश्रताकृमिसंभवाः ॥ अष्टौ च मूत्रकृच्छ्राणि पृथक्संहतदोषतः ॥ ५१ ॥ चत्वारि द्वे शुक्रे दोषमू
त्ररोधसमुद्भवे ॥ अभिघातभयं चान्यत द्विधा तौ धातनस्तथा ॥ ५२ ॥ चतुर्विधाश्मरी व्यस्तदोषाः शुक्रसमु

३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्भवाः॥ श्मरी शर्करा चैव तुल्ये ते हेतुलक्षणे ॥५३॥ विमुक्तः कफसंधानात् शोष्यमाणाच्च वायुना ॥ पच्यमा
नाश्म तात्कर्षती शर्करासम्मता ॥५४॥ मूत्रघाताः प्रजायन्ते दोषकोपेस्त्रयोदश ॥ दशास्तु वातकोपेन पित्तेने
कफस्तथा तः ॥५५॥ वातपित्ताद्वितीयस्तु तृतीयः सन्निपातजः ॥ प्रमेहा विंशतिर्भोक्ता दशान्तेषु कफोद्भवाः
५६॥ पित्तसमुद्भूताश्चत्वारो वातहेतुजाः ॥ स्निग्धस्वादुरसो मेदः कफतश्च प्रजायते ॥५७॥ उदरंचा
ष्टधा भिन्नं दोषैश्च संगतैः ॥ शोफा नव व्यस्तयुग्मसर्वघातविघाद्भवाः ॥५८॥ अंत्रवृद्धिः सप्तधा
सकू मूत्रान्त्रदोषजाः ॥ गंडमालागंडुस्त्रयो मेदकफवातसमुद्भवाः ॥५९॥ गलगंडैकहेतुस्त्वा क्लिस्तुः सु
गंडुम का ॥ दोषत्रयात्स्त्रपिडिकाश्चित्रमेदोस्थिरक्तामयतो व्रणमता ॥६०॥ पृथग्भोनवधा प्रोक्ताः समासेनाभि
षग्वै षड्बुद्धानि जायंते दोषाः सप्तास भेदतः ॥६१॥ वातपित्तात्कफाच्चैव त्रीणि स्युः श्लीपदानि
तु॥भ तषड्भाधयो मस्तसर्वसमास्त्रजाः ॥६२॥ व्रणशोथाश्च षड्मस्तभिन्निताागंतुरक्तजाः ॥ प्र

70

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु.स.
३६

श्ले[illegible]द्वयसंमिश्रैः सर्वैः केवलैरपि ॥ ६३ ॥ व्रणस्यासंवृतस्याथ शोणितादपि केचन ॥ सद्योव्रणाभवंस्म
ष्ठे[illegible]भिधातसमुद्भवाः ॥ ६४ ॥ दृष्टाविकिसविच्छिन्नविभृतंवितपातितं ॥ विद्धभिन्नं विदलितं मे सुशं वपुरष्ट
धा ॥ ६५ ॥ यातायातादिजोऽगाभं गोऽस्थ्नः संध्यभिगं स ॥ नाडीव्रणा मस्तसर्वशल्यतः पंचधा स्मृताः ॥
६६ ॥ प्रत्येकद्व्यसंघातागंतुभ्यो दोषभगंदराः ॥ अपक्वं पिटिकामाहुः पक्वं भगंदरं ॥ ६७ ॥ उपदंशाः
पंच दोषैः व्यस्तैः समस्तैः सलोहितैः ॥ अष्टादश शूकदोषा नाडीषु मंकोपजाः ॥ ६८ ॥ तत्र सर्षपिका
नाम प्रथमा कफरक्तजा ॥ द्वितीयश्चावमंथः स्यात् कफरक्तसमुद्भवाः ॥ ६९ ॥ कुंभीका चालजी चैवं भ
वेद्रक्तपित्तजे ॥ पंचमी हेतुर्विधे भवेत्पुष्करिकेति सा ॥ ७० ॥ षष्ठी संमूढपिटिका वातदोषसमुद्भ
वा ॥ सप्तमी ष्टीलिका नाम जायते तिलकोपतः ॥ ७१ ॥ अष्टमं मंथितं तारं मं च कुष्ठमास्तं ॥ कफानिलसमु
द्भूता नवमी च विपादिका ॥ ७२ ॥ निरुद्धमणिरिस्फोटदुष्टवातोद्भवः परः ॥ स्पर्शहानिः कफास्रग्

३।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ्यां मारुतात् शतपोनकः ॥७३॥ पित्तशोणितसंभूतं तत्स्यात् स्यात्रयोदश ॥ त्रिदोषजनितो मांसशातनः स्याच्चतु
र्दश ॥७४॥ रक्तार्बुदं पंचदशं मांसार्बुदमेव च ॥ त्रिदोषजो भवेत्सा कोविद्धी त्रिदोषजः ॥७५॥ सन्निपातनस
मुद्भूता विज्ञेया सिलकालकाः ॥ कुष्ठान्यष्टदशैकैकं द्वित्रिदोषैर्भवंति च ॥७६॥ कपालं वातजं कुष्ठं पित्तादौदुंबरं
भवेत् ॥ कफोद्भवेच्च विज्ञेयं मंडलाख्यं विचर्चिके ॥७७॥ रक्तजिह्वं मरुत्पित्तात् कफवातात् विपादिका ॥ सिध्मा
लसंच किटिभं रचकाख्यं तथैव च ॥७८॥ कफपित्तात्पुनर्दद्रुः पामा विस्फोटकं तथा ॥ पुंडरीकं चर्मदलं महा
कुष्ठं सहारकं ॥७९॥ काकणाख्यं त्रिदोषोत्थं तथैव च चित्रसंज्ञकं ॥ तच्च प्रसेक दोषोत्थं सकश्चिन्निधिमुच्यते
८०॥ शीतपित्तं द्रुमुखाख्यं मलिनश्लेष्मसंभवं ॥ शीतपित्तं मरुत्सुखं मुदर्दं स्यात् कफात्मके ॥८१॥ एक एव
गुदः प्रोक्तः कोठ उत्कोठ इत्यपि ॥ असृग्गवमनोदीर्णपित्तश्लेष्मात्र विगृह ॥८२॥ अम्लपित्तं त्रिधा प्रोक्तं पि
त्तयस्रवसंचितं ॥ सोनिलं सानिलकफं सकफं तच्च जायते ॥८३॥ व्यामैकद्वंद्व मिलितैर्बाह्यतो ष्टौ विसर्पिका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० ३७

अ स मु ८ भ के मं पिं ङ्गि

...टाव्यस्तयुग्मसमंस्तैः पित्तरक्ततः ॥ ८४ ॥ पांडुदाहरुजोपेतैः राजसर्षपसन्निभैः ॥ रोमकूपानुगैः
...गुष्ठेरोमांतको भवेत् ॥ ८५ ॥ अग्निस्फोटोपमस्फोटैरग्निदग्धनिभैर्युतः ॥ वातश्लेष्मसमुत्पन्नस्ता
...क एव हि ॥ ८६ ॥ एकोभवेद्रुडरोगो नाम्ना गंडावलीति च ॥ मसूरिका भवं संस्थोपस्तद्वंद्वत्रयास्त्रजा
...लानांश्लेष्मवातोत्थपिंडिका त्वजगल्लिका ॥ यवप्रख्येति चाख्याता पिंडिका त्व परावुधैः ॥ ८८ ॥ अं
...कफाद्यातात् नाभ्यांकच्छपिकेति च ॥ ग्रीवाकक्षासवरणकरसंधिषु जायते ॥ ८९ ॥ दोषत्रयेण वल्मी
...लक्षणलक्षित ॥ इंद्रुविद्धेति पिंडिका कफमारुतसंभवा ॥ ९० ॥ वातपित्तोत्थपिंडिका गर्दभी वृद्
॥ विसर्पज्वरवा पित्ता तत्छोपस्यांज्जाल...र्दभः ॥ ९१ ॥ शोफः संधौ हनुश्लेष्मवातात्सा पाषाणगर्दभः
स्यात्स्यनसिका कर्णान्तेयारुरुकरी ॥ ९२ ॥ पिंडिका मस्तके सर्वदोषैः स्याद्विविद्रिका ॥ कच्छेति पि
...आदेशस्थाजालसन्निभा ॥ ९३ ॥ एकास्यांद्धनामेति महती पित्तवातजा ॥ विस्फोटा रोहिणी दो

३

73

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष[illegible]त्कंधांससंस्थिता॥९४॥नखमांससमुत्थंतु पाकं चिप्यंततं वातपित्ततः॥कुनखं स्यात्त्रिभिर्वातात् पा
के[illegible]ताङ्गौ विदुः॥९५॥ग्रंथिर्विदारिका दोषैः कक्षावंक्षणसंधिगा॥मेदःश्लेष्मानिलैर्ग्रंथी शिरास्त्वा शर्करा
बुद[illegible]द॥कदरं तत्रतो ग्रंथिः क्षतात्स्यादत्तले भवेत्॥कंटत्रं त मलसपादांगुलीषु स्यात्त्वपकतः॥९७॥ वातपि
त[illegible]स्त्रभिरिद्रलुप्तं कफानिलात्॥ दारुणं कम्प्यस्त्वक्श्लेष्माकोपान्मूर्द्धन्यरूषिका॥९८॥ मेदोसृग्वातक
फ[illegible]स्या धूनां मुखदूषिका॥ न्यच्छिं पित्तेन पद्मितं देहे स्युः पद्मकंटकाः॥९९॥ मंडलं तु कफासृग्भ्यां रक्तं ज
तुम[illegible] विदुः॥ माषकं माषवद्दात्ता तिलकाः पित्तवाततः॥१००॥ दव ग्रंथिर्मेधमणो वातजास्युर्विवर्तिकाः
नं[illegible]भिर्विमिद्दृष्ट्या वमौत्से धेव पारिकाः॥१०१॥ वातात्तिरुद्ध प्रकसंमणेवा वर्मादते विदुः॥ संनिरुद्ध गुद
प्रा[illegible]गरो धोद्भवानिलात्॥१०२॥ शिशोर्मूत्रं सकृत्स्त्रीनै गुदे रक्तकफोद्भवाः॥ कंडूर्वीनकफोद्भूतो व्रणो घ्नःसा
हि[illegible]न्नः॥१०३॥ मुलत्विसेन दवोणा कंडूस्फोटा ततःस्रवः॥ विदुर्वृषण कच्छूं तां कफपित्तसमुद्भवां॥१०४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰स॰ गुदभ्रंशमतीसारान्निसजेच्च गुदे विटुः ॥ तस्याके द्वारकंडूत्वक् सोस्यात् सूकरदंतकः ॥ ५ ॥ दडुरोगा
३८ द्रमे प्रोक्ताः षट्त्रिंशत्सविभागतः ॥ एकादशौष्ठरोगास्युरुभौ तत्रानिलोद्भवौ ॥ ६ ॥ तृतीयः पित्ततः श्लेष्म
रक्ताभ्यां सन्निपाततः ॥ अपरेस्युः त्रयस्त्वर्बुदानीक्षीणरक्ततः ॥ ७ ॥ मांसाज्जमेदसो घातात्क्षतादपि बल
क्षये ॥ दाहज्वरान्वितः शोफो गंडेगंडालजी तिसा ॥ ८ ॥ दशदंतोद्भवा रोगास्तत्रैकः शीतदाहनः ॥ दंतह
र्षो दंतभेदः करालोधिकदंतकः ॥ ९ ॥ चालेच्चशर्करा धूरास्याः क्रमी दंतः कपालिका ॥ दंतमूलोद्भवा रोगा
स्त्रयोदश निरूपिताः ॥ १० ॥ शीतोद्भवा दृशक फात्तथापित्ताश्रितोपि च ॥ मन्याश्चाद्विद्रधिर्दंतः कफाश्रा
द्दंतपुप्पुटः ॥ ११ ॥ अधिमांसः कफोद्रेकात् पित्ताश्रात् सुषिरस्मृतः ॥ महासुषिर इत्युक्तो दोषत्रयसमु
द्भवाः ॥ १२ ॥ वैदर्भस्त्वभिघातोत्थः स्मृतश्चोपकुशः परः ॥ जिह्वामया वद्रु दृष्टा वातपित्तकफैस्त्रयः
१३ ॥ चतुर्थः कफपित्ताभ्यां थोद्वेनुपित्तकफस्तंभो ॥ अधिजिह्वोपजिह्वे द्वे प्राहुरन्ये महर्षयः ॥ १४ ॥ तालुरोगा

३८

75

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोपिंडिकातालुका इति॥ गलशुंडी कफास्राभ्यां मासतस्तालुसंहति॥१५॥ श्लेष्मात्मकः कछपः
दं रक्तसंभवं॥ पुप्पुरः कफमेदोभ्यां पित्तात्पाकाख्य उच्यते॥१६॥ वातपित्तज्वरायासैस्तालुशोष
मः॥ अष्टादश गलरोगाः रोहिणी तत्र पंचधा॥१७॥ त्रिदोषैरसृजा कफे सन्निपातात्सशोषिता
ल्वणस्त्रिदोषोयः शालूकः कफज उच्यते॥१८॥ गलागर्गः गलौघश्च वृंदारस्तुंडिकेरिका॥ गलायु
श्चैव तथैव गलविद्रधिः॥१९॥ अनुक्ते तत्वोपेते विस्तेयास्तत्सलक्षणैः॥ गलार्बुदस्वरघ्नो स्यं
स्तथापरे॥२०॥ ते वातकफमेदोभ्यः स्वरहा चानिलोद्भवः॥ मुखरोगा भवंत्येषु षष्टिर्व्यस्तैर्दोषै
श्च ते॥२१॥ शोणितेन च सप्तत्रिंश सन्निपातेन चापरः॥ भवेदूर्ध्वगतो वाताद्दृष्टमं कफतोऽर्बुदं
वविंशतिरुच्यंते कर्णरोगा विभागशः॥ प्रत्येकं सर्वैस्तथा रक्तात्पंचश्रुत्यानि निर्दिशेत्॥ कर्णना
दूतः प्रतिनाहः कफानिलात्॥ शोफः कफात्कफात्कंडूः कृमिभ्यः कृमिकर्णकः॥२५॥ पालीशोषो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क०स०
३९
पवनाउत्स्यातः पित्तरोनिलात् ॥ परिपोटो वृद्धनास्यात् पंवनादपतंत्रिका ॥ २५ ॥ मांसांकुराविष्य
ऽविस्यात् सन्निपाताद्विदारिका ॥ तद्वेतोतदुपेक्षातो आपतेत् कर्णशष्कुली ॥ २६ ॥ सन्निपातज्वरोपेन आयते
दुःखवर्द्धनः ॥ भाराद्येस्फोटपिडिका श्लेष्मवाताच्च गद्वरः ॥ २७ ॥ लिक्षाद्यापिडिकाज्ञेया कफासृक्
कृमिसंभवाः ॥ नासारोगाभवंत्यष्टादशाद्याः पंचपीनसाः ॥ २८ ॥ वातात्पित्तात्कफाद्रक्तात्सन्निपा
ताच्च पंचमः ॥ पूयोऽकोपदुवोत्कर्षा सम्बेन्द्रियतापनः ॥ २९ ॥ भ्रंशथुरोभवेद्वातात् नासाशोषः कफ
कानिलात् ॥ घ्राणपाको भवेत्पित्तात् नासारोगः कफोऽनिलात् ॥ ३० ॥ श्लेष्मणा नासिकास्रावः
सिंहाणः कफवर्द्धितः ॥ दीप्तिर्नासास्रजाद्दिग्धादुर्मलैः पूतिनासिका ॥ ३१ ॥ अभिघातात्क्षयरकं
पित्तानिलकफेस्फुरं ॥ आशोर्बुदंच विभजेद्दोषवित्रिहैर्यथोचितं ॥ ३२ ॥ चतुर्नवतिरक्षिस्थारोगास्त
त्रैवतंगाः ॥ चतुर्विंशतिरत्रापि त्रितयं चानिलोद्भवं ॥ ३३ ॥ कृकोन्मीलानुतुमेषोनभावानहरं
३९

77

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भ... त्रनयं पित्तजं कुंभे पिडिका पक्ष्मशातनः ॥३४॥ पित्तोत्क्लिष्टं भवेत्तादृक् त्रितयं कफसंभवं ॥ ल
ग... क्लिष्टं पोतकी च तथापरा ॥३५॥ चतुष्टयं च रक्तोत्थं पिडिकोत्संगसंज्ञिका ॥ अर्शश्वासनिका
दृ... त्र्यमुदाहृतं ॥३६॥ सास्रदोषत्रयोद्भूतमपरं च चतुष्टयं ॥ विषवर्त्म क्लिष्टवर्त्म श्याववर्त्मार्बु
हा... ७॥ कुकूनकोलजीर्वे च कर्दमं बहलं तथा ॥ क्लिष्टवर्त्म वैव सिकता तथा पक्ष्मोपरोधकः ॥३८॥
स... भजैद्वैधा कृतोपद्रवलक्षणैः ॥ नेत्रसंधिसमुद्भूता नव रोगा उदाहृताः ॥३९॥ जलस्रावो भवेद्धा
ता... स्रावो भवेत्कफात् ॥ रक्तस्रावो भवेद्रक्तात् पूयस्रावस्तु पूयतः ॥४०॥ श्लेष्मणश्चोपनाह
स्य... मं ग्रंथिश्च पर्वणि ॥ पूयालसोलजीवे नात्र रोगा विधा उवा सेवः ॥४१॥ नेत्रशुक्लविभागस्था
श्रो... स्त्रयोदश ॥ तत्रहृष्मर्कफोद्भूतं ग्रथितं चाधिमांसिकं ॥४२॥ भवेदेकशिरोत्पातः शिराजालं
त... शिराहर्षश्च पिटको रक्तादेतच्चतुष्टयं ॥४३॥ पित्तात्तत्शुक्तिर्भवेदेका प्रस्तार्यर्मामले भवेत्

78

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न० स०
४०

सास्रे श्वेते चाधिमांसार्म स्नायुमर्म च तथार्जुनं ॥४४॥ शुक्तिकार्म च भवेत्तद्वच्छिरायां पिटिकापि च ॥
कृष्णभागगदाः पंच तत्रैकं क्षतशुक्लकं ॥४५॥ पित्ताद्भवेत्तदाद्यद्धि त्रिषु स्यात्सटलेषु च ॥ क्रमाद्भवेत्तु
कृसाध्यं याप्यं वासाध्यमेव च ॥४६॥ श्लेष्मतः शुद्धशुक्रं स्याद्रक्तजश्च तथाजिका ॥ दोषैस्त्रिभिः
शिराशुक्लं क्षतशुक्रं सलोहितैः ॥४७॥ काचं तु षड्विधं ज्ञेयं वातात्पित्तात्कफादपि ॥ सन्निपाताच्च
रक्ताच्च सप्तं संसर्गसंभवं ॥४८॥ तिमिराणि षडेव स्युर्वातपित्तकफैस्त्रिधा ॥ संसर्गेण च रक्तेन ष
ष्ठं स्यात्सन्निपाततः ॥४९॥ लिंगनाशः सप्तधा स्याद्वातपित्तकफेन च ॥ त्रिदोषैरुपसर्गेण रक्तेन
स्याच्च सप्तमः ॥५०॥ अष्टधा दृष्टिरोगास्युस्तेषु पित्तविदग्धकं ॥ अम्लपित्तविदग्धं च तथा वात
विदग्धकं ॥५१॥ नकुलांध्यं धूसरांध्यं रात्र्यांध्यं ह्रस्वदृष्टिकं ॥ गंभीरदृष्टिरित्येते रोगा दृष्टिगतास्त
था ॥ चत्वारश्चाधिमंथास्युर्वातपित्तकफास्रजाः ॥ अभिष्यंदाश्च चत्वारो रक्तेनाथ त्रिभिस्तथा ॥
॥५२॥ ५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वाक्षिरोगाश्चाष्टौ स्युस्तेषु वातविपर्ययः ॥ अल्पशोफान्वितो यास्तु तथा पाकात्ययः स्मृतः ॥ ५४ ॥ शुष्का-
क्षिपाकश्चतशोफोम्लोवितएवच ॥ हताधिमंथस्त्वेते रोगाः सर्वाक्षिसंभवाः ॥ ५५ ॥ दशमद्दरुजस्तत्र वाते
नाड्डिशिरोव्यथा ॥ शिरस्तापश्च वातेन ब्पर्येन त्रयो गदाः ॥ ५६ ॥ पित्तश्लेष्मासृगुद्भूताः षष्ठः स्यात्सन्निपा
तजः ॥ त्रिभिर्दुष्टाः सन्निपातात्सप्तमः परिकीर्तितः ॥ ५७ ॥ सास्रैस्त्रिभिः शंखकस्यात्तु शिरःकंप
स्तथानिलात् ॥ सूर्यावर्तश्च दशमो जायते पित्तकोपतः ॥ ५८ ॥ नवरोगाः कपाले तु केवलेन त्रमारुता
त् ॥ उपशीर्षमरूंषी तु पित्तासक्कफजंतुभिः ॥ ५९ ॥ द्वंद्वजं चं रवलितिं पित्तासकफमारुतैः ॥ व्यस्तै
र्मिश्रैश्चतुर्भिश्च पलितं पंचधा स्मृतं ॥ ६० ॥ कफमारूतजं चण्डं तथा दारुणकं विदुः ॥ दोषलिंगैर्वि
जानीयात् पिंडिकार्बुदविद्रधीः ॥ ६१ ॥ व्यस्तमिश्रितदोषोत्थाश्चत्वारोस्य गदाः स्मृताः ॥ विंशतिर्व्या
पदो योनेस्तासु ह्याद शवातजाः ॥ ६२ ॥ यातेकंपतमुखीचैव शुष्का विद्देषिणीति च ॥ उदावर्तं छत्रमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰स॰ सा स्मृति मुख आस्तनी तथा ॥ ६३ ॥ जातं प्रौबाम नीन्वैव खंडा वाकरणी तथा ॥ कंडुश्च श्लेष्मलो याप पित्ततोर
५१ क्तयोनिका ॥ ६४ ॥ रक्तश्रया त्वातपित्तात्कफवातात् परिप्लुता ॥ परिप्लुता मरुसितात् आतुजं तु रस्क कूव
मात् ॥ ६५ ॥ दुष्टे श्लेष्ममरुद्भ्यां कर्णिनी जायते गदः ॥ त्रिदोषलक्षणे ज्ञेया सा विंशतितमा भवेत् ॥ ६६ ॥ ग
र्भपाताच्च घाताच्चैवाडुनाड्येश्च जायते ॥ मूढवातो मूढगर्भो अतिक्रांतसमो भवेत् ॥ ६७ ॥ वायुकोपा
ज्जायते सूतिकारोगसंभवः ॥ अन्येपि सूतिकारोगा जायंते कफमारुतात् ॥ ६८ ॥ मिथ्योपचारसं
क्लेशविषमाजीर्णभोजनैः ॥ स्तनरोगाः पृथक् सर्वदोषैः पंचस्तनेनव ॥ ६९ ॥ स्तन्यरोगाः पृथक् द
द्वं संहतैः षड्विकार्जिता ॥ शिशूनां समरोगाः स्युर्महतां येत्र तेपि च ॥ ७० ॥ तत्र दुष्टपयःपानात्
वातपित्तकफैस्त्रयः ॥ कुकुणको दुष्टदुग्धाद्वालस्य कथितो बुधैः ॥ ७१ ॥ गर्भिण्या दुग्धपानाच्च
पंचमः परिगर्भकः ॥ तालुदेशे कफाद्रेकः षष्टः स्यात्तालुसंभवः ॥ ७२ ॥ त्रिदोषजो विसर्पः स्यात्स

५१

81

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्रहः प्राणनाशनः ॥ दंतजन्मनु बालानां सर्वरोगकरं भवेत् ॥ ७३ ॥ शंभुना निर्मिता बालग्रहा द्वादश
संख्यया ॥ पुरा स्कंदस्य रक्षार्थं पंचमानुषरूपिणः ॥ ७४ ॥ स्त्रीविग्रहास्तथा सप्त नामानि विभागशः
स्कंदो विशाखो मेषास्युः स्वग्रहः पितृसंज्ञकः ॥ ७५ ॥ शकुनिः पूतना शीतपूतना दृष्टिपूतनात् ॥ मु
खमंडुलिका चैव रेवती शुष्करेवती ॥ ७६ ॥ स्वाभाविकं कृत्रिमं च द्विविधं कथ्यते विषं ॥ स्वाभाविकं
द्विधा प्रोक्तं स्थावरं जंगमं तथा ॥ ७७ ॥ स्थावरं कालकूटादि भेदैः कंदेषु वस्थितं ॥ तेषां नामानि
काकोला कालकूट हलाहलः ॥ ७८ ॥ सौराष्ट्रिकः सौक्तिकश्च ब्रह्मपुत्रः प्रदीपनः ॥ दारकोवत्स
नाभश्च विषभेदा अमी नव ॥ ७९ ॥ जंगमं बहुधा प्रोक्तं सर्पलूतादिसंभवं ॥ नखदंष्ट्राशृंगरोम
मलमूत्रादिसंभवं ॥ ८० ॥ शंकोद्भवं च सर्पादि द्विविधं मिश्रादि भेदवत् ॥ कृत्रिमं विषकृद्द्रव्यसंस
र्गप्रभवं भवेत् ॥ ८१ ॥ कालदेशाविरोधेन विरुद्धान्नजलादिभिः ॥ औषधादि विरोधेन जायते व
82

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०सं० ऊध विधाः ॥ ८२॥ इति संक्षेपतः प्रोक्ता रोगाः पूर्वमुनीरिताः ॥ तासां रूपं निदानेन कुर्याद्वा प्रति
५२ क्रिया ॥ ८३॥ इति श्री लक्ष्मणोत्सवे ग्रंथे रोगपरिसंख्यान नामैकादशोध्यासः ॥ ११॥ अथ सर्वरोग
निदानं ॥ रोगाः सप्तविधाः प्रोक्ताः सहजाश्चोपचारकाः ॥ आगंतवस्तथैवान्ये कालजाश्च प्रभा
वजाः ॥ १॥ स्वभावजा दोषजाश्च लक्ष्यास्ते लक्षणैः क्रमात् ॥ शुक्रार्तवगते दोषे जायंते सहजा गदाः
॥ २॥ कुब्जवामनताद्याश्च मातुर्गर्भोपचारजाः ॥ भूताद्यावेशवाय्वग्निमुखैरागंतवस्मृताः ॥ ३॥ व
लिपलितादिभिर्जाता कालजाः परिकीर्तिताः ॥ देवद्विजादिशापाद्यैः संभवंति प्रभावजाः ॥ क्षुत्तृष्णा
वार्धक्याद्याश्च रोगाः प्रोक्ताः स्वभावजाः ॥ ४॥ मिथ्याहारविहाराद्यैर्भवेयुर्दोषजा गदाः ॥ निदानं
पूर्वरूपाणि रूपाण्युपशयस्तथा ॥ ५॥ संप्राप्तिश्चेति विज्ञानं रोगाणां पंचधा स्मृतं ॥ अंकुरादेर्य
था बीजं निदानं कथ्यते बुधैः ॥ ६॥ तथा दुष्टविहारादि निदानं तु रुजां भवेत् ॥ अनाविर्भाविता शेषा

५:

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प [illegible] भविष्यतः ॥ रोगस्यपूर्वंचेष्टाः चिह्नं प्राग्रूपमुच्यते ॥ ८ ॥ प्रगटीभूतनिःशेषोपद्रवस्य गदस्य च
लिं [illegible] पमिति ज्ञेयं संस्थानं व्यक्तिराकृतिः ॥ ९ ॥ विहाराहारभैषज्यैर्हेतुव्याधिविरोधिभिः ॥ विरुद्धार्थकरैर्जं
न [illegible] पिशयमुच्यते ॥ १० ॥ यद्दृष्टकरकुपितैर्दोषैर्यन्मस्त्रधावति ॥ निष्पत्तिर्जायते व्याधेः संप्राप्तिः सा
नि [illegible] यते ॥ ११ ॥ मिश्रीभूतेषु दोषेषु प्राधान्यं जायते रुजं ॥ स्यात्तेभ्याभ्यां विकल्पोंऽशांशकल्पस्य कल्पनैः ॥ १२
उ [illegible] ष्टान्नपानाद्यैर्दोषाः क्रुद्धाः स्वहेतुभिः ॥ सर्वेषामेव रोगाणां प्रपद्यंते निदानतां ॥ १३ ॥ शांतिलंघनविरेचपा
चे [illegible] वदनस्य कवलग्रहांजनैः ॥ पथ्यभेषजविलेपनादिकैर्यांतिशांतिमखिलामयाध्रुवं ॥ १४ ॥ ॥ इति श्री
ल [illegible] ॥ स्तं ग्रंथे सर्वरोगनिदानं नाम द्वादशोऽध्यायः ॥ १२ ॥ अथ ज्वरनिदानं ॥ दक्षापमानसंक्रुद्धरुद्रभा
ले [illegible] द्भवः ॥ त्रिशिराः षड्भुजो भस्मायुधः श्रीको ज्वरः स्त्रिपात् ॥ नवनेत्रो महारौद्रः क्रोधमूर्तिर्महाव
ल [illegible] अनेकधा विभक्तात्मा नानायोनेषु वर्तते ॥ २ ॥ क्रुद्धाः स्वहेतुभिर्दोषाः प्रविश्यामाशयं ज्वरं ॥ ज

84

ज्व॰ल॰ नयंति बहिस्सिस्वा जठराग्निं रसानुगाः ॥३॥ सर्वांगग्रहणं स्वेदावरोधस्तापउल्वणः ॥ एकैदेव गदेष
५३ स्मिन् भवेयुः स ज्वरः स्मृतः ॥४॥ इति सामान्यज्वरलक्षणं ॥ अनवस्थितचित्तत्वं श्रांतनेव गरीयसि ॥
अंगानां ग्लानता वक्त्रं विरस्यं रसनामपि ॥५॥ जलपूर्णेक्षणत्वं च जृंभणं गात्रमोटनं ॥ छायानपां बु
वानाशा विच्छा द्वेषो मुहुर्मुहुः ॥६॥ गात्रस्य गौरवं भोज्यानिच्छासुखविपर्ययः ॥ तमसीवार्थ विभ्रां
ति रोमान्वश्चेति भाविनी ॥७॥ ज्वरेचिन्हानि आपंते पूर्वरूपमिदं स्मृतं ॥ विशेषाज्जृंभणं वायोः पित्ता
द्दाहोदृशा भवेत् ॥८॥ भोज्यद्वेषः कफात्सर्वदोषेभ्यः सर्वचिन्हता ॥ इति पूर्वज्वरलक्षणानि ॥ अथ
वातज्वरलक्षणानि ॥ उक्ष्मत्व नियमाभावः कंपः स्थिराविहीनता ॥ कंठोष्ठपरिशोषश्च निद्राना
शो गरूक्षता ॥ श्यामात्तिगात्र विद्धत्वं शिरोरुक्ते हनाधिका ॥१०॥ स्वेदनोद्दराटोपो जंभाविष्टम
रूत्वरे ॥ इति वातज्वरचिन्हानि ॥ अथ पित्तज्वरलक्षणानि ॥ तीव्रवेगो मलउत्स्त्र प्रवृत्तिश्चा

५

85

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[illegible]ता ॥ २२ ॥ कंठोष्ठमुखनासानां पाको वक्त्रस्य तिक्तता ॥ पित्तरक्तं हरिद्रांतिरसुक्त बहुभाषणं ॥ २३ ॥ भ्र
म[illegible]स्थितरेव च पीतविण्मूत्रनेत्रता ॥ दाहं तृष्णा मदो मूर्छा लक्षणं पित्तजे ज्वरे ॥ २४ ॥ इति पित्तज्वरल
क्षणा[illegible]नि ॥ अथ कफज्वरलक्षणानि ॥ आर्द्रं शुष्क इतस्येव गात्रस्योद्वेगगौरवे ॥ स्तब्धता रोमहर्षश्च शुक्लवि
ण्मू[illegible]नेत्रता ॥ शीतं मधुरवक्त्रत्वं नासास्रावो विनिद्रता ॥ मंदवेगोऽरुचिः कासः कफजे लक्षणं ज्वरे ॥ २५ ॥
इति कफज्वरलक्षणानि ॥ अथ वातपित्तज्वरलक्षणानि ॥ दाहो मूर्छारुचि श्वेतिक्षिंगं पित्तमरुज्ज्वरे ॥ इति
वात[illegible]पित्तज्वरलक्षणानि ॥ निद्रांगगौरवो मूर्ध्नोग्रहा तस्येव वेहिना ॥ सेद्रोस्रवति:प्रतिश्याय कासो मेदश्च
संधिषु ॥ २७ ॥ स्तैमित्यं मध्यवेगश्च विज्ञं वातकफज्वरे ॥ इति वातश्लेष्मज्वरलक्षणानि ॥ प्रलिप्ततिक्त
तावक्त्रे तंद्रामूर्छा तृषारुचिः ॥ शीतं दाहो मुहुः स्वेदः कफपित्तज्वराकृतिः ॥ इति कफपित्तज्वरलक्षणा
नि ॥ छर्दि मूर्छारुचिः कासः श्वासस्तृष्णा विड्ग्रहः ॥ हिक्कांगभेदो वीसारो ज्वरस्योपद्रवा दश ॥ वर्षा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्व०स०
५५

श्रा[illegible]ते षु वातपित्तकफे भवेत् ॥ सुखसाध्यः क्रमाल्लोक्तः कृच्छ्रसाध्यो परो ज्वरः ॥२०॥ श्वासस्तृष्मा
प्र[illegible]तद्दाहो निद्राभ्रमो भवेत् ॥ अंतर्वेगो ज्वरः स्वेदो हानिः संध्यस्थिशूलरुक् ॥ तस्मादीनां तु मंदत्वं
बा[illegible]तापउद्गतः ॥ बहिर्वेगस्य चिह्नं स्यात् ज्वरस्य सुखसाध्यता ॥२२॥ आलस्यारोहृदोटोपः क्षु
भा[illegible]मूल्कवान् ज्वरः ॥ हृत्श्वासो गुरुतांगेषु तंद्रा मज्वरलक्षणं ॥२३॥ क्षुत्प्रवर्तिर्ज्वरात्यत्वं मुत्साहो गा
त्र[illegible]वं ॥ अधोवातप्रवृत्तिश्च निरामज्वरलक्षणं ॥२४॥ बलवत्कफजेरूपो बहूपद्रवकृज्ज्वरः ॥ असा
ध्य[illegible]न्यते यस्य शीघ्रमिंद्रियनाशनः ॥२५॥ ज्वरो बलवतः पुंसः स्वल्पदोषोनुपद्रवः ॥ सुखसा
ध्य[illegible]माख्यातः कृच्छ्रसाध्यस्ततोन्यथा ॥२६॥ पच्यमाने ज्वरे दोषे भवद्वेगोधिको भ्रमः ॥ मलप्रव
त्ति[illegible]धनः मुक्तेश्चैव प्रतापिता ॥२७॥ इति पक्वज्वरलक्षणं ॥ स्वेदोंगलाघवं कंडू मूर्छा न क्रस्य
पा[illegible]॥ क्षुदुत्साहो व्यथाहानिर्ज्वरमुक्तस्य लक्षणं ॥२८॥ अथ ज्वरचिकित्सा ॥ आमज्वरे तु भेष

५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ध्यं न शांतिमयं कदाचन ॥ दोषस्तेन विदग्धोयमत् विकाराकुरुतेवहून् ॥२९॥ तरुणः कथ्यते पूर्वं ज्वर सम
दिनावधिः ॥ सप्ताहं मध्यमः प्रोक्तो पश्चाज्जीर्णो निगद्यते ॥३०॥ नौषधं वमनं दद्यात्छोधनं वा नवज्वरे
औषधेनाकुलीभूतो दोषो जेतुं न शक्यते ॥३१॥ नवज्वरे दिवानिद्रा आयामाभ्यंगमैथुनं ॥ स्नानं क्रोधं
प्रवातं च यत्नेन परिवर्जयेत् ॥३२॥ शीतं जलं न पेयं स्यात् ज्वरे सामे विशेषतः ॥ अतः शृतं जलं देयं
यतो दोषहरं लघुः ॥३३॥ नवमज्ञाजने काथ्यं यथादोषं जलं तमः ॥ शीतं कृत्वानुपेयं स्यादन्यथा दो
षहारदं ॥३४॥ पित्तघ्नं पादहीनं यत् वातघ्नं चार्धशोषितं ॥ कफघ्नं पादशेषं स्यात् तोयमेव शृतं
भवेत् ॥३५॥ दिवा यत् क्वथितं तोयं रोगरात्रौ न तत्पिबेत् ॥ रात्रौ शृतं दिवानेव यतस्तद्गुरु जायते ॥
३६॥ त्रिगुणेन कृतमात्रे तु ज्वरे सामे विशेषतः ॥ आनेव मुनयो गम्यस्य वा मनुं प्राह वाग्भटः ॥३७॥ व
मनं प्रथमं कृत्वा ततो लंघनमाचरेत् ॥ विधाय लंघनं पूर्वं वमनं न समाचरेत् ॥३८॥ बाले वृद्धे च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स०
४५

गु र्वीले श्रमकर्षिते ॥ शस्तं न लंघनं वातकामक्रोधसमाश्रि ॥ ४९ ॥ शात्वा दोषं बलं धीमान् लंघनानि
स ॥ वेगज्वरे तथाभूतज्वरेपि नज्वरे पुन ॥ ५० ॥ आतुरे क्रोधजे चापि भयकामज्वरेपि च ॥ एते षां लंघनं
वै कृमि तद्धावन ॥ ५१ ॥ इति आत्रेयात् ॥ दोषे सति न दोषाय लंघनानि बहून्यपि ॥ कफक्लेशं च हृत्श्वास
हर र मुद्गता ॥ ५२ ॥ तंद्रा कुर्यादसंपूर्णं लंघनं विषमारज ॥ हृत्कंठमुखवैषम्यं विनाशः क्लमतंद्रयोः ॥
५ सुद्धो धो रुचिः कोष्ठलाघवं पूर्णलंघनं ॥ अरुचिः पर्वभेदांगमर्दस्तृष्णा बलक्षयः ॥ ५४ ॥ क्षुत्स्रना
शो क्र शोषे भूयिष्ठलंघने ॥ पचेत्प्रथममाहारं दोषानाहार संक्षये ॥ ५५ ॥ दोषक्षये नजोधातून् प्राणा
नू येसति ॥ तरुणं तु ज्वरं पूर्वं लंघनेन क्षयं नयेत् ॥ ५६ ॥ दोषक्षीणे समग्नेर्जो तनोर्दाढ्य पाचनं ॥
क्षी दि दोषस्य परिपक्वमलस्य च ॥ ५७ ॥ कोष्ठस्य परिशुध्यर्थं दद्यायुक्तं विरेचनं ॥ अबलस्य मलोर
क्ष स्य विरेचनं ॥ ५८ ॥ क्षीणस्त्री बालवृद्धानां न दद्यान्मलरेचनं ॥ ज्वरे क्षीणे लघौ देहे शिथिलेषु मले

४५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खुरं ॥ ४९ ॥ दोषं पक्वं विजानीयात्ज्वरे देयं तदौषधं ॥ प्रसन्नमुदरं नः पीता पात्रं कुर्यादधोमुखं ॥ ५० ॥ अधोमु
खस्य पात्रस्य दर्शनं रोगिणं नच ॥ अथ पाचनानि ॥ शालमूलमापिबेत्क्वाथं पाचनं मारुतज्वरे ॥ ५१ ॥ गडूचीपि
प्पली मूलं नागरैवा सतं पिबेत् ॥ पाचनं वापि बेहिल्व पाचनं मारुतज्वरे ॥ ५२ ॥ पिबेत्पित्तज्वरे मुस्तकटुकं
टुपैवैः कृतं ॥ पाचनं शीतलं कृत्वा क्षौद्रेण सह योजितं ॥ ५३ ॥ इति मुस्तकादि पाचनं पित्तज्वरे ॥ किराततिक्ता
मलकी फलं ह्रीवेर साधितं ॥ ५४ ॥ पिबेत्पित्तज्वरे क्वाथं ससौद्रं पाचनं परं ॥ मातुलुंगस्य मूलानां शृंग
वेरा जमोदयोः ॥ पिप्पलीनां च सक्षारः कषायः पाचनं कफे ॥ ५५ ॥ शृंगी मुस्तक भूनिंब गडूचीभिः श्र
तं जलं ॥ सर्वज्वरहरं पेयमामदोषस्य पाचनं ॥ ५६ ॥ एरंड मूल धान्याक शुंठीभिः साधितं जलं ॥ वस्तिसं
शोधनं पेयं शूला मार्जीर्णनाशनं ॥ ५७ ॥ नागरं धान्यकं देवदारु क्षुद्राद्वयान्वितं ॥ सर्वज्वरे मुखस्तवं पा
चनं ज्वरनाशनं ॥ ५८ ॥ इति पाचनानि ॥ भूनिंबबालमुस्तानि गडूची बृहतीद्वयं ॥ गोक्षुरः शालप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्व० स० पी[illegible]र पृष्टपर्णीविनागरं ॥५९॥ एभिः कृतं पिबेत्क्वाथं वातज्वरविनाशनं ॥ पिप्पलीरेणुकाद्राक्षाशतपु
४६ ष्पा[illegible]सारिवा ॥६०॥ एवं गुडान्वितं क्वाथं पिबेत्क्वाथं ज्वरापहं ॥ गडूचीशतपुष्पा च सारिवा सपुनर्नवा ॥६१॥
द्राक्षान्विति गुडोपेतः क्वाथो वातज्वरापहः ॥ गडूची समसुष्पा च सारिवा समकुंभकारी च द्राक्षा च त्रायमा
णकं ॥ एतत् क्वाथो गुडोपेतो वातज्वरविनाशनः ॥६२॥ कर्णिकारो बलोरास्नाशाल्मली कुंभकारिका
विरवं बेति गुडः क्षौद्रः पुनः क्वाथो मरुत्ज्वरे ॥६३॥ गडूचिका [illegible]सूर्ये पंच निष्पीडितो रसः ॥ पीतो
गुडान्वितो हंति ज्वरं वातसमुद्भवं ॥६४॥ इति वातज्वरौषधानि ॥ [illegible]ज्वरौषधानि ॥ हर्म्ये मनोरमे चं
द्रसमरश्मिसमुज्वले ॥ चंदनांकक्षितिसुप्तात्पि नानि श्रेतिवास[illegible] ॥६५॥ यवासकटुकी वासा प्रियं
गुः पर्पटान्वितः ॥ किराततिक्तकं चैति कषायः शर्करान्वितः ॥६६॥ पीतः पित्तज्वरं हंति तृष्णादाहसम
न्वितं ॥ केवलः पर्पटः पित्तज्वरं हंति सकिंपुनः ॥६७॥ रक्तचंदनबालकाभ्यां शुंठ्या च सह योजितः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग मलकोपेतः प्रशस्तः पर्प्पटः सदा ॥६८॥ दाहशोषभ्रमोपेतः पित्तज्वरनिवृत्तये ॥६९॥ पि
त गुडूचीकल्कः शर्करयान्वितः प्रशस्यतेपित्तदोषः सर्वोपद्रवनाशनः ॥७०॥ द्राक्षयाकटुकी
नि क्षिकाभिः सन्तर्पयः ॥ पिबेन्निःशोषितंसर्वं पित्तज्वरनिवृत्तये ॥७१॥ पटोलयवधाः क्वाथः
पा तोद्रेणसंयुतः ॥ पित्तज्वरंनिहंत्याशु तृष्णादाहान्विताअपि ॥७२॥ चंदनंकटुकीद्राक्षामधुकं
स नकं ॥ चंदनादिगणोहन्यात्ज्वरंदाहमरोचकं ॥७३॥ वालमुस्तकगडूचिधान्यकंमक्षिकान्वि
त रचंदनं ॥ वासकंचसहशर्करेजयेत् क्वाथएषबहुपित्तवेदनां ॥७४॥ भूधात्रीयवाःसमंजिष्ठा
कुं लमुशीरकं ॥ कृताजलप्लुतंरात्राबुषितंमधुसंयुतं ॥७५॥ प्रातःकालेपिबेज्जंतुःपित्तज्वर
नि ये ॥ वासकाधारसंभ्रांतःपिबेत्क्षौद्रसमन्वितं ॥७६॥ रक्तपित्तज्वरंहंतिसंजयेनाशुमानवः ॥
कर ाद्रवंपुष्यंसारिवातिलचंदनं ॥ तत्सर्वंकांजिकसंघृष्टंलिप्तंशिरसिनाशनं ॥७७॥ कपित्थंस

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

व०स० तोध्रं विदारी बीजपूरकं ॥ एतान्सिद्धा शिरोलिप्तं तृष्णा दाहविनाशनं ॥ ७८ ॥ नरस्योत्तानसुप्तस्य
४७ सेके कांस्यभाजने ॥ पतंती शीततोयस्य धारा दाहं विनाशयेत् ॥ ७९ ॥ उत्फुल्लकमलावाप्य श्वार
मगीदृशः ॥ जलयंत्रगृहा रम्याः पित्तदाहहराः स्मृताः ॥ ८० ॥ इति पित्तज्वरचिकित्सा ॥ अथ श्ले
ष्मौषधानि ॥ त्रिफलातिविषा रोध्रकुटजं मुस्तचित्रकं ॥ कटुकी कर्णिकारं च पटोलं च समांशकैः
ः संसाधितं क्वाथं पिबेत्सौद्रेण संयुतं ॥ ८१ ॥ श्लेष्मज्वरं जयेत्क्वाथं सकासं कामलान्वितं ॥ सा
तविषा कुष्ठ देवदारुयवासकैः ॥ मुस्तान्वितैः कृतः क्वाथः पीतो हन्यात्कफज्वरं ॥ ८२ ॥ कट्फ
लली शृंगी पौष्करं मधुसंयुतं ॥ एष श्लेष्मज्वरं कासं लेहः श्वासं च नाशयेत् ॥ ८३ ॥ पिप्पली
पतालीढा हन्ति कफज्वरं ॥ प्लीहहिक्काश्वासकासां बालानां च प्रशस्यते ॥ ८४ ॥ आमलक्याः
पथ्या सैंधव चित्रकं ॥ गणोयं चूर्णितो हन्ति ज्वरं श्लेष्म मरोचकं ॥ ८५ ॥ कट्फलं ओहिषं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शुंठी भार्गी पर्पटं मुस्तकं ॥ भृंगी धान्य वचा पथ्या देवदारु समैः कृतः ॥ ८६ ॥ एभिः क्वाथो निहंत्याशु
कास श्वास कफज्वरान् ॥ इति कफज्वरचिकित्सा ॥ अथ वातपित्तज्वरे औषधानि ॥ त्रिफला वासका रास्ना
शाल्मली कर्णिकारकः ॥ एषां क्वाथो हरेदाशु वातपित्तोद्भवं ज्वरं ॥ ८८ ॥ भूनिंब कटुकी धात्री द्राक्षा क
चूर्णिकामृता ॥ एतत्क्वाथो गुडोपेतो वातपित्तज्वरापहः ॥ ८९ ॥ कंटकारी बला रास्ना त्रायमाणा मृ
तांकुसैः ॥ मसूरैः क्वथितः क्वाथो वातपित्तज्वरं जयेत् ॥ ९० ॥ गडूची मुस्तकं शुंठी पर्पटं सकिरातकं
पंचभद्रः कषायोयं वातपित्तज्वरं हरेत् ॥ ९१ ॥ इति वातपित्तज्वरचिकित्सा ॥ अथ वातश्लेष्मज्वरे औष
धानि ॥ त्रिफला कुटजं बीजमरिष्टः कटुकामृता ॥ किराततिक्तकं मुस्तं पटोलं च समांशकैः ॥ ९२
एभिः सिद्धं पिबेत्क्वाथं वातश्लेष्मज्वरापहं ॥ कंटकारिकामृता शुंठी पुष्कराह्वैः समांशकैः ॥ ९३
कृतः क्वाथो हरेच्छ्वासं कफवातोद्भवं परं ॥ देवदारु सभूनिंब पर्पटं कट्फलं घनं ॥ ९४ ॥ भार्ङ्गी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लु०स० ५८

ान्याकं हरितक्यग्निनागरं वा ॥ एवं क्वाथो मधुयुतो पिबेत्तु हिंगुसमन्वितं ॥९५॥ कफवातज्व
रे श्वासे संगलग्रहे ॥ किराततिक्तकं शुंठी गडूची मुस्तकं समं ॥९६॥ चातुर्भद्रकमित्याहुः कफवात
ा ॥ पिप्पली नागरं चव्यं पिप्पलीमूलचित्रकं ॥९७॥ दीपनीयः स्मृतः क्वाथो वातश्लेष्मज्वरा
तुः पलं च दारु भल्लातानि चतुः पलं ॥ ४० ॥ सूरणस्य पलान्यष्टौ सर्वमेकीकृतं पचेत् ॥ जलद्रोणे चतुर्थांशं
गृह्णीयात्क्वाथमुत्तमं ॥ ४१ ॥ पचेत् क्वाथं गुडं दत्वा चतुः षष्टिपलोन्मितं ॥ घनीभूते ततस्तस्मिन् चूर्णमेत
द्विनिः क्षिपेत् ॥ ४२ ॥ चित्रकं त्रिवृता दंती तेजोह्वेति पलं पलं ॥ पृथक् त्रिपलिका देया मोचैला पत्रकं त्वचं ॥
४३ ॥ एवं सिद्धो भवेत् श्रीमान् बाहुशालो गुडः शुभः ॥ सर्वान्यर्शांसि जयति गुल्मान्वातोदरं तथा ॥ ४४ ॥ पां
डुरोगप्रतिश्याय ग्रहणीक्षयपीनसान् ॥ हलीमकं प्रमेहांश्च जयेच्छ्रीपरसायनः ॥ ४५ ॥ इति बाहुशालो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च०स०
७४

गुडः ॥ वृद्धदारक भल्लातकशुंठीचूर्णं नियोजितः ॥ सगुडो मोदको हन्यात् षड्विधार्शकृतां रुजं ॥४६॥ इति
वृद्धदारकमोदकः ॥ शुष्कसूरणचूर्णस्य भागान् द्वात्रिंशदाहरेत् ॥४७॥ भागान् षोडश चित्रस्य शुंठ्या भाग
चतुष्टयं ॥ द्वौ भागौ मरिचस्यापि सर्वाण्येकत्र चूर्णयेत् ॥४८॥ गुडेन पिंडिकां कुर्यात् अर्शसां नाशिनी परं ॥ इ
ति सूरणपिंडी ॥ सूरणो वृद्धदारश्च भस्मकः षोडश भागकौ ॥ मुशली चित्रकौ ते यावष्ट भागमितौ पृथक् ॥४९
भल्लातपिप्पलीमूलं विडंगं नागरं कणा ॥ शिवा बिभीतकं धात्री तालीसं च पृथक् पृथक् ॥५०॥ चतुर्भागप्र
माणानि त्वगेला मरिचं तथा ॥ द्विभागमात्राणि पृथक् सर्वमेकत्र चूर्णयेत् ॥५१॥ द्विगुणेन गुडेनाथ वट
कान् कारयेद्भिषक् ॥ प्रबलाग्निकरा ह्येते प्रबलार्शोविनाशनाः ॥५२॥ ग्रहणीवातकफजां श्वासकासक्ष
यामयं ॥ प्लीहानं श्लीपदं शोफं हिक्कामेहं भगंदरं ॥५३॥ विहन्युः पलितं चैव वृष्याः मेध्या रसायनाः ॥ इ
ति सूरणवटकः ॥ पलत्रयं शृंगवेरं तालीसं च त्र्यमूषणं ॥५४॥ पथ्यगोकेक पलिकं पिप्पल्यास्त्कः पलद्वयं ॥

७

147

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्विपलं पिप्पलीमूलं पलार्द्धं नागकेसरं ॥५५॥ एलाकर्षमिता ग्राह्या पत्रकं तगुशारकं ॥ प्रत्येकमर्द्धकर्षांशा कुडु
स्त्रिंशत्पलोन्मितः ॥५६॥ सचूर्ण्य गुटिका कार्या प्राणदा इति विश्रुता ॥ भोजनात्प्रथमं खादेत्पश्चाद्वापि यथाब
लं ॥५७॥ जलं वानु पिबेद्धुद्धा यूषसाररसासवं ॥ वातपित्तकफोत्थानि त्रिदोषजनितान्यपि ॥५८॥ रक्तजान्यपि
चार्शांसि सहजान्यपि यानि च ॥ हन्युस्तानि समस्तानि वातरोगान् गलग्रहान् ॥५९॥ पाण्डीयं मूत्रकृच्छ्रं च
मंदाग्निं विषमज्वरं ॥ हृद्रोगं पांडुरोगं च क्रिमिं चाशु विनाशयेत् ॥६०॥ गुटिकेयं सुधातुल्या सर्वरोगविना
शिनी ॥ शुंठ्याः स्थाने भयां दद्याद्विड्ग्रहे पित्तवायुजे ॥ प्राणदेयं सितां दद्यात् चूर्णं तस्मा चतुर्गुणं ॥ अम्ल
पित्ताग्निमांद्यादौ प्रयोज्या गुदजातुरे ॥६२॥ इति प्राणदा गुटिका ॥ पलानि पंच पथ्यायाः पलमेकं तु जी
रकं ॥ पलमेकं तु मरिचं पलमेकं च पिप्पली ॥६३॥ द्विपलं पिप्पलीमूलं लवणं कं च पलत्रयं ॥ चतुःपलं त्रि
त्रकं च शुंठ्याश्च पलपंचकं ॥६४॥ द्विपलं च यवक्षारं अरुष्का ष्टपलानि च ॥ सूरणं षोडशपलं सर्वमेक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल० स० त्रचूर्णयेत् ॥ गुडं चूर्णाद्द्विगुणितं दत्वा तु वटकान् शुभान् ॥ कुर्यादक्षप्रमाणांस्तु प्रातरेकं तु भक्षयेत् ॥ ६६ ॥
७५ मन्थं वा सलिलं वापि कल्पयेदनुपानकं ॥ ग्रहणीमग्निमांद्यं च पांडुरोगं च नाशयेत् ॥ ६७ ॥ अर्शांसि वातिघो
राणि सर्वाण्यपि विनाशयेत् ॥ कांकायनेन कथिता वटिकार्शोविनाशना ॥ ६८ ॥ शस्त्रक्षाराग्निभीता
नां अर्शसां तु हितैषिणां ॥ इति कांकायनवटकः ॥ कुटजत्वक्तुलामार्द्रां जलद्रोणे पचेत्सुधीः ॥ कषायं पा
दशेषं च गृहीत्वा वस्त्रगालितं ॥ ६९ ॥ त्रिंशत्पलं गुडं चात्र दत्वा भूयः पचेद्भिषक् ॥ सांद्रीभूतं च तं ज्ञात्वा चूर्णमि
मं विनिक्षिपेत् ॥ ७० ॥ भल्लातकं प्रतिविषा त्रिकटु त्रिफला तथा ॥ वालकं च विडंगानि पाठा बिल्वं कपि
त्थकं ॥ ७१ ॥ वचेंद्रयवचित्राणि प्रत्येकं पलमात्रकं ॥ घृतस्य कुडवं देयं शीते च कुडवं मधु ॥ ७२ ॥ जये
द्वेषावलेहस्तु सर्वाण्यर्शांसि वेगतः ॥ अर्शोद्भवान् तथा रोगान् अतीसारमरोचकं ॥ ७३ ॥ ग्रहणीर
क्तपित्तं च पांडुरोगं च कामलां ॥ कासश्वासाम्लपित्तानि निहन्यात्त्वप्रवाहिकां ॥ ७४ ॥ आतंतक्रं द
७१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धिघृतमारनाथैलमथापिच ॥ अनुपाने प्रयोक्तव्यं जीर्णे स्मिन्भोजनं चरेत् ॥ ७५ ॥ पथ्याशी च भवेन्नित्यं सर्व
र्शेभ्यो मुच्यते ध्रुवं ॥ इति कुटजाद्यावलेहः ॥ कुटजत्वक्बीजनागकेसरोत्पललोध्रकैः ॥ साधितं धातकी
युक्तैः रक्तार्शःशूलजिद्घृतं ॥ ७७ ॥ इति कुटजाद्यं घृतं ॥ चव्यं कुस्तं बरूक्षारं पाठाव्योषं च सैंधवं ॥ विडंग
पिप्पलीमूलं यवानी बिल्वचित्रकं ॥ ७८ ॥ पथ्यां पिष्ट्वा च चूर्णेन घृतमेतेन साधयेत् ॥ शकृद्वातानुलोमार्थं
क्षिपेद्दधि चतुर्गुणं ॥ ७९ ॥ प्रवाहिकां मूत्रकृच्छ्रं गुदभ्रंशं परिस्रवं ॥ गुदवंक्षणशूलं च हन्यादेतद्घृतं ध्र
ध्रुवं ॥ ८० ॥ इति चव्याद्यं घृतं ॥ कासीसं सैंधवं कृष्णां शुंठीं कुष्ठं च लांगली ॥ मनःशिला चित्रकं च विडंग
हयमारकं ॥ ८१ ॥ दंती कोशातकीबीजं हेमाह्वां हरितालकं ॥ कार्षिकैः कल्कितैरेभिस्तैलप्रस्थमिमं पचे
त् ॥ अर्कस्नुह्योः क्षीरं प्रदद्याच्च पलं पलं ॥ चतुर्गुणं च गोमूत्रं दत्वा संसाधयेद्भिषक् ॥ ८२ ॥ खरना
देन कथितं मुनिना तैलमुत्तमं ॥ अभ्यंगाद्भ्राशयेदेतदर्शांसि सुबहून्यपि ॥ ८३ ॥ छिन्नंती क्षारवन्मू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वै०स० ला लबलिं चैव नकृषयेत् ॥ इति कासीसाद्यं तैलं ॥ शिरीषहरिद्रानीमूलैः सर्वत्र न्वतुरं ॥ ८७॥ नाभिलेपेन स
७६ सा हालतं स्यर्शांसि मूलतः ॥ चित्रकार्कत्रिकटुकं सेहुंडदुग्धमर्दितं ॥ ८८॥ हन्यादर्शांसि लेपेन क्षारकर्म करोति हि ॥
निशाचूर्णस्नुहीदुग्धे भावितं यस्तु नश्यन्तः ॥ छिन्नं तत्तदृढं सूत्रं कुष्ठमर्शो भगंदरं ॥ ९०॥ शुद्धसूतं पलैकं तु
शुद्धगंधं पलद्वयं ॥ मृतं ताम्रमृतं लोहं द्वयमेतत्पलत्रयं ॥ ९१॥ त्र्यूषणं लांगली दंती बिल्वं चैव सचित्रकं ॥
प्रत्येकं द्विपलं ग्राह्यं सैंधवं पलपंचकं ॥ ९२॥ द्वात्रिंशत्पलगोमूत्रं स्नुहीक्षीरं च तत्समं ॥ मद्वग्निना पचेत्
स्थाल्यां यावत्पिंडतां व्रजेत् ॥ ९०॥ खादेन्माषद्वयमितं रससूर्यकुठारकं ॥ मरिचं पिप्पली कुष्ठं सैंधवं
जीरनागरं ॥ ९१॥ वचा हिंगु विडंगानि पथ्या वह्निरजमोदकं ॥ एतेषां कारयेत् चूर्णं चूर्णस्य द्विगुणं गुडं ॥ ९२॥
खादेत्कर्षमितं चानुपिबेदुष्णजलं ततः ॥ सर्वान्यर्शांसि नश्यंति वातजानि विशेषतः ॥ ९३॥ इति सूर्यकुठा
ररसः ॥ मंदाग्निमाद्यकृच्छ्रं बलहानिकरं च तत् ॥ अन्नपानौषधं सर्वं तत्र सेव्यं सदार्शसैः ॥ ९४॥ पिष्टा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्र मम्लं च क्षंच वा स्त कंतक्र स्तरणं ॥ अर्शो रोगयुतो रूक्षो संग्रहाच्चा विवर्जयेत् ॥९५॥ व्यवायं वेगरोधं च क्रु द्दिनो
त्कटिवासनं ॥ यानं या नं दिवास्वप्नं रात्रौ जागरणं तथा ॥९६॥ यथास्वदोषं कृष्णात्रेनिस मर्शोपुनस्त्यजेत् ॥ औष
धान्यादिमस्तूर्वप्रोक्तमर्शोनिबर्हणं ॥९७॥ तदेनवर्मकीलानां कार्यं शेषविधानतः ॥ इति श्री लक्ष्मणोत्सवे ग्रंथे अ
र्शोरोगचिकित्साकथनं नामाष्टादशोध्यायः ॥१८॥ अथाजीर्णविषूचिकादीनां चिकित्सामाह ॥ कोष्ठाग्निश्चतुष्प
कारो मंदस्तीक्ष्णः पित्तेन जायते ॥ विषमः पवासुना याति समैर्दोषैः समो भवेत् ॥१॥ विषमो मारुतगदान् कुर्यात्ती
क्ष्णः पैत्तिकान् ॥ कफान्मंदस्तथा मंदस्स म आरोग्यमावहेत् ॥२॥ कदाचित् सम्यगेतेनैव कदाचिद्दु ऊपच्यते ॥ ये
नाग्निनास विषमो मंदाग्निनैव पावक ॥३॥ येन मात्राधिकं भुक्तं अपि शीघ्रं पच्यते ॥ तीक्ष्णोग्निः सम्मोग्नि
स्तु मितां हारे स्तु पावकः ॥४॥ स्वस्थानेन तु यदा पित्तं मारुतानुगतं भवेत् ॥ तदा संधुक्षयेदग्निं तीव्रं तं भस्मकं
विदुः ॥५॥ अजीर्णं जायते संबुपानात् स्वप्नविपर्ययात् ॥ लोभक्रोधभयेर्ष्याभिः शोकेनैव च नयः उत्तः ॥ य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु० सा० दन्नं पुरुषो भुंक्ते तेनाजीर्णः प्रजायते ॥ यस्मिन्नजीर्णे तु रतिः शुचीभिरिव मारुतः ॥ ७ ॥ अंगानि सा विशूची
७७ ति कथ्यते च भिषग्वरैः ॥ यस्माद्दोषाद्भवेदामं यस्मिन्देशे च वेदना ॥ ८ ॥ विकारैः स्वस्वदोषोत्थैः कुर्यात्तत्र विशे
षतः ॥ यस्यावनखदंतोष्ठौ भग्ननेत्रोऽल्पचेतनः ॥ ९ ॥ क्षामः स्वरभ्रंशस्तथा गस्त्यात्तृछर्दिमान्न स न जीवति ॥ प्र
कृतिस्थं हि यां योगः स जीवेद्योनुपद्रवः ॥ १० ॥ इत्यामाजीर्णनिदानं ॥ समाग्नेः पालनं कुर्यात् विषमे वात
शोधनं ॥ तीक्ष्णोग्नौ पित्तशमनं मंदे श्लेष्मप्रतिक्रियां ॥ ११ ॥ तीक्ष्णोग्नौ न त्रिषेवेत गुरु स्निग्धं च पड्वेत ॥ य
त्तु श्लेष्मकरं भुक्तं दिवानिद्रा न शस्यते ॥ १२ ॥ आमाजीर्णे वमिः कार्या वचालवणवारिणा ॥ धान्यनागर
योः क्वाथः पेयो वाजीर्णशूलहृत् ॥ १३ ॥ स्वेदं कुर्याद्विविष्टंभे पिबेद्वा लवणोदकं ॥ रसशेषे दिवानिद्रां लंघ
नं च समाचरेत् ॥ १४ ॥ व्यायामस्त्रीवाहनाध्वक्लांतान् शूलतृषार्दितान् ॥ श्वासातिसारहिक्कार्तान्क्षतक्षी
णाकफार्दितान् ॥ १५ ॥ रुद्धान्नजीर्णिनो रात्रौ वृत्तिशान्मदपीडितान् ॥ आहाररहितान्वातपीडितान्स्वाप

153

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ये द्विधा ॥१६॥ इक्षुरस्यकानि पिष्टानि गुरूण्यम्लानि भोजयेत् ॥ भस्मके श्लेष्मकृत् क्षौद्रं माहिषं च पयो घृतं ॥१७
हरीतकीकणा चूर्णं सौवर्चलयुतं पिबेत् ॥ क्षौद्रेणोष्णांबुना वापि रसादोषगणं बुधाः ॥१८॥ अग्निमांद्यम
जीर्णानि तथाध्मानमरोचकं ॥ शूलं च वातगुल्मं च शीघ्रमेवमपोहति ॥१९॥ हिंग्वग्रगंधा चपला शृंगवेरय
वानिका ॥ पथ्याचित्रककुष्ठानि भागवृद्ध्या यथोत्तरं ॥२०॥ चूर्णमग्निमुखं नाम पिबेत्कोष्णेन वारिणा ॥ द
ध्ना वा मस्तुना वापि सर्ववातहरं परं ॥२१॥ अजीर्णमुदरं चैव गुल्मं शूलगुदांकुरान् ॥ उदावर्तं क्षयं कास
श्वासं चाशु विनाशयेत् ॥२२॥ इत्यग्निमुखचूर्णं ॥ हिंगुत्रिकटुसिंधूत्थाजमोदाजीरकद्वयं । समभागं
कृतं चूर्णं साज्यं प्राक्ग्रासभक्षितं ॥ अग्निमांद्यं नाशयति वातरोगान्यपोहति ॥२३॥ हिंगुगोषं वचापा
ठा हिंगुसारामलसटीशिवा ॥ लवणान्यथ धान्याकं हपुषा जीरदाडिमं ॥२४॥ वृक्षाम्लरुक् दीप्यकं च समा
न्येतानि चूर्णयेत् ॥ मातुलिंगार्द्रकरसैर्भावितमितोष्णवारिणा ॥२५॥ पीतं चूर्णं हरेत्तूर्णं अग्निमांद्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु०सं० मरीचकं ॥ ग्रहण्यर्शः प्लीहगुल्मानाहगलग्रहान् ॥ २६ ॥ हिंग्वादि ॥ हरीतकीकणाशुंठी चूर्णं त्रिसमम्
७८ उच्यते ॥ अग्निमांद्यं हरेदेतत् दोषत्रयमपोहति ॥ २७ ॥ त्रिसमं चूर्णं ॥ शुंठीकृष्णाविडंगानि शालिपर्णिकि
रंजकं ॥ अभयं चित्रकं चेति चूर्णं शर्करयान्वितं ॥ २८ ॥ कारयेद्रुचिकासम्यक् जठरानलवर्द्धनं ॥ वडवानल
नामेदं सर्वाजीर्णविनाशनं ॥ २९ ॥ इति वडवानलनामचूर्णं ॥ लवंगशुद्धकर्पूरमेलात्वक्नागकेसरं ॥ कृ
ष्णागुरुत्वगाक्षीरजातीफलमुशीरकं ॥ ३० ॥ मांसीनालोसलंकृष्णामस्तुगीकृष्णजीरकं ॥ कंकोलं चंदनं वा
लं तगरं चेति चूर्णयेत् ॥ ३१ ॥ सर्वाणि तुल्यभागानि सर्वेभ्योद्वी सिता भवेत् ॥ लवंगाद्यमिदं चूर्णं राजार्हं
वह्निदीपनं ॥ बलप्रदं त्रिदोषघ्नं वृष्यं रोचनतर्पणं ॥ यक्ष्माणं तमकं श्वासं हिक्कां कासं च पीनसं ॥ ३३ ॥ हृ
द्रोगं कंठरोगं वाप्यतीसारं मुरःक्षतं ॥ पांडुप्रमेहग्रहणीरोगान् हंति न संशयः ॥ ३४ ॥ इति लवंगाद्यं चूर्णं
मरीचं नागचव्यानि तालीसं लवणानि च ॥ प्रत्येकमेकभागानि पिप्पलीमूलचित्रकौ ॥ जीरकं तिंतिडीकं

७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चलक्षणेतिद्धिभागकं॥अजमोदाजलधरभद्रैलावदराणि च॥३६॥धामामद्वेतसोविश्वंप्रसेकंस्यात्त्रिभा
गकं॥सर्वौषधचतुर्थांशंदाडिमस्य पलं भवेत्॥३७॥द्रुमेभोनिशिलेभस्मसितादेसादृ मात्रया॥मुहाखां
डवकंनामचूर्णंविधिकरं परं॥३८॥अग्निदीप्तिकरंहृद्यंकासातीसारनाशनं॥हृद्रोगकंठजठरं मुखरोग
प्रणाशनं॥३९॥विश्वविश्वत्ताथाध्मानमर्शोगुल्मक्रमीनपि॥ऊर्ध्वंपूर्वविधंश्वासंचूर्णमेतद्व्यपोह
ति॥४०॥इतिमहाखांडवकंचूर्णं॥विडरूचिकजवानीजीरकद्वंद्वपथ्यात्रिकटुकमपिचतक्रवैमथ ज्ञाजमो
दैः॥सममिहितविडंगधान्यकंतिंतिडीकंमरमुनिगकूटकाकणाभोजनस्य॥४१॥इतिविडं दि॥ह्रु
षात्रिफलाचैवत्रायमाणंचपिप्पली॥हेमक्षीरीत्रिवृच्चैवराधालाकटुकावचा॥नीलिनीसैंधवंकृष्णाचू
र्णमेतत्समांशकं॥उष्णोदकेनमूत्रेणदाडिमत्रिफलारसैः॥४२॥यथायोग्यंपिबेत्प्रातश्चूर्णमग्निकरं
परं॥अजीर्णप्लीहगुल्मेषुशोफार्शोविषमाग्निषु॥४३॥हलीमकामलापांडुकुष्ठाध्मानोदरेष्वपि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लं०स० ७१ सेवनाय मिदं चूर्णं सर्वरोगविनाशनं ॥ ४५ ॥ इति हिंगुपाद्यं चूर्णं ॥ यवानीलशुनं मोषं हिंगु सैंधवगंधकैः
भावयेत्त्रिवुकद्रावैः हन्यात्सर्वाः विशूचिका ॥ ४६ ॥ करंजबीजं त्रिकटु मातुलुंगजटा निशा ॥ अंजनं कांजि
केनैतद्विषूची हंति दारुणां ॥ ४७ ॥ इति विषूचिकांजनं ॥ त्रिंगु पिप्पली शुंठी पथ्या धात्री बिभीतकं ॥ वचा
गुडूची भल्लातं सद्विषं चात्र योजयेत् ॥ ४८ ॥ एतानि समभागानि गोमूत्रेणैव पेषयेत् ॥ गुंजाभा गुटि
का कार्या दद्यादार्द्रकजैः रसैः ॥ ४९ ॥ एकामजीर्णे गुल्मस्य द्वे विश्वास्य प्रदापयेत् ॥ त्रिसंख्या सर्पदष्टस्य
चतुर्थः सन्निपातिनः ॥ ५० ॥ गुटिका जीविनी नाम संजीवयति मानसं ॥ इति संजीविनी गुटिका ॥ ५१ ॥
त्यजेद्रजोणीविण्मूत्रवातवेगविधारणं ॥ पिपासोद्गाररोधं च आगरो लूटकासनं ॥ ५२ ॥ इति श्रीलक्ष्म
णोत्सवे ग्रंथे अजीर्णनिदानचिकित्साकथनं नाम एकोनविंशोध्यायः ॥ १९ ॥ अथ क्रिमिरोगनिदानं चि
कित्सामाह ॥ विविधाः कृता ज्ञेया ते बाह्याभ्यंतरोत्थिताः ॥ बाह्या मलोद्भवा ज्ञेया केशनखादि संश्र

157

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

या ॥१॥ तिलसंस्थाननवर्णाः स्युर्यूकालिख्यादिनामकाः ॥ कुर्वन्ति कोठपिटिकागंडूगंडांश्च तेबहिः
स्थाः ॥ अंतस्थिताः कफासृक्विट्संभवास्त्रिविधा मताः ॥ अजीर्णाम्लद्रवगुडपिष्टान्नमधुराशनेः ॥३॥ कृमा
मयविरुद्धान्नदिवास्वप्नादिहेतुभिः ॥ पुरीषजाः शाकमाषपिष्टान्नलवणाशनैः ॥४॥ बहुनामप्रभेदास्युर्नानो
पद्रवकारिणः ॥ ज्वरो भ्रमोतिसारश्च श्वासः शूलविवर्णता ॥५॥ भक्तद्वेषश्च हृद्रोगो विकाराः कृमिसंभवाः
कफजास्युर्मांसदुष्टिस्रक्माषपयोगुडैः ॥६॥ विरुद्धाजीर्णशाकाद्यैः कृमयः स्युरसृग्भवाः ॥ इति कृमि
निदानं ॥ अथ चिकित्सा ॥ खदिरत्रिफलाव्योषश्यामोऽग्न्याऽरिष्टकौटजं ॥ चूर्णं गोमूत्रसंयुक्तं कृमिजा
लंव्यपोहति ॥८॥ मुस्तामरदुत्रिफलाखुकर्णीसोभांजनैर्यो विहितः कषायः ॥ कृष्णाविडंगोत्कटजोविमि
श्रो हन्यात्कृमीनूर्द्धमधःस्थितांश्च ॥९॥ रसं पलाशबीजस्य पिबेत्क्षौद्रेण संयुतं ॥ विडंगामधुनोपेतं लि
ह्याद्वाकृमिनाशनं ॥१०॥ दाडिमीवल्कलक्वाथस्तिलतैलसमन्वितः ॥ पीतो दिनत्रयं कोष्ठकृमान्पातय

158

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लं॰ सं॰ ८० लीढकं ॥११॥ विवीघतं हरेत्स्यानान्तुद्रुमीनामाशयस्थितान् ॥ पक्वाशयगतांश्चैव कृमिं भिंदुशानेयीषा
१२॥ फलत्रयक्वाथदंतीत्रिवृतं लोध्रकैर्घृतं ॥ गोमूत्रेसाधितं हंति कृमिजालं न संशयः ॥१३॥ पिष्टैर्द्रलैस
सुकण्यां पिष्टैक मन्च पूपिकं ॥ विधाय भुक्त्वानुपिबेत्सौवीरं कृमिशांतये ॥१४॥ निंबपत्ररसः क्षौद्रोपे
तः पानात्कृमीन्हरेत् ॥ हरिद्रावाजलोपेतं चूर्णं पीतं कृमीन्जयेत् ॥१५॥ विडंगशिग्रुत्रिवृद्रु तद्रुले
मरिचेनच ॥ यवागूस्तक्रसिद्धास्य कृमिघ्नी ससुवर्चिका ॥१६॥ मंजिष्ठा कांजिकैः पिष्टा गोमूत्रे चाति
मुस्तकैः ॥ शिग्रुवाकुटुतैलेन लेपात्कापहा स्मृतः ॥१७॥ स्वरसो धत्तूरपत्राणां मद्यातां रक्तपत्रजः
पारदेन समायुक्तो लेपो यूकापहारकः ॥१८॥ शिरोरोगपिष्टदेहलिसेकटुतैलाक्तसक्तुभिः ॥ पतंति
कृमयः स्निग्धगुदे देशसमाश्रिताः ॥१९॥ कंकुभस्य प्रसूला विडंगं हलिनी तथा ॥ श्रीवेष्टकं शीरभ
ल्लातचंदनं रालसंयुतं ॥२०॥ धूपोयं श्रेष्ठगंधः स्यात्कृमश्वाकानां विनाशनः ॥ शय्यासु मत्कुणान्

159

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हंति मूर्द्धि यूकान्व्यपोहति ॥ २१ ॥ शुद्धसूतं सुगंधं विडंगमजमोदकं ॥ आलबीजं महानिंबं क्रमे
णाद्धिगुणी कृतं ॥ २२ ॥ चूर्णितं मधुना लीढं कीटमेहीरसो जयेत् ॥ निष्कमात्रः क्रमीन्सर्वान् मुस्ततोय
पिबेदनु ॥ २३ ॥ क्लिन्नान्नपानं मधुरं मक्षिकाभक्षणपयः ॥ श्रमाभावं दिवानिद्रां क्रिमिमान्संत्यजेत्स
दा ॥ २४ ॥ इति क्रिमिहरं ॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे क्रिमिचिकित्साकथनं नाम विंशतितमोऽध्यायः ॥
२० ॥ अथ पांडुकामलाहलीमककानां निदानं चिकित्सामाह ॥ मृत्तिकामद्यलवणातितीक्ष्णाम्लनि
षेवणात् ॥ पांडुरोगो हि वा स्यात्पाचूअवेत्संततमेहनात् ॥ १ ॥ दोषाः संदूष्य रुधिरं त्वचि कुर्वंति पां
डुतां प्रसेकं वापि मिलितांविकां शोथवत्तथा ॥ २ ॥ रुक्कूटशोथत्वक्स्फोटनिष्ठीवनमरोचकं
भ्रमारुवा कोशाश्रितं पित्तं प्रदुष्टं स्वस्य हेतुभिः ॥ ३ ॥ पीतविण्मूत्रतागात्रसादस्तत्पूर्वलक्षणं ॥ अन
येत्कामलारोगं पांडुतां सविशेषतः ॥ ४ ॥ हारिद्रनेत्रवक्त्रत्वं नखमूत्रपुरीषता ॥ तस्माद्दाहं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लु०स० द्विपग्लानिकामलालक्षणं भवेत् ॥५॥ कामलोपेक्षिताशोफमुक्तास्या कुंभकामला ॥ हरि
८१ तस्याव नेत्रत्वं पाडुरोगे भवेपरा ॥६॥ ज्वरस्त्री हर्षतृष्णायासरवभ्रमसुहल्लीमकं ॥ पांडुहृद्गंदनमस्वरपां
डुदर्शाच्चयोनरः ॥७॥ गुरुत्वबस्तिभ्यपृथुमान् पांडुरोगी नजीवति ॥ पीताभः कामलातीपोहरिद्वर्णोहि
लीमकी ॥८॥ पश्येत् पीतहरिद्रं तत्पश्चाद्दिसनजीवति ॥ अविरोक्षितदुष्टो पद्रववर्जितः ॥९॥ बलवा
न् पांडुरोगाद्यैः शीघ्रमेव समुच्यते ॥ इति निदानं ॥ अथ चिकित्सा ॥ हरिद्रासाधितं सर्पिस्तैलं वा त्रैफ
लं पिबेत् ॥१०॥ विरेचनं च कुर्वीत पांडुरोगी पथ्योदितं ॥ वातपांडुामयेस्निग्धस्तिक्तः पित्तामयेवि
धिः ॥११॥ कटुरूक्षकफोद्रूतेविमिश्रैः सर्वजे हितः ॥ त्रिफलाकटुकारिष्टामृतावासाकिरातजः
१२॥ क्वाथो जयेन्मधुयुतः पांडुरोगं सकामलं ॥ अयस्तिलत्र्योषकोलैः सर्वैस्तुल्यं तु माक्षिकं ॥१३॥
चूर्णयित्वा मधुयुतं विधेयो मोदको शिवः ॥ तक्रेणानु पिबेन्नस्यपांडुरोगं निरोधितं ॥१४॥ अवि

८

161

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रेणा नि हं स्येत तू तणराशिं यथानलः ॥ गोमूत्रे साधितं लोहमलं तप्तं पुनः पुनः ॥१५॥ तच्चूर्णं मधुसर्पि
र्भ्यां खादेद् तक्रसमन्वितं ॥ अग्निसंजननं येच्चूर्णं हन्ति पांड्वामयं दृढं ॥१६॥ शोथं च नाशयत्याशु दीपनं रुचि
कारकं ॥ गोमूत्रे भावितं लोहचूर्णं ससदिनावधिः ॥१७॥ पथ्याशी पांडुरोगार्त्तो ग्रहणीरोगशांतये ॥ त्र्यू
षणं चित्रकं मुस्तं विडंगं त्रिफलासमाः ॥१८॥ सर्वैस्तुल्यमयश्चूर्णं घृतक्षौद्रसमन्वितं ॥ लिह्यात् पांड्वाम
यी कुष्ठी कामलार्शोहृद्दामयी ॥१९॥ इति नवायसं चूर्णं ॥ अक्षायो मलशुंठीनां तिलानां च गुडान्वि
ता ॥ गुटिका पांडुरोगघ्नी शीघ्रं तक्रानुपानतः ॥२०॥ आदौ विरेचनं कार्यं स्नेहजं कामलामये ॥ ततः
प्रशामनी कार्या चिकित्सा वैद्यसत्तमैः ॥२१॥ हरिद्राभिष्टमधुकबलात्रैफलसाधितं ॥ ससीरं माहि
षं सर्पिः कामलां हन्ति दुस्तरां ॥२२॥ इति हरिद्राद्यं घृतं ॥ मूर्वाकुष्मांनिशादारुत्रिकापर्यटचंदनैः
अक्षमात्रैः पचेद्राज्यं प्रस्थं क्षीरं चतुर्गुणं ॥२३॥ पांड्वार्शः शोथविस्फोटरक्तपित्तज्वरान्हिनुत ॥ म

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स्र० वीर्यं घृतं ॥ कटुरोहिण्ययो धात्रिः त्रिफलादेहरिद्रके ॥ २४ ॥ तच्चूर्णं मधुसर्पिर्भ्यां लेहयेत्कामलापहं ॥ यो
८२ षधात्री निशालोहचूर्णं सौद्राज्यसंयुतं ॥ २५ ॥ लेहोऽयं शर्करोपेतः कामलामथ नाशयेत् ॥ पुनर्नवामृताशुंठी
तिक्ता दार्वी पटोलकैः ॥ २६ ॥ पथ्यारिष्टयुतैः क्वाथः पीतः शीघ्रमपोहति ॥ श्वयथुं चिरकालोत्थं पांडुरोगं
च कामलं ॥ २७ ॥ उदरं च महाघोरं नाशयेच्च हलीमकं ॥ रसोऽलिंबस्य दार्वी वा गडूच्या वा मधुप्लुतः ॥ २८ ॥
त्रिफलायाश्च वा पानात्कामलामपकर्षति ॥ द्रोणपुष्पीरसेनाक्ष्णो रंजनं कामलापहं ॥ २९ ॥ कर्कोटिकाज
टान्स्यघ्राणं वा जालिनीफलं ॥ अक्षकाष्ठकृतांगारं गोमूत्रैः परिपूरयेत ॥ ३० ॥ अक्षांगाराग्निसंतप्तं नस्यं
लोहमलं क्षिपेत् ॥ निर्वापयेत्समवारान् तप्तं तप्तं पुनः पुनः ॥ ३१ ॥ तद्धि चूर्णीकृतं क्षौद्रयुतं लीढं च सत्वरं पां
डुरोगान्निहंत्यासु कुंभिकां च हलीमकं ॥ ३२ ॥ अमृतायाः रसैर्युक्तं सिद्धं क्षीरे चतुर्गुणे ॥ निहन्यात्माक्षि
कं सर्पिः कष्टसाध्यहलीमकं ॥ ३३ ॥ धात्रीरसेन संयुक्तं पिबेत्श्यामा यथोचितां ॥ विरेकानंतरं भोज्यं

८:

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षौद्रोपेतं हलीमके ॥ ३४ ॥ मृदुक्तं पांडुरोगस्य कामलायाश्च भेषजं ॥ घृतं द्वे हरिद्रा घृतं तच्च सेव्यं हलीमके ।
३५ ॥ त्रिवृद्भागैः समैरेतैः क्षीरे संसाधितं घृतं ॥ विकारान्पित्तिकाञ्जातान्सर्वानेवव्यपोहति ॥ ३६ ॥ व्योषं
निशाद्वयं मुस्तं देवदारु पुनर्नवा ॥ त्रिफलायोरजः पाठा विडंगं वह्निकालिका ॥ ३७ ॥ नागकेसरयष्ठ्याह्वा पि
प्पली सातलांबुजे: ॥ क्षीरे संसाधितं सर्पिर्महाशानपकर्षति ॥ ३८ ॥ मंडूरं चूर्णितं सूक्ष्मं गोमूत्रेणगुणे पचे
त् ॥ त्रिफला त्र्यूषणं मुस्तं चव्यं चित्र विडंगकं ॥ ३९ ॥ ग्रंथिकां दार्विकादेवदारु तुल्यानि चूर्णयेत् ॥ सर्वाण्येतानि
मंडूरतुल्यान्येकत्र मेलयेत् ॥ ४० ॥ कर्षमात्रं तु नस्वादेत् गोतक्रैः सह भोजनं ॥ कर्तव्यं हंसमंडूरो रसः पांडु
मयं हरेत् ॥ ४१ ॥ शोफं हलीमकं चैवोरुस्तंभकामलामयं ॥ इति हंसमंडूरो रसः ॥ पांड्वादिरोगमुक्तोपि रात्रौ जा
गरणं त्यजेत् ॥ तीक्ष्णान्नं मैथुनं निद्रामायासं च बलामयं ॥ ४२ ॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे पांड्वादीनां चि
कित्साकथनो नामैकविंशोध्यायः ॥ २१ ॥ अथ रक्तपित्तस्य निदानं चिकित्सामाह ॥ तीक्ष्णक्षाराम्ललवणक

164

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०त्स० उष्माहारसेवने :॥ धर्मव्यायामशोकाध्वव्यायामैर्बहुसेविते :॥१॥ पित्तं विदग्धं तेनायातं संदूषयति शोणितं ॥
८३ प्रवर्त्तयेद्यथ ऊर्ध्वं द्विधावाप्युगपत्तदा ॥२॥ कर्णनेत्रास्यनासाभ्यो रक्तमूर्ध्वं प्रवर्त्तयेत् ॥ योनिलिंगगुदेभ्यो धो र
रोमकूपेभ्यश्च सर्वतः ॥ प्राग्रूपं तस्य वमनं शीतेच्छा सदनं तनोः ॥ श्वासे वैलोहगंधिश्च कंठधूमायनं भवेत् ॥५॥
रक्तपित्तं भवत्साध्यमेकमार्गभवेत्स्थितं ॥ स्वल्पोपद्रवहन्नातिवेगं च बलशालिनः ॥६॥ मंदाग्नेरतिवेगं यत्तदुर्ब
लस्य त्रिदोषजं ॥ रक्तपित्तमसाध्यं तत् मार्गद्वयविनिर्गतं ॥ दोषद्वयोत्थितं याप्यं यच्चाधोमार्गनिर्गमं ॥ साध्यं
तदूर्ध्वं प्रवर्त्तं स्यात् देषरोधारवंचयत् ॥७॥ दौर्बल्यं पांडुता दाहः श्वासकासमदज्वरः ॥ भोजनांते विदाहश्च
कासश्छर्दिर्हृद्व्यथा ॥८॥ वमथुः सकुशिरस्तापो भक्तद्वेषोग्निमांद्यता ॥ पूतिनिःश्वासनं मूर्छा विकारा
रक्तपित्तजाः ॥९॥ मांसक्षालननीलाभं कर्दमाभोनिभं वमेत् ॥ पक्वजंबूफलप्रख्यं पूयमेदोस्रस
न्निभं ॥१०॥ आरक्तमुत्पलधनुश्चित्रवर्णनीलं वमेच्च कं ॥ यस्य दृश्येत भवेद्रूपं तं दूरं वर्जयेद्भिषक् ॥११॥ य

165

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्तं वर्णमित्यं च यच्चान्नाति विङ्गालहरूतम्॥ यत्तु स्यो पद्रवं रक्तपित्तं साध्यं तदुच्यते॥१२॥ इति निदानं॥ अथ
चिकित्सा॥ आदावुद्रिक्तमिश्रं भोसध्राह्यं बलिनो हमतः॥ यतस्तु गदहृत्पीडापांडुगुल्मसीहादिकारकं॥१३॥ प्रो
ढागे बलियुक्तस्य कर्तव्यमुपतर्पणं॥ अतिप्रवृद्धरक्तस्य पथ्यं मरक्तपित्तिनः॥१४॥ विरेचनेनैरूर्ध्वमार्गमि
धो मार्गं च वांतिभिः॥ क्षीणस्य शमनेनैरसंजयेद्दन्मत्तबुद्धिमान्॥१५॥ सिताकुंभारिकायष्टी द्राक्षायुक्तं
विरेचनं॥ वमनं क्षौद्रमधुकयुक्तं प्रोक्तं भिषग्वरैः॥१६॥ विरेचनेनैत्रिवृत्स्यो क्वाथ वमने मदनं हितं॥ सर्वेषो केषुरो
गेषु रक्तपित्ते विशेषतः॥१७॥ चंदनोशीरह्रीबेरमुस्तापर्पटसाधितं॥ केवलं वाश्रितं तोयं रक्तपित्ते प्रशस्यते।
१८॥ पृश्निकोसत्तकिंगन्ने पृश्निपर्णी प्रियंगुभिः॥ पेयासता जलेसिद्धा प्रशस्ता रक्तपित्तिनां॥१९॥ कनिष्ठपं
चमूलेन वा बुद्धिमान्धो मार्गगामिनी॥ पेया हितार क्तपित्ते रक्तातीसारहृच्च युत्॥२०॥ वासा स्कंदरामन्ता का सम
हिकायास्तु पथ्य है॥ मधूपेतैः श्रितं तोयं रक्तवांतिनिवारयेत्॥२१॥ बालं बद्धं क्षीणमांसं बलं वा हित

166

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स्त्र० रेचनं ॥ अपि शोफे समुत्पन्ने स्तंभने: समुपाचरेत् ॥ २२ ॥ मृद्वीकावासकशिवा क्वाथः क्षौद्रसितान्वितः ॥
८४ रक्तपित्तश्वासकासान् पानाद्दाशु निवारयेत् ॥ २३ ॥ उत्पलं पद्मकं पद्मकेसरं सितया सह ॥ तंडुलांबुयुतं पीतं र
क्तपित्तमपोहति ॥ २४ ॥ वासायाः स्वरसो रोध्रफलिनीमृत्तिकांजनैः ॥ चूर्णितैः संयुतः क्षौद्रसंयुक्तो रक्तपित्तजं
२५ ॥ वृक्कनासारोमकूपपायुमेढ्रप्रवर्तितं ॥ योनिवितं योनिमार्गेभ्यः स्रवद्रक्तं निवारयेत् ॥ २६ ॥ शस्त्रक्षतस्य य
द्रक्तं न तिष्ठति रतं पुनः ॥ तदप्यनेन योगेन तिष्ठत्याश्वेव चूर्णितं ॥ २७ ॥ वासायाः स्वरसं क्वाथं कल्कं वा भक्षये
ज्वरः ॥ स पाससक्तपित्तकासेभ्यः शीघ्रमेव विमुच्यते ॥ २८ ॥ समभागा भार्गीयुता पथ्याक्षक्ष्मा वा वासककृतैः ॥ क्षौद्रे
यासहिमालीदारक्तपित्तं निवारयेत् ॥ २९ ॥ कफे सौगंधिर्गन्धो कषायैर्विविधैर्यदि ॥ न शाम्येद्रक्तपित्तं तु कु
र्यात्तापहं विधिं ॥ ३० ॥ छागं पयो गोक्षुरकैः शतावर्या च साधितं ॥ पद्मागमुग्धं तं सिद्धं रक्तपित्तं विनाशये
त् ॥ ३१ ॥ वटावरोहकैः सिद्धं क्षीरमाचरमेन वा ॥ नागरोत्पलवालैर्वा जयेद्रक्तमथो गतं ॥ ३२ ॥ पलाशावंतनिश्च

167

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेः रसैः संसाधितं घृतं ॥ लीढं मधुयुतं रक्तपित्तमाशु निवारयेत् ॥ ३३ ॥ ह्रीबेरनालकुमुदोत्पलपद्मानि भ
स्मसात् ॥ सकृत्के ग्रथितेरक्ते लेह्यं क्षौद्रघृतान्वितं ॥ ३४ ॥ सूक्ष्ममामलकीचूर्णं घृते भृष्टं विलेपनात् ॥ मूर्द्ध्नि रक्तं
हरेदाशु नासामार्गे विनिस्सृतं ॥ ३५ ॥ रसो दाडिमपुष्पोत्थो मस्त्वाम्रास्थिसमुद्भवः ॥ दूर्वायावापलंडोर्वा निस्या
न्नासास्रनाशनः ॥ ३६ ॥ नस्ये सितान्वितं क्षीरं नीरं वा शर्करान्वितं ॥ नियोजितं हरेन्नासारक्तस्रावं नरायः ॥ ३७
पक्वोदुंबरचूर्णेन संयुतं मधु वा गुडं ॥ भक्षयित्वा जयेन्नासारक्तस्रावं न संशयः ॥ ३८ ॥ एलापत्रत्वचार्
द्धाक्षापिप्पल्यार्द्धपलोन्मिता ॥ द्राक्षा खर्जूरमधुकसिताश्च पलसंमिता ॥ ३९ ॥ संचूर्ण्य क्षौद्रसंयुक्ता गु
टिकाः कल्पयेद् बुधः ॥ दापयेद् रक्तमात्रां तामेकैकां प्रतिवासरं ॥ ४० ॥ रक्तनिष्ठीवनं कासं हिक्कां कासं ज्वरं
वमिं ॥ भ्रमं मूर्छां मदं तृष्णां स्वरभेदं क्षतक्षयं ॥ ४१ ॥ शोफं प्लीहां श्वासं वातांश्च पार्श्वशूलमरोचकं ॥ गुटिका
नाशयेदेषा व्यासकपित्तनाशिनि ॥ ४२ ॥ एलादिगुटिका ॥ धूमगंधनिभो घोरो निश्वासे नाहगंधि

168

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स०
८५

त्रि॥ पाणिमात्रां तु मद्धीकां खादेद्विगुणशर्करां॥ ५३॥ दूर्वासोत्पलकिंजल्कमूर्वापद्मकचंदनं॥ मुस्तकोशी
रमंजिष्ठाकुंभारीशेलवालुकाः॥ ५४॥ रक्तचंदनपद्माक्षौ द्राक्षा श्रीभ्रंचकार्षिकैः॥ पिष्टैरेतैर्घृतप्रस्थम
जाक्षीरे च तुर्गुणे॥ ५५॥ तावत्साकं पचेद्वैद्यः पृथक्तंडुलवारिणा॥ सिद्धमाज्यं तु नस्यानात्रक्तं वांति
अपोहति॥ ५६॥ नासारक्तेश्रुते नैव नावनं परमं हितं॥ कर्णाक्षिरोमकूपेभ्यो मेढ्रास्यायोश्च योनितः
५७॥ शोणितं यदि निर्गच्छेत् घृतेनानेन पूरयेत्॥ तानि तान्येव रंध्राणि तेन रक्तं प्रशाम्यति॥ ५८॥ ना
तः परतरं किंचिद्रक्तपित्तविनाशनं॥ इति दूर्वाद्यघृतं॥ धर्मस्त्रीसंगतीक्ष्णाम्लकायामोष्णानि षेवणं॥
रक्तपित्ती परिहरेत् पथ्यान्यन्नपित्तकारकं॥ ५९॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे रक्तपित्तनिदानं चिकित्सा
कथनं नाम द्वाविंशो ध्यासः॥ २२॥ अथ क्षयरोगनिदानं चिकित्सा॥ धातुक्षयात् वातमूत्रविट्वे
गप्रतिरोधनात्॥ बलवद्विग्रहाद्यक्ष्मा भवेच्च विषमासनात्॥ १॥ दोषत्रयं प्रकोपयित्वा कफस्यात्रे ८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रधानता ॥ रसमार्गाग्निरुध्यंते दोषे स्तस्मात् कफाधिके ॥ २॥ अतीवसुरताशक्त्या क्षीणेरेतसि वातनः
सायंते धातवोन्येपि तस्मात् शुष्यंति मानुवः ॥ ३॥ अंगग्लानिस्तालुशोषकफष्टीवनपीनसाः ॥ कासश्वा
सो मदस्तंद्रा वह्निमांद्यं वमिश्रमः ॥ ४॥ शुक्लेक्षणत्वं मांसस्त्रीवांछास्यात्पूर्वलक्षणं ॥ स्वप्ने शुकाकृकसर
टकपिंगधूम्रशिखंडिनः ॥ ५॥ आरोहंति शुष्कशिरत्र यस्य शोषो भविष्यति ॥ नदीः सविजलाः पश्येत
रूक्षान् शुष्कान् द्रवार्द्रितान् ॥ ६॥ पर्वतान्भस्मसान्भूतान् शोषो यस्य भविष्यति ॥ करपादांसपार्श्वाभि
संतापो ज्वरपीडनं ॥ ७॥ सर्वांगेषु भवेच्चिह्नं रूपाण्येतानि राजयक्ष्मणः ॥ वातेशूलं स्वरभ्रंशः संकोचश्चां
शपार्श्वयोः ॥ ८॥ ज्वरो सकृत्निर्गमो दाहोतीसारस्याच्च पित्ततः ॥ शिरसो गौरवं भक्तद्वेषः कंठस्य
मर्दनं ॥ ९॥ कासः स्वेदादिन्विन्हानि जानीयात् कफकोपतः ॥ सर्वैरूपैरेभिः पीडितो यक्ष्म
वान् ॥ १०॥ ज्वरः पार्श्वार्ति कासार सार स्वरविभेदवान् ॥ भवेद्याद्यदि वा कासज्वरासृग्भिर्गमेयुतं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० ११ ॥ तैरौषधिभिर्भिषक् जयात् यदि छेदि मुलं प्रयशः ॥ बद्धाहारोपि यः स्नायमानो तीसार पीडितः ॥ १२ ॥ शू
८६ नमुष्कोदरश्चैव स यक्ष्मा नो न जीवति ॥ चिकित्सितो भिषक्श्रेष्ठैः पथ्यौषधयुतः सदा ॥ १३ ॥ सहस्त्रं दिवसान् जी
वेच्छोषरोगी सुखायाद्दि ॥ स्त्रयापस्नीण शुक्रस्य शोषो गात्रस्य पांडुता ॥ १४ ॥ जायंते धातवश्चान्ये दिशुष्यंति
यथाक्रमं ॥ गुरुमानस्य बलिभिर्द्रभ्यं चापि निगृह्णतः ॥ १५ ॥ कर्षतो वापि धावंतं वाजिनं वृषभं तथा ॥ दो
र्भ्यां नदीमन्तरतः पततो विषमोच्चतः ॥ १६ ॥ दृष्टार्थैः कर्मभिः क्रूरैः रन्यैरप्याहतस्य च ॥ उरस्यभिहते रो
गः स्यादुरक्षतलक्षणः ॥ १७ ॥ पार्श्वयोः पीडनं गात्रकंपो वीर्यबलक्षयः ॥ असकृच्छर्दि शिरः पीडा स्यादुर
क्षतलक्षणं ॥ १८ ॥ अक्षीणबलमांसाग्नेरचिरोत्थो नुपद्रवः ॥ उरक्षतो गदः साध्यः सम्यगौषधसेवनैः ॥ १
९ ॥ इति निदानं ॥ अथ चिकित्सा ॥ शोषिणः शालयो मुद्गा गोधूमा यवषष्टिकाः ॥ दशमूलोसवाथाश्च श
स्ता जांगलजा रसाः ॥ २० ॥ पिप्पलीयवशुंठीभिः कुलत्थामलदाडिमैः ॥ सुकुमारां रसं स्निग्धं यक्ष्मरोगा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पहं पिबेत् ॥ २१ ॥ धान्याक मागधी शुंठी दशमूलीजलं पिबेत् ॥ पार्श्वशूलश्वासकासपीनसादि प्रशांतये
२२ ॥ क्षौद्राभया विडंगाज्य लोह ताप्य शिलाजतु ॥ यक्ष्माणं हंति लेहोयं सेवेत पथ्य भोजनः ॥ २३ ॥ नवनीतं सि
ताक्षौद्रं संयुक्तं भक्षयेत् क्षये ॥ क्षीरभुक् पुष्टिमाप्नोति विषमे भाज्यमाक्षिकैः ॥ २४ ॥ त्वगेला पिप्पली वंशरोचना
श्वेतशर्करा यथोत्तरं द्विगुणिता लिह्यात् क्षौद्रघृतान्विता ॥ २५ ॥ श्वासकासज्वरान् पार्श्वशूलं शीघ्रं क्षयं ॥
आरोचकं सुप्तजिह्वं करकं वांतिं च नाशयेत् ॥ २६ ॥ दशमूलीसतागंधा पथ्यं वंशायुते घृतं ॥ नत्कृष्णाक्षौद्रसंयु
क्तं लीढं स्वरविशोधनं ॥ २७ ॥ शिरोंसपार्श्वशूलघ्नं कासश्वासज्वरापहं ॥ पुनर्नवा स्थिरा रास्ना बला पिप्पलि
गोक्षुरैः ॥ २८ ॥ जीवंत्या साधितं सर्पिस्सावेशोषहरं स्मृतं ॥ शतपुष्पा देवदारु पथ्या कुष्ठ नैतैः कृतं ॥ २९ ॥ आ
लेपनं घृतोपेतं शीर्ष पार्श्वांसशूलहृत् ॥ एला जमोदा त्रिफला विडंग गारुष्क चित्रकं ॥ ३० ॥ शतावरि क्षा
रशानारजःस्वारसाराप्र कटुत्रयं ॥ सुराह्वं मुस्तकं चेति तैर्वैः क्वाथं तु साधयेत् ॥ ३१ ॥ तस्मिन् क्वाथे पचे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ॰ स॰ द्राज्यं प्रस्थं सिद्धं तु सर्पिषि ॥ त्रिंशत्पलमितां तत्र भिषक्कुर्यात्सितोपलं ॥ ३२ ॥ षट्पलानि तुगाक्षीर्याः क्षौ-
८७ द्रं प्रस्थद्वयं क्षिपेत् ॥ ततो मथ्यहतं कुर्यात् प्रातर्लिह्यात्पलोन्मितं ॥ ३३ ॥ क्षीरं चानु पिबेत्तेन अपेक्ष्यमाण-
मुद्धतं ॥ भगंदरं पांडुरोगं नाशयेत्समितिमान्नुमान् ॥ ३४ ॥ आयुर्वृद्धिकरं ख्यातं सेव्यमानं रसायनं ॥ एला-
मंथः ॥ जीवंती पौष्करं द्राक्षा यष्टी द्रुयवगोक्षुरैः ॥ सटी वचोत्पला कृष्णा तालमूली यवासकं ॥ ३५ ॥
त्रायमाणं चतुःस्पर्शं समैरेभिर्घृतं पचेत् ॥ सिद्धं तद्राजयक्ष्माणं हंत्येकादशधोत्थितं ॥ ३६ ॥ द्राक्षा म-
लीकृणा भृंगी द्राक्षा छिन्ना हरीतकी ॥ जीवकर्षभकौ मुस्तं पौष्करं काकमाचिका ॥ ३७ ॥ पुनर्नवा विदा-
री च काकोली मुद्गपर्णिका ॥ सूक्ष्मैला माषपर्णी च कमलागुरु चंदनं ॥ ३८ ॥ मेदे धात्री सठी रास्ना ऋद्धि-
र्जीवंतिका बला ॥ पलमात्राणि सर्वाणि स्थूलचूर्णानि मेलयेत् ॥ ३९ ॥ एकीकृत्य बृहत्पात्रे पंचाम-
लशतानि च ॥ जलद्रोणे पचेत्सिद्धं त्याग्रासमष्टावशेषितं ॥ ४० ॥ धात्रीफलानि चोद्धृत्य निश्चुलीकृ- ८

13

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्ववासमा॥ हृदे नकरसंमर्घस्तान्येतानि गालयेत्॥ घृतं समसपलं दत्वा किंचित्पक्वाल्पवह्निना॥ त
त स्तत्र क्षिपेत्काथं सितां चार्द्धतुलोन्मितं॥ ७२॥ लेहवत्साधयित्वा तु चूर्णान्येतानि निक्षिपेत्॥ पिप्प
ली द्विपलं देया तुगाक्षीरी चतुःपला॥ ७३॥ प्रत्येकं च त्रिशाणाः स्युः पत्रैलानागकेसरत्वचः॥ ततस्त्वेकी
कृते तस्मिन् षट्पलं मधु निःक्षिपेत्॥ ७४॥ इत्थं पंचवनशासं परमुक्तं रसायनं॥ लेहं वह्निवरं भक्ष
क्षुत्स्वादे क्षीणो नरः सदा॥ ७५॥ बालवृद्धक्षतक्षीणा नारीक्षीणाश्च शोषिणः॥ हृद्रोगिणः स्वरक्षी
णा येन शास्तेषु शस्यते॥ ७६॥ कासं श्वासं पिपासां च वातास्रं च गुदामयं॥ वातं पित्तं शुक्रदोषं मूत्रदो
षं च नाशयेत्॥ ७७॥ मेधां स्मृतिं स्त्रीषु हर्षं वक्त्रवर्णप्रसन्नतां॥ करोति सततं नाभ्यासमजीर्णं च कुरु
ते नवं॥ ७८॥ इंद्रियाणां प्रसादश्च वलीपलितनाशनं॥ सर्वरोगांश्च शमयेन्नरो दर्शं च प्रगच्छति
७९॥ इति च्यवनप्राशः॥ हरीतकीशतं भद्रं यवानामाढकं तथा॥ पलानि दशमूलस्य विंशतिं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वृ०सा०
८८

चनि भोजयेत् ॥ चित्रकं पिप्पली मूलमपामार्गं सठी तथा ॥ कपिकच्छुः शंखपुष्पी भार्गी च गजपिप्प
ली ॥ ५२ ॥ बलापुष्करमूलं च प्रत्येकं द्विपलं भवेत् ॥ पचेत्स्य चाढके नीरे पेमेनेः रित्रेः श्रतं नयेत् ॥ ५३
त्वचो भयाशतं हत्वा क्वाथे तस्मिन्विचक्षणः ॥ सर्पिस्तैलाष्टपलकं क्षिपेद्गुडतुलां तथा ॥ ५४ ॥ पक्वो
लेहत्वमानीय सिद्धशीते पृथक् पृथक् ॥ क्षौद्रं च पिप्पली चूर्णं द्यात्कुडवमात्रया ॥ हरीतकीद्वयं खादे
त्तेन लेहेन निस्पृहः ॥ क्षयं कासं तथा श्वासं हिक्काशीलं च पीनसं ॥ ५५ ॥ ग्रहणीं नाशयत्येष वलीप
लितनाशनः ॥ बलवर्णकरं पुंसां अवलेहो रसायनः ॥ ५६ ॥ विहितोगस्त्यमुनिना सर्वरोगप्र
णाशनः ॥ इत्यगस्त्यहरीतक्यावलेहः ॥ हरीतक्यः पलशतं गोमूत्रे कांजिके थवा ॥ चतुर्गुणेक्षि
पेत्तेन वह्निना मृदुपाचयेत् ॥ ५७ ॥ पश्चात्ताः श्वासमुद्धृत्य वायुनाशोषयेत्ततः ॥ निष्कुलीकृत्य
पश्चात्तं चूर्णानिमानि दापयेत् ॥ ५८ ॥ त्रिकटु कं यवक्षारं सैंधवं चव्यचित्रकं ॥ रामठं च कुबेरा ९

175

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्यं न्नूषणिः कृत्यसमांशकं ॥५९॥ विजियांपूरयेत्तेन दृढं सूत्रेण वेष्टयेत् ॥ एतत्स्तं विन्यसेत्भाशी
निंबुके द्रवपूरिते ॥६०॥ एतत्स्तं भक्षयेत्प्रातः देशकालं च पेयम्च ॥ अग्निमांद्ये तथाजीर्णे गुल्मे
शूले च दारुणे ॥६१॥ अनाहे मूढवाते च सर्वं धुजठरेषु च ॥६२॥ इति निक्षरहरीतकी ॥ अथ शिवगुटि
का ॥ शुद्धं शिलाजतु या संमितं षोडशभिः पलैः ॥ भावयेत्त त्रिफलाक्वाथे स्त्रिदिनं दशमूलजैः
६३॥ क्वाथैश्च त्रिदिनं भाव्यं त्रिदिनं त्वमृतारसैः ॥ त्रिदिनं च बलाक्वाथे स्त्रिदिनं च पटोलजैः ॥६४॥
कषाये स्त्रिदिनं यष्टी कषायेरपि भावयेत् ॥ गोमूत्रे दिन भाव्यं गोक्षीरे भावयेत्त्र्यहं ॥६५॥ ततः
शतावरी द्राक्षा विदारी ह्रस्व चित्रकैः ॥ क्षेत्रमुंडी चव्यमुस्तावीराकुटजपौष्करैः ॥६६॥ दंतीनागग
कणातिक्ता पाठाकर्कटशृंगिका ॥ अष्टवर्गौषधोपेताः पृथक् सर्वपलोन्मिते ॥६७॥ एभिरे
कीकृतैर्वारि द्रोणे क्वाथं तु साधयेत् ॥ भावयेत्त्रिदिनं तेन क्वाथेन च शिलाजितु ॥६८॥ ततः शुं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०सं०
८९

हरीकणाधात्रीमरिचं मेषशृंगिका ॥ प्रत्येकं द्विपलं ग्राह्यमेतद्दोषुधपंचकं ॥ ६९ ॥ तालीसपत्रक
स्यापि ग्राह्यं पलचतुष्टयं ॥ पलमेकं विदार्याश्च मितावेदशभिः पलैः ॥ ७० ॥ मितां चैव विनिक्षि
प्य चूर्णितानि शिलोद्भवं ॥ आनस्याज्यस्य चत्वारि पलान्यत्र विनिक्षिपेत् ॥ ७१ ॥ माक्षिकस्य पलान्य
ष्टौ त्रिलतैलं पलद्वयं ॥ वंशक्षीरीत्वगेलानां नागकेसरपत्रयोः ॥ ७२ ॥ पृथक्पलं पलं देयं गुटिका
कारयेत्ततः ॥ कर्षमात्रेन वेकुंभे आतापुष्पाधिवासिते ॥ ७३ ॥ स्थापयेत्तां ततः स्वादेद्देकेकां प्र
तिवासरं ॥ प्रातःकाले ततः श्वानु पिबेत्सुमृसतं जलं ॥ ७४ ॥ आंगलंबासरं क्षीरं गव्यं कथितशीतलं ॥
माध्वीकं वासवं शीतलो पंवादाडिमीरसं ॥ ७५ ॥ शालादेशोचितं चैषामनुपानं प्रकल्पयेत् ॥ जीर्णासिम
न्भोजनं कुर्यात् धान्यमुद्गादिकं लघु ॥ ७६ ॥ गुर्वन्नाद्यं परिहरेत्समाहं पथ्यभुक्नरः ॥ ततः परं भवे
त्सात्म्यं भोजनं स्वेच्छया परं ॥ ७७ ॥ एषा शिवगुटी नाम प्रबलं वातशोणितं ॥ यस्मात्पानेन रुद्धः साध्यं शो

८

177

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षरोगमुरःसतं ॥ ७८ ॥ अर्शांसि ग्रहणीरोगं प्लीहगुल्मभगंदरान् ॥ हिकागृध्रश्मरीरोगं कासंश्वा
संवमिं तथा ॥ ७९ ॥ प्रमेहोदरहृद्रोगान् गुदविद्रधिपीनसान् ॥ रक्तपित्तमपक्कं कुष्ठं श्वित्रं शोफं शिरोरु
जः ॥ ८० ॥ ज्वरातिसारनेत्रास्यरोगोन्मादादिकामलं ॥ अपस्मारं तथानाहमरुचिं श्लीपदं तथा ॥ ८१ ॥
असृग्दरं च भ्रममेतु रोगाश्चान्यान् त्रिदोषजान् ॥ पांडुरोगं च शूलानि सर्वाणि क्लैवरं वांछये ॥ ८२ ॥
विषं दंष्ट्राविषं चैव मेदोरक्तं बलक्षयं ॥ अग्निकार्श्यमतिस्थौल्यं रेतोदोषं तथानर्था ॥ ८३ ॥ योषितां यो
निदोषांश्च वंध्यात्वं मृतवत्सतां ॥ नाशयत्येव तानि संरोगान्सांश्च सर्वशः ॥ ८४ ॥ शरीरं सुदृढं कां
तं बलीपलितवर्जितं ॥ प्रसन्नेंद्रियसंयुक्तं जायते कुमारोपमं ॥ ८५ ॥ मेधावलं च लभते गुटिकासे
वनान्नरः ॥ उपभोक्तुं शतस्त्रीणां शक्तो भवति मानवः ॥ ८६ ॥ वर्षमेकं तु संसेव्य जीवेद्वर्षशतं सुधीः ॥ व
र्षद्वयोपयोगात्तु जीवेद्वर्षचतुःशतं ॥ ८७ ॥ नातः परतरं किंचित्पुंसां श्रेष्ठरसायनं ॥ शिवेन शिव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र०सा० सिद्धांते गणेशाय प्रकीर्तितं ॥८८॥ मुनिभिः सेविता नित्यं जरामृत्युहरी शिवा ॥ इतिसृगादिरोग
९० विनाशिनी शिवगुटिका ॥ भूर्जवत्सूक्ष्मपत्राणि हेम्नः शुद्धस्य कारयेत् ॥ स्नुहीनतानि लुल्यानि क्षिप्ता
खल्वे विमर्दयेत् ॥ ९० ॥ कांचनाररसेनैव ज्योतिष्मत्यारसेन वा ॥ हलिन्या वा रसे स्तावत् यावद्भवति
पिष्टकः ॥९१॥ ततो हेम्नश्चतुर्थांशं रं कणं तत्र निक्षिपेत् ॥ पिष्टमौक्तिकचूर्णं च हेमद्विगुणमावपे
त् ॥९२॥ तेषु सर्वसमं गंधं क्षिप्त्वा चैकत्र मर्दयेत् ॥ विधाय गोलकं तेषां वाससा परिवेष्टयेत् ॥९३॥ वे
ष्टयित्वा मृदा पश्चाच्छोषयित्वा च साधयेत् ॥ शरावसंपुटस्यांतस्तन्मुद्रां प्रयोजयेत् ॥९४॥ लवणापू
रितं भांडे धारयेत्तं च संपुटं ॥ मुद्रां दत्त्वा शोषयित्वा वह्निभिर्गोमयैः पुटेत् ॥९५॥ स्वांगशीते ततस्तस्मिन्
गंधं सूतसमं क्षिपेत् ॥ पिष्ट्वा च पूर्ववत्सर्वं खल्वे गजपुटे पचेत् ॥९६॥ स्वांगशीतं ततो नीत्वा गुंजायुग्मं
प्रयोजयेत् ॥ अष्टभिर्मरिचैर्युक्तो क्षयान्मुच्यते नरः ॥९७॥ विलोक्य देशदेहादीनेकैकारसरक्ति
९०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का॥ सर्पिषा मधुना वापि दद्याद्दोषाद्यपेक्षया॥ ९८॥ पथ्यं लघु बृंहैः प्रायो मुद्गाद्यैरपि कल्पयेत्॥ यं
ज्ञेनेर्घृतसिद्धैर्वा नातिक्षारै रहिंगुभिः॥ ९९॥ संस्कृतैर्मरिचैलाभ्यां जीरकैश्चाविदाहिभिः॥ बिल्वं नाकैस्तै
ज्ञानि कारवेल्लं च वर्जयेत्॥ १००॥ कोपं शोकं परिहरेत् स्त्रीसंगं च विवर्जयेत्॥ श्लेष्माणं गृहणीकासं
श्वासं क्षयं मरोचकं॥ १०१॥ नाशयेदग्निमांद्यं च कफवातामयानपि॥ मृगांकोयं रसो नाम क्षयरोगा
दिनाशनः॥ १०२॥ इति राजमृगांकरसः॥ शुद्धसूतसमं हेम हेम्नो द्विगुणमौक्तिकं॥ गंधकं सूततुल्यं
च सूतपाद टंकणः॥ १०३॥ सर्वं तद्गोलकं कृत्वा कांजिकेनावशोषयेत्॥ लवणापूरिते भांडे पचे
द्यामचतुष्टयं॥ १०४॥ ततः सिद्धो भवेदेष मृगांकाख्यो रसोत्तमः॥ गुंजाचतुष्टयं चास्य खादेत्सध्यान्न
भुक् नरः॥ १०५॥ सर्वोपद्रवसंयुक्तं क्षयं हंति न संशयः॥ इति मृगांकोरसः॥ आयामं कटुकं क्रोधं
कठिनं निशिजागरं॥ १०६॥ दिवास्वप्नं व्यवायं च तांबूलं च क्षयी समेत्॥ मलाधीनं बलं नृणां रेतोम्

180

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल·सं·
९९

लंबजीवनं ॥२०७॥ अतो यक्ष्मणि यत्नेन संरक्षेन्मलरेतसि ॥२०७॥ गुरुदेवद्विजो वैद्यपूजकः पथ्यत
त्परः ॥ दयावानौषधपरो यक्ष्मवानपि जीवति ॥२०८॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे राजयक्ष्मरोगनिदानं
चिकित्साकथनं नाम त्रयोविंशतितमोऽध्यायः ॥२३॥ अथ कासानां निदानं चिकित्सां चाह ॥ अंतर्नासास्य
योर्धूमैरेणुभिर्वायुपूरणात् ॥ अतिव्यायामतो सर्वरूक्षादिकनिषेवनात् ॥१॥ क्षुन्मलादिनिरोधे
न भुज्यमानस्य सत्वरं ॥ उन्मार्गसंक्रमाच्चैव दुष्टः प्राणः समीरणः ॥२॥ उदानानुगतो भिन्नकां
स्यध्वनिसमध्वनिः ॥ निर्गच्छन्वदनाच्छीघ्रं सदोषः कास उच्यते ॥३॥ स पंचधा पृथग्दोषैः क्ष
तेन स्यात् क्षयेन च ॥ उपेक्ष्यतः क्षयं कुर्याद्बलवानुत्तरः क्रमात् ॥४॥ प्राग्रूपं भोजनाशक्तिः कं
ठे कंडूश्च जायते ॥ शूकैरिवमथाकंडिः पूर्णता वक्त्रकंठयोः ॥५॥ वाताधिके तु हृत्पार्श्वोदरमू
र्द्धस्वशूलरुक् ॥ बलौजःक्षीणता भिन्नस्वरस्यासक्तवेगता ॥६॥ शुष्ककासश्च भवति क्षीर

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नं न च दृश्यते ॥ वक्त्रस्य श्यामता च स्यात् गात्राणामतिरूक्षता ॥ ७ ॥ तिक्तास्यत्वमुरोदाहो ज्वरो वक्त्र
विशोषणं ॥ कुर्वीत वह्निः कासोपि पासाचैव पित्तजे ॥ ८ ॥ प्रलिप्यमानवक्त्रं तं देहः स्यकफपूर्णता ॥ का
सः कफाधिकोंगानांगोरवं कफनो भवेत् ॥ ९ ॥ अतिभाराति सुरतबलवद्युद्धकर्मभिः ॥ रूक्षस्य दुष्टपर्व
णात् स्यादुरस्तः कासरुक् ॥ १० ॥ सरक्तष्ठीवनं कासे पारावतसमध्वनिः ॥ कंठे स्यात् हृदये तोदो ज्वरः श्वस
नं भवेत् ॥ ११ ॥ घृष्टिनां शोषवतामग्नौ मंदे पिच्छिलमाशने ॥ मवाये वेगरोधे च कासस्य क्षयसंभवः
१२ ॥ क्षीयमाणबलप्राणः कासे स्यात् क्षयसंभुतं ॥ त्रिदोषोपद्रवाश्चात्र कासे स्युः क्षयसंभवे ॥ १३ ॥ एकदो
षोत्थितः कासो बलिनो योनुपद्रवः ॥ साध्यतां याति चान्योपि सम्यगौषधसेवने ॥ १४ ॥ इति निदानं ॥
अथ चिकित्सा ॥ कनिष्टपंचमूल्याः क्वाथः कृष्णारजोन्वितः ॥ निहंति वातजं कासं रसो भ्राहि निषेवितः
१५ ॥ भार्गी शृंगी सठी द्राक्षा मागधी विश्वभेषजं ॥ गुडतैलयुतो लेहो वातकासं व्यपोहति ॥ १६ ॥ एरंडाका

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लं०स०
१२

पैर्घीतं सिद्धं तस्मिन्दधि च तु गुणे ॥ भागीरथ्याः कल्कपुतं हंति कासं वातसमुद्भवं ॥ १७ ॥ एकं द्राक्षाद्यं बला वा
सा द्राक्षाद्येभिः समं जलं ॥ शर्करा क्षौद्र संयुक्तं पित्तकासविनाशनं ॥ १८ ॥ खर्जूरी पिप्पली लाजा द्राक्षा न
लद शर्करा ॥ सर्पिर्मधु विलेहोयं पित्तकासविनाशनः ॥ १९ ॥ बलाष्क द्राक्षि तंतोयं पित्तकासनिवारणं ॥
पाचितं तेन दुग्धेन कर्तव्यमनुपानकं ॥ २० ॥ स्वरसः शृंगबेरस्य पीतः क्षौद्रसमन्वितः ॥ कफकासप्रतो
श्यायश्वासानाशु निवारः ॥ २१ ॥ दशमूली सतं तो यं कणाचूर्णविचूर्णितं ॥ कफकासज्वरश्वासपार्श्व
शूलविनाशयेत् ॥ २२ ॥ सहीरा स्तावितुं गानि सोरोह्यो शुंठि सैंधवं ॥ लेहोयं माक्षिकोपेतः श्लेष्मका
सविनाशनः ॥ २३ ॥ पिप्पलीचूर्णसंयुक्तः क्वाथः कंटकारिकोद्भवः ॥ श्लेष्मकासं जयेत्तीव्रं ज्रेक नदी
मिवांबुदः ॥ २४ ॥ यष्टी मागधिका शृंगी लाजा द्राक्षा शनारा ॥ शुभान्वेत द्विगुणिता सिताः सर्वे चतुर्गु
णा ॥ २५ ॥ लेहस्यैष घ तो ये ताः कासं हंति सतोद्भवं ॥ द्राक्षानुगा जीवनीयगणः सर्पिः सिता मधुः

९:

183

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दुग्धमेतैः शृतं पीतं सद्य कासनिवारणं ॥२६॥ त्रिकट्वा पंचकट्वा वासमरट्वा पथ्या वा कणा ॥ पिबे
द्दशादशादिनं मांसत्थैर्वा पदक्षयेत् ॥२७॥ दिनविंशतिके सिद्धे न पिप्पली वर्धमानकं ॥ अनेन पांडु
वातासृक्कासश्वासरुचिज्वराः ॥२८॥ उदरार्शः सप्तः श्लेष्मवातानेशंतु ग्रहः ॥२९॥ इति वर्धमा
नपिप्पली ॥ कट्फलं मुस्तकं तिक्ता सठी शृंगी च पौष्करं ॥ चूर्णमेषां मधुयुतं शृंगवेररसेन वा ॥३०॥
लिह्याज्ज्वरहरं कंठ्यं कासश्वासारुचीनुदं येत् ॥ वायुं छर्दिं तथा शूलं क्षयं चैव व्यपोहति ॥३१॥ इ
ति कट्फलाद्यं चूर्णं ॥ शृंगी प्रतिविषा कृष्णा चूर्णिता मधुना लिहेत् ॥ शिशोः कासज्वरं छर्दिं शां
त्येवातिविधानयेत् ॥३२॥ शृंग्यादि चूर्णं ॥ शृंगी कटुत्रिक फलत्रय कंटकारी भार्गीसपुष्कर जटा
लवणानि पंच ॥ चूर्णं पिबेद् शिशिरेण जलेन हिक्काश्वासो ह्येतानकसनारुचिपीनसेषु ॥३३॥ भाङ्गी
सममरिचं सुंठी पिप्पली वंशरोचना ॥ एकद्वित्रिचतुःपंचकर्षभागान् प्रकल्पयेत् ॥३४॥ एला

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ला०सा० ९२

त्वचोरत्कर्षयोर्द्विं प्रत्येकं भागमाहरेत् ॥ द्वात्रिंशत्कर्षतुलिता प्रदेया शर्करा बुधैः ॥ ३५ ॥ तालीसाद्यमि
दं चूर्णं रोचनं पाचनं स्मृतं ॥ कासश्वासज्वरहरं छर्द्यतीसारनाशनं ॥ ३६ ॥ शोषाध्मानहरं प्लीहग्रहणी
पांडुरोगजित् ॥ पक्त्वा वा शर्करां चूर्णं क्षिपेत्स्याद्गुटिका ततः ॥ ३७ ॥ इति तालीसाद्यं चूर्णं ॥ मरिचं
कर्षमात्रं स्यात् पिप्पली कर्षसंमिता ॥ अर्द्धकर्षो यवक्षारः कर्षयुग्मं च दाडिमं ॥ ३८ ॥ एतच्चूर्णीकृ
तं युंज्यादष्टकर्षगुडेन हि ॥ शाणप्रमाणगुटिकां खादेदेकैकं धारयेत् ॥ ३९ ॥ अस्य प्रभावात्सर्वेऽपि
कासा यांत्येव संक्षयं ॥ मरीच्यादिगुडः ॥ व्योषाम्लवेतसं चव्यं तालीसं चित्रकं तथा ॥ जीरकं तिंति
डीकं च प्रत्येकं कर्षभागिकं ॥ ४० ॥ त्रिसुगंधं त्रिशाणः स्यात् गुडः स्यात्कर्षविंशतिः ॥ व्योषादि
गुटिका ह्येषा पीनसश्वासकासजित् ॥ ४१ ॥ रुचिस्वरप्रदा ख्याता प्रतिश्यायप्रणाशिनी ॥ ४२
व्योषादिगुटिका ॥ वदने धारयेन्नित्यं शुंठी मुस्तगुडैः कृता ॥ गुटिका श्वासकासेषु केवलं वा बिभीतकं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५३॥ पथ्यादि गुटि॥ हरितालं शिला मांसि मरीचं भद्रमुस्तकं॥ धूमं पीत्वा पयः कोष्णं पिबेद्दनु
गुडान्वितं॥ ५४॥ अप्यसाध्याश्विरोसत्था प्रयोगेणैव साधिता॥ कासास्तेपि विनश्यंति विधिनानि
नसिध्वितं॥ ५५॥ कंटकारीरसे सर्पिर्वंगा भूषण गोक्षुरैः॥ रास्नया च युतं सिद्धं पीतं कासं व्यपोह
ति॥ ५६॥ कंटकारीघृतं॥ लवंगं पिप्पली जातीफलं कर्षमितं पृथक्॥ कर्षद्वयं तु मरिचं शुंठी षो
डशकर्षिका॥ ५७॥ सितासमैः समादेयाच्चूर्णं कासज्वरं हरेत्॥ प्रमेहारोचकश्वासवह्निमांद्यम
पानपि॥ ५८॥ ग्रहणीगुल्मरोगांश्च हंति शीघ्रं न संशयः॥ इति लवंगाद्यं चूर्णं॥ स्नुतार्द्रगंध
कोमर्धयामेकं कन्यकाद्रवैः॥ ५९॥ ताम्रपात्रे द्वयोस्तुल्यं पूर्वकल्केन लेपयेत्॥ दिनैकं स्था
लिकायंत्रे पक्वमादाय चूर्णयेत्॥ ६०॥ सूर्यावर्तो रसो ह्येषो द्विगुंजः श्वासकासजित्॥ इति सू
र्यावर्तो रसः॥ वातकासे सजे तु कृष्णं पिबेत्कटुम्लतिक्तकं॥ कफे तीक्ष्णं च मधुरं लंघनं च क्षतस्य

186

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ त्स॰
२५

षे॥५१॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे कासरोगचिकित्साकथनं नाम चतुर्विंशतितमोऽध्यायः॥२४॥ अथ
हिक्कारोगनिदानं चिकित्सां चाह॥ गुरुविष्टंभिरूक्षादिभोजनैः शीतसेवितैः॥ आयामलंघनाद्यैश्च
दुष्टो वायुः कफानुगः॥१॥ सोदानः प्राणनामोर्द्ध्वं गच्छन्नाह सस्वनिः॥ हिक्कां कुर्याद्यकृत्प्लीहांत्रा
णि श्रोतांसि वासकृत्॥२॥ अतियुक्तान्नपानाद्यैरन्नजा यमला तु सा॥ चिरेण यमलैर्वेगैर्या स्यात्
मूर्द्धकंपिनी॥३॥ चिरान्मंदवेगैः स्यात्क्षुद्रा सा पादनाभितः॥ गंभीरनादिनी सा तु गंभीरा प
रिकीर्तिता॥४॥ हृद्बस्तिनाभिशीर्षाणि यातुर्देहततः सतोऽन्ता॥ सर्वांगकंपिनी हिक्का महती सा
प्रकीर्तिता॥५॥ इति हिक्कानिदानं॥ अथ चिकित्सामाह॥ शुंठ्याघृतमजाक्षीरं श्रितं हिक्कानि
वारयेत्॥ कलिंगावारसोलाजा सकृत्सैंधवसंयुतं॥६॥ मधिमाक्षिकसंयुक्ता पिप्पलीवासि
तान्विता॥ गुडयुक्ता यवा शुंठी हिक्कां श्वसनं नाशयेत्॥७॥ मातुलुंगरसेनापि क्षौद्रसौवर्चला

187

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लिता ॥ धात्री शुंठी कणा चूर्णं लीढं क्षौद्र सितान्वितं ॥ ८ ॥ बाल मूत्रे प्रयुतान स्यन्मक्षिका विट् नियो
जिता ॥ स्तन्येन वा प्रयुता हिक्काः शीघ्रमेव निवारयेत् ॥ ९ ॥ नारी क्षीरं गुडोपेतं पीतं हिक्का निवारये
त् ॥ पुनः पुनः प्रयोगेन श्वासं हिक्कां च नाशयेत् ॥ १० ॥ माष सूक्ष्म रजो धूमो विधूमांगार निर्ग
तः ॥ पीतो निवारयेत्सं च हिक्काः शीघ्रं न संशयः ॥ ११ ॥ दह्यमान निशा माष श्यामा रणी कल्क संभ
वः ॥ धूमः पीतो हरेत्क्षिप्रं हिक्काः पंचविधा अपि ॥ १२ ॥ हरेणु पिप्पली क्वाथो हिक्कां हिंगुयु
तो हरेत् ॥ कणा मधुक शुंठीनां लेहो वा माक्षिकान्वितः ॥ १३ ॥ भृंगी कंटकारिका भार्गी त्रिफला
शोष पौष्करैः ॥ लवणानि च पंचैव तिचूर्णमुष्णेन वारिणा पीतं हिक्कां जयेत्सर्वः कासः श्वासो
द्रुभारतं ॥ श्लेष्म वात हरं यत्स्यात् घृतोष्णं भेषजं भवेत् ॥ १५ ॥ अन्नपानादिकं चापि ॥ हिक्का
श्वासेषु तद्धितं ॥ इति श्री लक्ष्मणोत्सवे ग्रंथे हिक्का निदानं चिकित्सा कथनं नाम पंचविंशति

188

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज॰त्स॰
१५

मोऽस्त्रेसः ॥२५॥ हिक्कानां पूर्वनिदानं स्यात् तद्धासानामपि तद्भवेत् ॥ विशेषेण बलध्वंसः श्वासा
नां हेतुतां व्रजेत् ॥१॥ दुष्टः प्राप्य मरुत्प्राणं कफमूर्द्ध्वं गतिश्चरन् ॥ कफव्याहतवेगत्वाच्छ्वासतां प्र
तिपद्यते ॥२॥ जठराध्मानमानाहो वैरस्यं वदनस्य च ॥ शूलं हृदयपीडा च श्वासः प्राग्रूपलक्ष
णं ॥३॥ ऊर्द्ध्वश्वासो महाश्वासश्छिन्नकस्तमकस्तथा ॥ क्षुद्रकश्चेति पंचैते श्वासभेदाः प्रकीर्ति
ताः ॥४॥ इति निदानं ॥ अथ चिकित्सा ॥ श्वासहिक्कार्दितः स्यादौ तैलाभ्यंगस्य शस्यते ॥ स्वे
दो वांतिविरेकश्च शमनं दुर्बलस्य च ॥५॥ कुलत्थमाषिका शुंठी वासाभिः क्वथितं जलं ॥ पौष्क
रेण समायुक्तं श्वासकासाननपोहति ॥६॥ द्राक्षा तु राजभार्ङ्गी च कृष्णा पथ्या च हरीतकी ॥ ले
ह्यं मधुसर्पिर्भ्यां पंचश्वासान्निवारयेत् ॥७॥ त्रिसमसहिवसाढीढं कटुतैलेन संयुतं ॥ वि
डंगं हरति श्वासं दुःसाध्यं सुचिरोत्थितं ॥८॥ हिंस्राचित्रकपूतीकविडंगत्रिफलाश्रिते

१

189

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घृतं प्रस्थमितं सिद्धं द्विप्रस्थक्षीरसंयुतं ॥९॥ श्वासकासौ हरेत्पानात् गुल्ममर्शांसि रोचकं ॥
सतक्षयं च विड्बंधं हिक्काध्मानं नाशयेत् घृतं ॥१०॥ हिंस्राद्यं घृतं ॥ शतं पलानि संगृह्य भार्ग्या मूलस्य बु
द्धिमान् ॥ दशमूल्याः पलशतं पथ्यानां च शतं पचेत् ॥११॥ चतुर्गुणे जले पादशिष्टे वस्त्रावगालिते
तुलां गुडस्य निक्षिप्याः निःक्षिपेदभयाः पुनः ॥१२॥ पचेन्मृद्वग्निना तावत् यावल्लेहत्वमाप्नुया
त् ॥ मधुनाश्च पलान्यष्टौ शीते तस्मिन्विनिःक्षिपेत् ॥१३॥ पलत्रयं त्र्यूषणं च पलमेकं च चित्रकं
त्रिफलं त्रिसुगंधं च यवक्षारं द्विकार्शिकं ॥१४॥ संचूर्ण्य प्रक्षिपेत्सर्वं ततो भूयः प्रचालयेत् ॥ एकां
हरीतकीं खादेत् लेहार्द्धपलसंयुतां ॥१५॥ घोरान् श्वासान् जयत्येव कासान्यांश्च विधानवित् ॥ स्वरवर्णौ
बलं भते जराग्नेः समुद्धृतं ॥१६॥ इति भार्ग्यादि हरीतकी अवलेहः ॥ शुकः पोष्करचूर्णेन कषायो
दशमूलजः ॥ श्वासकासं जयेदाशु पार्श्वशूलं च पानतः ॥१७॥ शिरीषकदलीकंदपुष्पाक्षिसहह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०त्स० ९६

छाया ॥ पिप्पलीतंदुलजैलेः श्वासघ्नं सेवपानतः ॥१८॥ देवदारुवचाशुंठीमाघीपुष्करकट्फलैः
क्वाथः सिंहीजयेत्श्वासान् पंच श्वासान्न संशयः ॥१९॥ चूर्णं कूष्मांडमूलस्य पिबेदुष्णेन वारिणा ॥
श्वासान् सर्वांस्तथा कासान् शीघ्रमेव निवारयेत् ॥२०॥ कासरोगेषु यत्किंचित् प्रोक्तं पथ्यौषधादि
कं ॥ श्वासरोगे यदि तत्सर्वं यथाविधि समाचरेत् ॥२१॥ इति लक्ष्मणोत्सवे ग्रंथे श्वासनिदानं चिकि
त्साकथनं नाम षड्विंशतितमोऽध्यायः ॥२६॥ अथ स्वरभेदस्य निदानं चिकित्सामाह ॥ कंठाभिघाता
दत्युच्चैर्भाषणतो विषात् ॥१॥ दुष्टा दोषाः स्वरवहास्रोतांसि आप्नुवंति ते ॥१॥ स्वरभेदस्य
षड्भेदास्तत्र वातेन कृष्णमया ॥ दिग्मूत्रवर्चांसि पित्तेन पीतविण्मूत्रनेत्रतः ॥२॥ कफेन कफसंरुद्धस
त्यं वा कृशाश्रुता दृशोः ॥ सन्निपातेन सर्वाणि लक्षणानि समादिशेत् ॥३॥ धातुक्षयेन च च न नि
गच्छति सधूमनं ॥ मेदोजे स्वरभेदे तु स्यात्कंठांतर्गतं वचः ॥४॥ अव्यक्तं पदवर्णोच्चैः सादिशोग्रेमसा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शाम्यन्तः॥ इति निदानं॥ अथ चिकित्सा॥ वातजे स्वरघाते तु जग्ध्वा घृतगुडौदनं॥ पिबेदुष्णज
लं यष्ट्याधुकोपुरिघृतं पिबेत्॥ कासमर्दक वार्ताकी भंगराजरसे घृतं॥६॥ साधितं पानतो हंति स्वर
भेदं मरुत्कृतं॥ कासमर्दादि घृतं॥ पैत्तिके स्वरभेदे तु प्राग्विरेकः प्रशस्यते॥७॥ घृतं क्षीरं च मधु
रैर्विमिश्रं च पिबेन्नरः॥ भुंजीत घृतसंयुक्तं यष्टीमधुकपायसं॥८॥ मरिचं पिप्पली मूलं पिप्प
ली विश्वभेषजं॥ पिबेन्मूत्रयुतं चूर्णं कफजस्वरसंक्षये॥९॥ अजमोदा निशा क्षार चित्रकामल
का निच॥ लेह्यं मधुसर्पिभ्यां स्वरभेदमपोहति॥१०॥ सतैलं लवणं वाते पित्ते सौद्रं घृतान्वितं
कफे त्रिकं केवलः प्रोक्तः सक्षारकटुकं मधु॥११॥ दंतमूलेषु जिह्वामांगले तालुनिवर्छिते:॥ कफ
माकर्षयेद्देषः स्वरस्तेन प्रसीदति॥१२॥ क्षुद्रा देवद्रुमः शुंठी वसा चैति शृतं जलं॥ पिबेद्रात्रे स्व
संयुक्तं खदिरं धारयेन्मुखे॥१३॥ पिप्पल्यामलसंयुक्तां पथ्यां यष्ट्याह्वनागरसंयुतं॥ धारयेद्दंतेनैतेन स्व

192

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०त्स०
१८

र: सम्यक्क्रसीदति ॥१४॥ ससैंधवं घृतेन भक्षं बदरीपत्र[illegible]कं ॥ कासं च स्वरभेदं च [illegible]ह एव विना
शयेत् ॥१५॥ सिताक्षौद्रयुतं पेयं घृतं वा मधुरै: समं ॥ [illegible]पिबे स्वरभ्रंशे प्रोच्चभाषण संभवे
१६॥ चव्यजीरक कुष्ठानि त्रिफला [illegible]काम्लवेतस ॥ तालीस चित्रक मोचं चूर्णमेतत्समाशकं ॥१७
मर्दयित्वा गुडयुतं त्रिसुगंधिसमन्वितं ॥ गुटिका भक्षिता ह्येषा वैस्वर्यं पीनसं कफं ॥१८॥ अ
रुचिं च जयेदाशु धर्म्म: स्वर्गमिवाजल: ॥ चव्यादिगुटिका ॥ विडंग्यिकारसे सिद्धं वलगारास्या
त्रिकंटकै: ॥१९॥ आघ्रेणाच्च युतं सर्पिष्कासं हन्ति स्वरक्षयं ॥ कंटकारीघृतं ॥ शालंपद्याति काथे
घृतश्वासकासेषु भेषजं ॥२०॥ पथ्यं वा स्वरभेदेषु तेद्वस्या घृयोचितं ॥ इति श्री लक्ष्मणोत्सवे
गंधे स्वरभेदकर्मनिदानं चिकित्साकथनं नाम सप्तविंशतितमोऽध्याय: ॥२७॥ अथारोचक
निदानं चिकित्सा ॥ वातात्पित्तात्कफाद्द्वाभ्यां समग्रैश्चाप्यरोचक: ॥ भवेच्छोकभयक्रोधनिं

193

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यगंधावलोकके ॥१॥ आगंतुसंज्ञं पंचैवारोचकाः परिकीर्तिताः ॥ आम्लाशनेनेव दंतहर्षेव
च्छ कषायता ॥२॥ वातजे पैत्तिके वक्त्रं तिक्ताम्लत म्रोचके ॥ वक्त्रं माधुर्यलवणं तिक्तता तिक
फात्मजे ॥३॥ त्रिदोषजे नेकरसं वक्त्रं हृत्पीडनादिकं ॥ मनोव्याकुलताजोऽयं मोहश्चागंतुजे भवे
त् ॥४॥ निदानं ॥ अथ चिकित्सा ॥ वातजे रोचके वस्तिर्विरेकः पित्तजे हितः ॥ वांतिः कफोद्भव
जे तो हर्षणं तु मनोघ्नजे ॥५॥ कुष्माविडंगसिंधूत्थयवक्षारहरेणुका ॥ रास्नैला नागरं हिंगु
चूर्णमुष्णांबुना पिबेत् ॥६॥ स्नेहेन सहितं वा पिबातारोचकशांतये ॥ पैत्तिकारोचके सर्पिः सि
तासैंधवमाक्षिकं ॥७॥ लेहोयं शस्यते वह्निदीपनो रुचिकारकः ॥ मरिचं मधुनोपेतं कफजारोच
के हितं ॥८॥ कवलग्रहणं चैव धूपः समुखवासनः ॥ लवंगैलामरिचैश्च मुक्तमल्लीकागुडजंपयः
सर्वारोचकनाशाय शस्तं कवलधारणं ॥ श्रृंगवेरद्रवैः क्षौद्रसंयुतैः कवलग्रहः ॥१०॥ विहि

194

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न०त्स० नोरोचकः श्वासः कासपीनसनाशनः ॥ त्रिफलारजनीयुग्मं त्र्यूषणं पावकं जं ॥ ११ ॥ चूर्णं क्षौ
१८ द्रेण संयुक्तं मरत्वो मुखधावनं ॥ कारवी जीरकं द्राक्षा वृक्षाम्लं दाडिमं मधु ॥ १२ ॥ सौवर्चलं च मरि
चं लेहो मरुविकारकः ॥ भोजनात्प्रथमं शस्तं जिह्वाकंठविशोधनं ॥ १३ ॥ अरोचकहरं हृद्यं भस्
णं सैंधवार्द्रयोः ॥ पलद्वयं दाडिमस्य त्र्यूषणस्य पलत्रयं ॥ निक्षिपेद्गुडिमां श्वात्र पलैकं त्रिसुगं
धिकं ॥ पलान्यष्टौ सितायाश्च सर्वमेकत्र चूर्णितं ॥ १५ ॥ अरोचकहरं हृद्यं कासपीनसनाशनं ॥
इति दाडिमाद्यं चूर्णं ॥ यवानी दाडिमं शुंठी तिंतिडीकाम्लवेतसं ॥ १६ ॥ बदरं चाम्लकं चेति प्रसे
कं कर्षमात्रकं ॥ सौवर्चलं वरांगं च धान्यकं जीरकं तथा ॥ १७ ॥ प्रसेकमर्दकं र्षस्यान्मरिचाना
शात दूयं ॥ पिप्पलीनां शतैकं च सिता पलचतुष्टयं ॥ १८ ॥ सर्वमेकीकृतं चूर्णं सर्वारोचक
नाशनं ॥ कंठास्यशोधनं हृद्यं हृत्पीडापार्श्वशूलजित् ॥ १९ ॥ गृहण्यर्शोविकारं च श्वासाना

१

195

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हृद्विनाशनं ॥ श्वासहिक्काक्षयविबंधघ्नं अग्निसंदीपनं परं ॥२०॥ भवानीचूर्णं ॥ यो भजेद्वांछितं स्वां
शं क्रोधे च्छंदानुवर्त्तिनं ॥ भयजे भीतिशमनं शोके मानसहर्षणं ॥२१॥ अकस्माद्ये सदोषे यो रोचके
तु यथोचितं ॥ यथा दृष्टं भवेत्तत्र तद्भोज्यादि दापयेत् ॥२२॥ इति तस्मिणोत्सवे० अरोचकनि
दानं चिकित्साकथनं नामाऽष्टाविंशतितमोल्लासः ॥२८॥ अथ छर्दीनां निदानं चिकित्सामाह ॥ अ
तिद्रवातिलवणाति स्निग्धाजीर्णभोजनैः ॥ बीभत्सविषसाम्याहारैः कुत्सितदर्शनैः ॥१॥ दो
षेषु छर्दयो दुष्टा दूषितोदानमारुतात् ॥ प्रत्येकं दोषसंसर्गागंतुजास्ताश्च पंचधा ॥२॥ तासां प्र
प्राग्लक्षणं वक्त्रप्रसेको लवणास्यता ॥ उद्गाररोधो हृल्लासो भक्तद्वेषश्च जायते ॥३॥ हिक्काश्वा
सा ज्वरस्तृष्णावैचित्त्यं संहृदयामया ॥ कासश्चेति विकारांश्च ज्ञात्वा छर्दिसंभवाः ॥४॥ इति नि
दानं ॥ अथ चिकित्सा ॥ घनतपी तं सरसिं धूप्यं वा तच्छर्दिनिवारणं ॥ शीतोदकं हरेच्छर्दिं वातोत्थां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० ओघसंयुतं ॥५॥ लवणत्रययुक्तं वा छर्दिं क्षीरोदकं जयेत् ॥ शुंठीधान्यकसंयुक्तं दशमूलसंते
११ जं लेहः ॥६॥ सिद्धो यूषो हरत्याशु छर्दिं वातसमुद्भवं ॥ मसूरमुद्गलाजानां यवागूर्मधुसंयुता ॥७
युक्ता मात्राहरेदाशु वमिं पित्तसमुद्भवां ॥ पिबेद्धात्रीरसोपेतं मधुयुक्तं सचंदनं ॥८॥ अक्षमात्रं
जं येनेन छर्दिर्मुक्ततरा मपि ॥ चंदनं तगरं बालं मृणालं च प्रियंगुं तथा ॥९॥ मधुतंडुलतोयाभ्यां यु
क्तं पीतं हरेद्वमिं ॥ लाजाक्षौद्रसितोपेतो भक्ष्य मुद्गैः सत्तं जलं ॥ दाहादिसारतृट्छर्दिं ज्वरानाशु
विनाशयेत् ॥ पीतः पर्प्पटनिः क्वाथः सक्षौद्रो नाशयेद्वमिं ॥११॥ पथ्याचूर्णं मधूपेतं लिह्याद्वा
वांतिशांतये ॥ पटोलत्रिफलारिष्टगडूचीभिः सतं जलं ॥१२॥ पीतं माक्षिकसंयुक्तं मुक्त पित्त
वमिं जयेत् ॥ वांतो कफोद्भवायां तु वमनं प्राक् प्रशस्यते ॥१३॥ पिप्पलीसैंधवारिष्टराटसर्ष
पवातिभिः ॥ गोधूमाः शालयो मुद्गाः षष्टिकाद्याश्च भोजने ॥१४॥ तक्रकांजिकयूषांश्च प
१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दोषादिभृशस्यते ॥ विडंगत्रिफलाशुंठीचूर्णं क्षौद्रान्वितं हरेत् ॥१५॥ शुंठीप्लवविडंगानां
चूर्णं वा श्लेष्मजां वमिं ॥ द्राक्षाधात्रीसिताक्षौद्रतुल्यं वा त्रिसुतं पिबेत् ॥१६॥ वस्त्रेण गालि
तं हन्ति छर्दिं दोषत्रयोद्भवां ॥ गुडूचीत्रिफलानिम्बपटोलैः क्वाथः सक्षौद्रः सर्वदोषजं ॥१७॥ शीतःपी
तोजयेच्छ्रांतिं मूर्वा वा तंडुलांभसा ॥ एलाबदरागघनचंदनकोलमज्जालाजालवंगगजकेस
रिमागधीनां ॥ लीढं सितोपलमधूपहितं सुचूर्णं छर्दिं निहंति विविधामपि शीघ्रमेव ॥१८
एलाद्योवलेहः ॥ माक्षिकं मक्षिकाविष्ठामज्जामलककोलयोः ॥ सितावेति वमिं हंति लेहो
यं तदुग्धोदके ॥१९॥ अथे हृद्यतमैर्वापि वृभत्सोत्थं निवारयेत् ॥ असात्म्यभोजने सात्म्य
सिवैनं वीपतर्पणे ॥२०॥ कृमिहृद्रोगछर्दिं च कृमिजं तु निवारयेत् ॥ इतिलक्ष्मणोक्त
वेगंथे छर्दिंरोगनिदानं चिकित्साकथनं नामैकोनत्रिंशमोध्यायः ॥२९॥ बलक्षयभ्रम

198

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ स॰
१००

भयैः क्रुद्धेन मनसा सह ॥ स हेतुसंचितं पित्तं तालुक्लोमगलामुखान् ॥१॥ तृषयेद्धमनी
श्चैव सर्वतो रसवाहिनी ॥ तस्मात्तृष्णा भवेन्नृणां सप्तधा सा प्रकीर्तिता ॥२॥ वातजा पित्तजा
श्लेष्मोद्भवा क्षतसमुद्भवा ॥ क्षयजा चामजा भोजनोद्भवा तासां च सप्तमी ॥३॥ ताल्वोष्ठकंठवदनशोषदा
हो भ्रमस्तमः ॥ श्रमः प्रलापश्चेति कथितं पूर्वरूपमिदं तृषां ॥४॥ इति निदानं ॥ अथ चिकित्सा ॥ वातोत्था
यां पिपासायां पिबेद्दधि गुडान्वितं ॥ बृंहणाश्च रसाः शस्ता गुडूच्याश्च रसो हितः ॥५॥ तृष्णा विव
र्द्धिते पथ्यं भवेत्पूर्णं मद्योदरं ॥ वमनं पिप्पलीतोयेन तदा सम्यक् प्रयोजयेत् ॥६॥ वातघ्नं यद्भवेत्किंचि
च्छीतं लघु तथा मृदुः ॥ पथ्यं च भेषजं वा तत्तस्मात्तत्संप्रयोजयेत् ॥७॥ सुवर्णरजताद्यैस्तु सिक्ताभि
स्फलोहजैः ॥ अग्नितप्तैः सुखोष्णं वा शस्तं सक्षौद्रशर्करं ॥८॥ यच्छीतं मधुरं तिक्तं पित्तं तत्स्मास्फ
तं छिन्नं ॥ जीवनीयैः शृतं तु स्थं घृतं वापि प्रशस्यते ॥९॥ काश्मर्यचंदनोशीरपद्मकं मधुयष्टिका । १

१९९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्राक्षांचैवतां सितोपेतां पित्ततृषे पिबेज्जलं ॥१०॥ मद्वीकाचंदनोशीरखर्जूरैः क्वथितं जलं ॥ पिबेत्क्षौद्रेण सं
युक्तं पित्ततृष्णानिवृत्तये ॥११॥ तथैककोद्रवे भ्रांतिः शाम्यते निंबुवारिणा ॥ द्रवंति स्वचकट्वम्लसेव्यामो
षधभोजनं ॥१२॥ आर्द्रकं जीरकं शृंगवेरं सौवर्चलं तथा ॥ पीतं तोयप्लुतं हंति तृष्णामात्युन संशयः ॥
१३॥ लाजांबुक्षौद्रसंयुक्तं पिबेत्तृष्णाविमर्दितं ॥ का — री वा सितायुक्ता तृष्णादोषनिवृत्तये ॥१४॥ अ
म्लामलककधान्याकदाडिमीबीजपूरिणा ॥ सिक्तं वा साधितं गात्रे पीतं चैतत्तृषां जयेत् ॥१५॥ वृक्षाम्ल
दाडिमीकोलातुक्रिकाचुक्रिकारसः ॥ लेपः पंचाम्लकोवक्त्रे कृतस्तृष्णां निवारयेत् ॥१६॥ घृतमंडं
पिबेत्तात्तुशोषवाकेवलं घृतं ॥ धान्याम्लं वक्त्रे वैरस्यदौर्गंध्यमलनाशनं ॥१७॥ क्षौद्रसैंधवसंयुक्तं
बीजपूरककेसरं ॥ कपित्थं दाडिमीकोलबीजपूरकलोध्रकं ॥१८॥ पिष्टं मूर्ध्नि विलेपेन तृष्णादाहवि
नाशनं ॥ शीतांबुक्षौद्रसंयुक्तं माकेंठं तृष्णयार्दितो ॥१९॥ पीत्वा पीत्वा वमिं कुर्यात् कंठात् तृष्णानिवृत्तये ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लं०सं० लाजाकुष्ठोत्पलखर्जूरो हेमधुसंयुतः॥ कृत्वा गुटीं धारयेद्वक्त्रे तृष्णामपहरेत्परं॥२०॥ इति लाजादिगु
१०१ टिका॥ क्षतोद्भवतृषां हन्यात्क्षतःप्रशमनैर्भिषक्॥ उपचारैरसानां च पाने तालुविलेपने॥२१॥
क्षयोत्थितां तृषां हन्ति पीतं दुग्धांबु तत्क्षणात्॥ यद्वा मधूदकं पीतं भक्षितं वा पलोदनं॥२२॥ आमोद्भ
वे वचा बिल्वं युक्तं दीपनपाचने॥ अजीर्णजामजीर्णघ्नैः शीतोपायैस्तृषां जयेत्॥२३॥ तृष्णा मूर्छा
मदच्छर्दिदाहस्त्रीमधुकर्षिता॥ पिबेयुः शीतलं वारि रक्तपित्तमदात्यये॥२४॥ तृष्णयामोहमोभ्रा
न्ति मोहात्प्राणान्विमुंचति॥ तस्माद्वारि तृषार्तस्य न कदाचिन्निवारयेत्॥२५॥ इति श्री लक्ष्मणोत्स
वे ग्रंथे तृष्णारोगनिदानं चिकित्साकथनं नाम त्रिंशतितमोध्यायः॥३०॥ अथ मूर्छारोगनिदानं चि
कित्सा॥ वेगरोधाभिघाताभ्यां विरुद्धान्नादिसेवने॥ क्षीणस्य कुपितादोषा नाडीसंज्ञामनोवहाः
१॥ बाह्येंद्रियाणि न प्राप्य मूर्छां कुर्वंति देहिनः॥ ज्ञानाभावतमोरूपाः षड्विधास्ताः प्रकीर्तिताः॥ १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

२॥ एकैकदोषसंभूताः शोणितेन मदेन च ॥ विषेण चात्र सर्वासु पित्तस्यैव तत्प्रधानता ॥३॥ ग्लानि
श्चैतन्यहानिश्च जंभणं हृदयव्यथा ॥ पूर्वरूपाणि सर्वासां यथास्वं तां विभावयेत् ॥४॥ श्यामनीलारु
णं पश्यन्नु वातमोहे प्रपद्यते ॥ पीतं वाहरितं रक्तं पश्यन्नपीतेन मूर्छति ॥५॥ नीहाराव्रतमाकाशं पश्य
न्मूर्छां श्लेष्मकफात् ॥ दोषसंसर्गजा तासां ज्ञेयो लक्षणसंकरः ॥६॥ भूमिरापो तमोरूपं रक्तगंधस्त
न्वयः ॥ गंधेन शोणितः स्यातः केचिन्मूर्छंति मानवाः ॥७॥ वस्तुस्वभावसामर्थ्याद्दृष्टेनाति प्रसंग
ता ॥ विषमध्ये गुणास्तीव्रतरास्तन्मोहहेतुता ॥८॥ स्तब्धदृष्टिरसगंधाद्दुरूहे छुस्तमुह्यति ॥ श्ये
तेमद्येन विभ्रान्तिः स्यांतोसर्व प्रलापवान् ॥९॥ विषेणार्कपयस्त्वाच संभश्चैव प्रजायते ॥ रुतिनि
मादाने ॥ जलाभिषेचनं पुष्पमुक्तादिस्पर्शनं तनो ॥१०॥ शीतप्रदेशो मज्जनं वा सुगंधं चंदनलेपनं ॥
शीतान्नपानमधुरसेवनं च प्रशस्यते ॥११॥ सर्वास्वपि च मूर्छासु विधिः साधारणं स्वयं ॥ सिद्धं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च०सं०
१०२

मधुरवर्गेण पयोजा गल्लआरसाः ॥१२॥ हिताः सर्वासु मूर्छासु शालिमुद्गादयस्तथा ॥ केसरं
रिचोशीरकोलमज्जाहिमांबुना ॥ १३ ॥ पीत्वा मूर्छां जयेल्लिह्यात् कृष्णां वा मधुसंयुतां ॥ शुंठीग
चिकाक्षोदपोष्करग्रंथिकैः श्रृतं ॥१४॥ पिबेत्तोयं कणोपेतं मदमूर्छानिवृत्तये सितं धात्री
पिष्टं शुंठीद्राक्षानुयोजितं ॥ १५॥ लीढ्वा मधुसुतं मूर्छाकासश्वासं च नाशयेत् ॥ मूर्छायां रक्त
यां तु हितः शीतो विधिः सदा ॥१६॥ मद्यजायां पिबेन्मद्यं निद्रां कुर्यात्सुखेन वा ॥ विषोत्थायां
र्छायां विषघ्नं भेषजं चरेत् ॥१७॥ सर्वमूर्छासु कर्तव्यं रोमकेशापकर्षणं ॥ कपिकच्छावघर्षश्च
त्रिभिस्तोदनं तथा ॥१८॥ इत्याद्यासुरकर्मापि कुर्यात्संज्ञाप्रबोधने ॥ विवेद्यवासनिः क्वाथं स
मन्निवृत्तये ॥१९॥ घृतं धात्रीरसैः सिद्धं पथ्याक्वाथेन वा पिबेत् ॥ घृतं पर्युषितं तोयं मदमूर्छानि
रयां ॥२०॥ इति मूर्छामदन्यासचिकित्सा ॥ अथ पानात्ययस्य निदानं चिकित्सा ॥ मद्यं मिथ्योपयु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्याद्धिषमेवच्चमुक्तितः ॥ सेवितं तत्स्कधाम्राम्रमतः सेभ्रं पयोदितं ॥२१॥ कुंडे भीतिबुभुक्षात् दशो
कथायामपीडितैः ॥ साजीर्णादैः सुरापीताकुर्वाभ्रानाविधामयान् ॥२२॥ अथचिकित्सा ॥ मदात्यये
षुसर्वेषु मद्यवैषम्यसेवनात् ॥ आतेषु मद्यसात्म्यानां मुक्तामद्यनिषेवनं ॥२३॥ औषधं परमं शस्तंय
दि तेन नुशाम्यति ॥ तदा मधुरदुग्धादिसेवनीयैः शनैः शनैः ॥२४॥ खंडबेभाग्रं नंहयेः प्रवर्तितमदात्य
ये ॥ कपित्थदाडिमद्राक्षापानकं च प्रशस्यते ॥२५॥ मदात्ययमप्रमेहंति कोलाम्लांतरसैः कृतं ॥ शर्करा
मधुसंयुक्तंपानकं पानमात्रतः ॥२६॥ द्राक्षावृक्षाम्लखर्जूरामलीकामलकदाडिमैः ॥ परूषकैश्च स
हितामंथामद्यविकारनुत् ॥२७॥ खर्जूरामलकद्राक्षापरूषकरसेन वा ॥ कल्मयेत्तर्पणान्यूषान्
रसांश्चैव मदात्यये ॥२८॥ धात्रीरसेन संमिश्रं पथ्याकाथेन वा घृतं ॥ कल्याणाकं घृतं वापि मंदम्
डीहरं पिबेत् ॥२९॥ पित्तेक्षौद्रसितोपेतं मद्यं मधोदकं पिबेत् ॥ पित्तपानात्यये योज्यो सर्वतेश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ स॰
२०३

क्रियाक्रमाः॥३०॥ कफोत्थे पानरोगे तु लंघनं स्याद्धितोचितं॥ पिबेन्मद्यं दीपनीयैर्भेषजैः सहितं पु
नः॥३१॥ त्रिफलाया रसः पीतो मोषचूर्णसमन्वितः॥ शुष्कमूलकयूषो वा हंति पानात्ययामयं।
३२॥ होबेस्र्ये लाघवे जाते कफक्षीणे च लंघने॥ हिंगु सौवर्चलं व्योषं जीरकं विश्वदीपकं॥३३॥ पि
बेच्चूर्णं तु मद्येन पानात्ययनिवृत्तये॥ सौवर्चलं जीरकं च वृक्षाम्लं चाम्लवेतसं॥ एकैकं कर्षमात्रं स्या
त्वगेलामरिचानि तु॥ प्रत्येकमर्धकर्षाणि सर्वैस्तुल्या च शर्करा॥३५॥ लवणाष्टकनामेदं चूर्णं
पानात्ययापहं॥ इति मदात्ययचिकित्सा॥ अथ दाहरोगनिदानचिकित्सा॥ हेतुभिः कुपितं पि
त्तं समानमरुता सह॥३६॥ त्वचं प्राप्यासृजं सर्वदेहं दहति वह्निवान्॥ ताम्राभस्ताम्रनयनो लोह
गंधमुखानिलः॥३७॥ पित्तज्वरी तृषामूर्च्छा दाहे भवति मानवः॥ इति निदानं॥ अथ चिकित्सा
शतधौतघृताभ्यंगो धान्याम्लैश्च विलेपनं॥३८॥ काञ्जमल्लकसंयुक्तैः शस्यते दाहरोगिणः॥ २०३

205

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

छादयेद्दारनाऽऽर्द्रवस्त्रेणागानि देहिनः ॥ ४९ ॥ अनुलिंपेच्च लामज्जभूनंबचंदनकर्दमैः ॥ बीजयेच्चंद
नांभोभिः संसिक्तैस्तालवृंतकैः ॥ ५० ॥ प्रस्वापयेच्च दाहार्तं कदलीदलसंस्तरे ॥ कमलादिप्रसूतानां संस्तरे
चातिशीतले ॥ ५१ ॥ शीततरम्यप्रदेशेषु तिष्ठेत् दाहवान्नरः ॥ अंतर्दाहं च शमयेच्छीतैः क्वाथैः सचंदनैः
५२ ॥ क्षीरैः क्षीरकषायैश्च तथान्यैः शीतलौषधैः ॥ कालीयकरसोपेतैः समाम्लककुरंनटं ॥ ५३
हेमपत्राणां गोधूमलेपोयं दाहनाशनः ॥ जीवकाद्यैः कुशाद्यैश्च शालिपर्ण्यादिभिर्घृतं ॥ ५४ ॥ तैलंवा
साधितं हंति दाहं पित्तमरुद्भवं ॥ पित्तज्वरेषु यत्प्रोक्तमन्नमौषधलेपनं ॥ तच्च सर्वं प्रयोक्तव्यं दाहार्ति
भिषग्वरैः ॥ ५५ ॥ इति दाहचिकित्सा ॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे मूर्छामदात्ययदाहानां निदानं
चिकित्साकथनं नामैकत्रिंशत्तमोध्यायः ॥ ३१ ॥ अथोन्मादस्य निदानं चिकित्सामाह ॥ एकैकशो
संसर्गमनोव्याकुलताविषैः ॥ उन्मादास्तु शोकभयहर्षाद्यैश्चाशनादिभिः ॥ १ ॥ दोषप्रको

206

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ॰त्स॰ अनेनैर्भूताद्यावेशतोपि च ॥ हीनसत्वस्य जायंते षडुन्मादा यथोचितं ॥२॥ सुखदुःखादिविज्ञान
१०४ स्य भ्रंशश्चल मानसः ॥ अभिंततो भ्रमो भ्रष्टस्मृतिस्तैर्जायते नरः ॥३॥ हास्यरोदननृत्यादि गात्रसाद
दि वातजे ॥ पित्तजे क्रोधशीतेच्छा नग्नत्वग्न्यादिदर्शनं ॥४॥ कफजे रोचकच्छर्दिशोफस्त्रीहर्षकु
ता ॥ उन्मादे सन्निपातोत्थे सर्वलक्षणसंकरः ॥५॥ धननाशादिजैर्दैन्यं हाहेत्येकत्रिश्च रोदनं ॥
षेण श्याववक्त्रत्वं मूर्छेंद्रियबलक्षयः ॥६॥ भूतजे दुष्टवचनचेष्टाहारबलोदयः ॥ गंधर्वाद
श्च जानीयात् भोगेच्छादिकलक्षणैः ॥७॥ इति निदानं ॥ अथ चिकित्सा ॥ स्नेहपानं तु वातोत्थे
त्तिके च विरेचनं ॥ वमनं कफजे शस्तमुन्मादे प्रथमौषधं ॥८॥ सिद्धार्थकवचाहिंगुमंजिष्ठा
दारुच ॥ करंजत्रिफला श्वेता कटभीत्वक्कटुत्रयं ॥९॥ द्वे हरिद्रे शिरीषश्च सर्वमेतत्समांशकं ॥
पिष्टं बस्तस्य मूत्रेण परमांजनमौषधं ॥१०॥ नस्यं विलेपनं चैव स्नानमुद्वर्तनं तथा ॥ अ॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्मारविधोन्मादकृत्वालक्ष्मी विषापहं ॥११॥ सर्वभूतभयं हंतिराजवेश्मनि मानदं ॥ सिद्धं घृतमे
वमेतन्मंत्रेणासमन्वितं ॥१२॥ पूर्वोदितानुगुणान् सर्वान् प्रकरोति प्रयोजितं ॥ दशमूलकं दकं साज्यंय
सिद्धार्थकान्वितं ॥१३॥ केवलं वा नवं सर्पिः पिबेदुन्मादशांतये ॥ नश्ये वाभ्यंजने चैव तैलं सर्षपसंभ
१४॥ सर्वोन्मादेषु शस्तं स्यात् पिबेद्वातालजं रसं ॥ बंधुराश्वासयेद्वाक्यैः सून्मादार्थस्त संहितैः ॥१
अद्भुतं दर्शयेद्वास्य वदेदिष्टविनाशनं ॥ अभ्यक्तं सर्षपैस्तैलैर्बध्वाथ घर्मेथवान्यसेत् ॥१६॥ बि
षयेच्च सर्पेण हृतदंष्ट्रेन वानरं ॥ दांतैः सिद्धैर्गजाद्यैश्च त्रासयेदासुधेरपि ॥१७॥ नीत्वावाराजए
षे भर्त्सयेन्मंत्रपानया ॥ सात्वासम्यग्वशो दोषदेया कालबलाबलं ॥१८॥ उन्मादे भूतदोषाख्ये
कित्सामाचरेदिमां ॥ पितृदेवर्षिगंधर्वाद्युन्मादेषु विवर्जयेत् ॥१९॥ क्रूरकर्मजनादीनि भूतो·
देतुकारयेत् ॥ कुष्ठं पाठाश्च गंधाह्वं जीरकं कटुकत्रयं ॥२०॥ मांगल्यपुष्यालवणाजमोदेच्च

208

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लं० सा० शाके ॥ सर्वमेकीकृतं चूर्णं वचाचूर्णं च तत्समम् ॥ २१ ॥ मेलयित्वा रसे ब्रह्मनिर्मितायाश्च भावयेत्
२०५ वकुवारांस्ततः सिद्धं तच्चूर्णं कर्षमात्रकं ॥ २२ ॥ त्रिसान्मधुघृतोपेतं हिता । शी दिनसप्तकं ॥ विह
सर्वमुन्मादं धैर्यं कुर्याच्च चेतसः ॥ २३ ॥ मेधां स्मृतीश्च जनयेन्नरश्चास्य निषेवणात् ॥ पठेद्देक
मेश्लोक सहस्रं धारयेच्च तत् ॥ २४ ॥ इति सारस्वतं चूर्णं ॥ जटिला क्षीरकाकोली काकोली मर्क
वचा ॥ वाराही पूतनाकेशी हंसपादी हरीतकी ॥ २५ ॥ त्रायमाणा शताह्वा वचोरकः कटुरोहि
शतावरी गडूची च स्योनाको बृहतीद्वयं ॥ २६ ॥ अतिच्छत्रा मेषशृंगी शालिपर्णी पलंकषा ॥
मभागकृतैरेतैः गोघृतं साधयेद्बुधः ॥ २७ ॥ चातुर्थिकज्वरोन्मादापस्मारग्रहनाशनं ॥ महापै
शाचिकं नाम घृतं मेधास्मृतिप्रदं ॥ २८ ॥ इति महापैशाचिकं घृतं ॥ फलिनी दशमूली च मूर्वा
स्ना शतावरी ॥ गोक्षुरः श्यामूले चैभिस्तैः समाधितेजलं ॥ २९ ॥ घृतं च कल्कितैरेतैः साधि

शा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चेतसाभिधं ॥ मनो विकारहृत्सर्वोन्मादमूर्छाविनाशनं ॥ २० ॥ सर्वापस्मारशमनं ज्वरघ्नं श्रेष्ठ
षजं ॥ इति चेतसं घृतं ॥ बस्तमूत्रेण संयुक्तं हिंगु धूपं प्रयोजयेत् ॥ तेन शाम्यति वेगेन बलिनोपि ग्रह
वं ॥ शिरीषपुष्पमंजिष्ठाकृष्णा सिद्धार्थकं वचा ॥ २२ ॥ रजनी लशुनं शुंठी सर्वाण्येकत्र पेषयेत् ॥
स्तमूत्रेण संयुक्तान्विकुर्यान्नैर्वर्त्तिकां बुधः ॥ २३ ॥ छायामेव हि संशुष्का उन्मादे नयनांजनं ॥ कर्पासा
वचाकेशसर्पनिर्मोकहिंगुकैः ॥ २५ ॥ भृंगपीडितकं मांसी क्षुद्रा निर्माल्यकं तुषा ॥ नागेंद्र द्विज श्रृं
च मरिचं च सहिंगुकं ॥ समैरेभिः कृतो धूपः स्कंदोन्मादहरः परः ॥ पिशाचा राक्षसाः श्रूराः वेश
हविनाशनः ॥ २६ ॥ इति महाधूपवरः ॥ त्रिफलाहृद्रिशेकौती पृश्निपर्णी प्रियंगुका ॥ सारिवे द्वे
लिपर्णी दाडिमं नागकेसरं ॥ २७ ॥ नतां विशालां दंती च देवदारुर्वालुवालुकं ॥ नीलोत्पलैलामंजि
तालीसं बृहती तथा ॥ २८ ॥ जातीपुष्पं चंदनं च विडंगं कुष्टपद्मकं ॥ एतैः कर्षसमैः कल्कैर्जं

210

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स०
१०६

त्वा चतुर्गुणं ॥ ३९ ॥ घृतप्रसृतं पचेद्धीमानपस्मारे ज्वरक्षये ॥ उन्मादे वातरक्ते च कासे मंदानले तथ
मूत्रकृच्छ्रे विसर्पे च तृतीयकचतुर्थके ॥ प्रतीश्याये करीशूले कंडूपांड्वामये तथा ॥ ४१ ॥ विषदुष्टे प्र
च सर्वत्रैवोपयुज्यते ॥ वंध्यानां पुत्रदं भूतग्रहरक्षोहरं परं ॥ ४२ ॥ पानेन स्येत तथाभ्यंगे शस्तं कल्य
कं घृतं ॥ इति कल्याणं घृतं ॥ अपस्मारचिकित्सायां यत्किंचिदुपदेश्यते ॥ ४३ ॥ उन्मादेषु तितत्स
आचरेदौषधादिकं ॥ अग्निकूपादिसान्निध्यं शस्त्रादिग्रहणं तथा ॥ ४४ ॥ विषादिभक्षणं रक्षेः
देषु प्रयत्नतः ॥ इत्युन्मादरोगचिकित्सा ॥ अथापस्माररोगनिदानं ॥ भ्रमसीव मतिभ्रंशो विसं
हस्तपादयोः ॥ ४५ ॥ दोषवेगेन यत्रस्यादपस्मारः स उच्यते ॥ मूर्छाहृत्कंपशून्यत्वध्यानस्वेदः
ढता ॥ ४६ ॥ निद्रानाशश्च इति पूर्वरूपं तस्य भविष्यतः ॥ हेतुभिः कुपिता दोषाः शोकाद्यैश्च वि
षतः ॥ ४७ ॥ संज्ञावाहीनसंदूष्य स्रोतांसि सस्मतिनाशकाः ॥ अपस्मारं प्रकुर्वंति सचतुर्धा नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

घृते ॥ ४८ ॥ वातिकः पैत्तिकश्चैव श्लैष्मिकः सान्निपातिकः ॥ पक्षाद्वा द्वादशाहाद्वा मासाद्वां
ष वेगतः ॥ ४९ ॥ सम्भवेदन्यदा दोषावर्त्तते वेगवर्ज्जिताः ॥ इति निदानं ॥ अथ चिकित्सा ॥ बस्ति
वातिकं पूर्वं विरेकैः पित्तसम्भवं ॥ वमनैः श्लेष्मसंभूतमपस्मारमुपाचरेत् ॥ पुरावत्तभवा विष्ठा ता
म्बं च मनःशिला ॥ नेत्रयोरंजनं हन्यात् अपस्मारं न संशयः ॥ शिरीषयष्टिका हिंगुलशुनामयवक्क्षं
५२ ॥ सर्वैर्वैः साज्यमूत्रैश्चापस्मारे नावनांजनं ॥ कपित्थसारदोशारयवमुद्गकटुत्रयं ॥ ५३ ॥ मु
नबस्तमूत्रेण पिष्टा वर्त्तिः शुकस्यपेत् ॥ अपस्मारे ज्वरे सर्पदंष्ट्रेषु विषमूर्छिते ॥ ५४ ॥ गरार्दिते:
मूत्रेवर्त्तयः स्युः सुधोपमाः ॥ सक्षौद्रं यो वचाचूर्णं क्षीरभक्ताशनो नरः ॥ ५५ ॥ लिह्याज्जयेदपस्म
सन्निरोध्य मपि ध्रुवं ॥ घृतादष्टादशगुणे कुष्माण्डस्वरसे पचेत् ॥ ५६ ॥ यष्टीकल्कान्वितपानात
पस्मारं व्यपोहति ॥ क्षीरं बर्हिशिखामूलं गो घृतेन समन्वितं ॥ ५७ ॥ मासमात्राद पस्मारं ना

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रू०स०
१०७

ये ऽत्र संशयः ॥ श्राणमूलंकणा रास्ना दशमूलशतावरी ॥ ५८ ॥ त्रिवृत्सोभांजनैरंडकाथमेभिः
कल्पयेत् ॥ द्रुमेदे दैनकाकोल्यौ विदारी मधुयष्टिका ॥ ५९ ॥ सितारवर्जूरमद्वीकाभीरुमज्जा च गोक्षुरः
एतैः कल्कैः कृतैः सर्पिः साधयेच्चेतसाऽन्वत् ॥ ६० ॥ महाचेतसनामेदं घृतमुन्मादनाशनं ॥ जये
नपस्मारान् श्वातुर्थिक तृतीयकौ ॥ ६१ ॥ पापालक्ष्मीग्रहाश्चैव प्रतीश्यायं च नाशयेत् ॥ श्वासं कासं च
यतिशुक्रार्तवविशोधनं ॥ ६२ ॥ आलोरसैः शंखपुष्पी वचा कुष्टैश्च साधितं ॥ घृतं पुराणमुन
रग्रहापस्मारनाशनं ॥ ६३ ॥ गोशकृद्रसदुग्धाम्लदधिमूत्रैर्घृतं समैः ॥ सिद्धं चातुर्थिकोन्माद
हापस्मारनाशनं ॥ ६४ ॥ पंचगव्यघृतं ॥ उन्मादेषु यदुद्दिष्टं पथ्यं नस्यांजनौषधं ॥ अपस्मारेषु त
दृप्रयोक्तव्यं भिषग्वरैः ॥ ६५ ॥ मृतसूताभ्रलोहं च शिलागंधं च तालकं ॥ रसांजनं च तुल्यांशं नर
त्रेण मर्दयेत् ॥ ६६ ॥ तक्रोल्लिखितगुणं गंधं लोहपात्रे समं पचेत् ॥ पच्यं गुंजोन्मितं भक्ष्यमपस्मारहं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रं ॥ ६७ ॥ व्योषं सौवर्चलं हिंगु नरमूत्रेण सर्पिषा ॥ पिबेत्कर्षमितं पश्चात् रसोयं भूतभैरवः ॥
इति भूतभैरवरसः ॥ जलावगाहनं वाजी वृषवृक्षादिरोहणं ॥ संग्राममग्निसान्निध्यमपस्मा
दास्यजेत् ॥ ६९ ॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे उन्मादापस्माररोगयोर्निदानं चिकित्साकथनं नाम द्वा
त्रिंशत्तमोऽध्यायः ॥ ३२ ॥ अथ वातरोगस्य निदानं चिकित्सा ॥ अतिरूक्षाल्पशीतानिलघ्वादिनिषेव
णात् ॥ व्यवायो द्रवनात्यर्थं व्यायामं भीविगाहनात् ॥ १ ॥ रात्रौ जागरणाद्वेगधारणाद्धातुसंक्षया द
असृग्निर्गमनाद्धात्रशोषणादतिलंघनात् ॥ २ ॥ अभिघातान्नथैवामात् कामशोकभयादिभिः
वेगवद्गजवाहादियानादिपतनादिभिः ॥ ३ ॥ देहे प्रदुष्टः पवनः स्रोतांस्यापूर्य सर्वतः ॥ सर्वांगे
देशे वा करोति विविधामयान् ॥ ४ ॥ तेषां वातविकाराणामव्यक्तं पूर्वलक्षणं ॥ रूपं वातविकाराणां
थारुद्धान निबद्धेत् ॥ ५ ॥ सर्वसंकोचसंस्तंभो भेदस्यादस्थिपर्वणां ॥ प्रलापो रोमहर्षश्च शिरः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०सं० ष्टकनिग्रहः ॥६॥ कुब्जत्वं पांगुल्यमंगशोषो विनिद्रता ॥ अंगाणां स्फुरणं सुप्तिर्वक्रत्वं पार्श्वशूल
१०८ कृ ॥७॥ ग्रीवामन्याहनुस्तंभो मनसः शून्यता भवेत् ॥ गर्भशुक्ररजोनाशो हृत्पीडा चित्तविभ्रमः ॥८
इत्याद्यस्तथान्येपि विकारा वातकोपजाः ॥ हेतुप्रदेशभेदेन जायंते बहुधामयान् ॥९॥ वाते को
गते तु ष्टेनिग्रहे मूत्रवर्चसोः ॥ गुल्मार्शपार्श्वशूलानि पीडा हृदयकुक्षिषु ॥१०॥ सर्वांगेषु मरुत्वे
गात्रस्फुरणभंजनं ॥ संधीनां स्तब्धता भेदः सर्वांगे मोटनं व्यथा ॥११॥ मलाशयस्थिते वाते मलं
त्रमरुद्ग्रहाः ॥ पृष्ठरुक्त्रिकजंघोरूपीडा शूलाश्मशर्करा ॥१२॥ आमाशये स्थिते स्तब्धोदरहृत्पार्श्व
नाभिरुक् ॥ श्वासः शोफश्च कंपश्च कासो ह्यारविशूचिका ॥१३॥ पक्वाशयं गते वाते शूलाटोपं
कूजनं ॥ अनाहस्तकपीडा च हृद्रुग्ता मूत्रवर्चसोः ॥१४॥ इंद्रियस्थानगः कुर्यादिंद्रियाणामपा
टवं ॥ लघुवेगतया शीघ्रं शांतिं याति स्वनादपि ॥१५॥ इति वायुरोगनिदानं ॥ चिकित्सामाह ॥ स्वेदः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मेववा तानामभ्यंगः स्वेदनं तथा ॥ नस्यं विरेचनं बस्तिकर्म पूर्वं प्रशस्यते ॥ १६ ॥ स्वादुम्लतिक्तलव
णं रूक्षा स्मादि निषेवणे ॥ निर्वातगृहसंस्थाने रुक्ष्मतत्र प्रवृणादिभिः ॥ १७ ॥ वातजे पद्मलकैरेरण्डपाना
सेवनैः ॥ यूषः पटोलफलजो रूक्षो वा वातहरो लघुः ॥ १८ ॥ यूषो भद्रोदनी सिद्धः सर्ववातविनाशनः ॥ प
मूलेन संसिद्धं बलायुक्तेन यत्पयः ॥ १९ ॥ सेव्यमानं तु सततं वातं तद्धि निवारयेत् ॥ चित्रकेतिविषा
ठाकटुकेंद्रयवा निशा ॥ २० ॥ गणः षड्धरणो ह्येषः वातव्याधिविनाशनः ॥ वाते पक्वाशयं याते कु
त स्निग्धविरेचनं ॥ २१ ॥ बस्तिकर्मापि कुर्वीत प्राशांश्च गुडवणा नरान् ॥ शोधनीयानि कार्याणि त
बस्तिगते पिवा ॥ २२ ॥ वाते श्रोत्रादिकं प्राप्ते कुर्याद्वातहरं विधिं ॥ स्नेहाभ्यंगोपनाहांश्च मर्दनालेप
नि च ॥ २३ ॥ त्वङ्मांसासृक्शिरासंस्थे कुर्यादसृग्विमोक्षणं ॥ स्वेदोपनाहाग्निकर्मबंधनोन्मर्दनानि
च ॥ २४ ॥ संध्यस्थिस्नायुगे वायौ मणिमंथेन दाति ते ॥ नाडीस्वेदस्त्रिवलाचूर्णपे तत्र मारुते ॥

216

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वा॰ त्स॰ मन्यावसस्त्रिकसंधेदेशेषु पवनोभ्छितेन स्वंचवमनंनैवकार्यंतत्रयथोदितं ॥ २६ ॥ माषरोहिषवे
१०९ रंडबलारास्नाचमर्कटी ॥ अश्वगंधेतिचक्वाथो हिंगुसैंधवसंयुतः ॥ २७ ॥ सम्यक्कनस्यतिपीतोयुहंति
वातोद्भवामयान् ॥ पक्षाघातेकर्णनादंमन्यास्तंभंतथार्दितं ॥ २८ ॥ रास्नामृतामहादारु नागरैरंडज
जं ॥ समस्थानुगतेवातेसमेपूर्वंगिगेपिबेत् ॥ २९ ॥ इतिरास्नादिपंचकं ॥ हिंगुपौष्कर चूर्णाख्यो ह
मूलसमोजयेत् ॥ गंधसीकेवलः क्वाथः शेफालीपत्रजस्तथा ॥ ३० ॥ रास्नागोक्षुरकैरंडदेवदारु
नर्नवा ॥ गुडूच्यारग्वधश्चैव क्वाथमेषांविपाचयेत् ॥ ३१ ॥ शुंठीचूर्णेनसंयुक्तं पिबेज्जंघारुत्रिग
पार्श्वपृष्ठोरुपीडायामामवातेसुदुस्तरे ॥ ३२ ॥ रास्नासप्तकं ॥ रास्नाद्विगुणभागास्यादेकभागंत
परं ॥ धन्वयासबलैरंडदेवदारुसठीवचा ॥ ३३ ॥ वासकोनागरंपथ्याचव्यमुस्तपुनर्नवा ॥ गडूची
द्दु दारुश्वशतपुष्पाचगोक्षुरः ॥ ३४ ॥ अश्वगंधाप्रतिविषाकृतिमालः शतावरी ॥ कृष्णासहचरेभ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

217

धान्यकं बृहतीद्वयं ॥ ३५ ॥ एभिः [illegible]तं पिबेत् क्काथं शुंठीचूर्णेन संयुतं ॥ कृष्णाचूर्णेन वा योगराजगुग्
लुनाथवा ॥ ३६ ॥ अजमोदादिना वा [illegible]ले नैरंडजेन वा ॥ सर्वांगकंपे कुब्जत्वे पक्षाघाते च बाकुके ॥ ३७ ॥ गृ
ध्रस्यामामवाते च श्लीपदे चापतानके ॥ अंत्रवृद्धौ तथाध्माने जंघाजानुगते र्दिते ॥ ३८ ॥ शुक्रामये मेढ्ररोगे
वं ध्मायो मयेपि वा ॥ महारास्नादिराख्यातो ब्रह्मणा वातशांतये ॥ ३९ ॥ इति महारास्नादिः ॥ एरंडब
ज पूरास्त्र गोक्षुर बृहतीद्वयं ॥ अश्मभेदस्तथा बिल्व एषां मूलैः कृतं श्रितं ॥ ४० ॥ एरंडतैलहिंग्वाढ्यः स
वक्षार सैंधवः ॥ स्तनस्कंधकटीमेंढ्र हृदयोत्तिमथांजयेत् ॥ ४१ ॥ एरंडसप्तकः ॥ नागरैरंडयोः क्वाथ
वा इंद्रयवस्य च ॥ हिंगुसौवर्चलोपेतो वातशूलनिवारणः ॥ ४२ ॥ शुंठ्येरंडक्कोरसोनस्य तिलैस्तैलेन मि
श्रितः ॥ वातरोगाज्जयेत्तीव्रान्विषमज्वरनाशनः ॥ ४३ ॥ पक्वकंदरसोनस्य गुलिका निस्तुषीकृत
पाटयित्वाथ मध्यस्थ द्वरी कुर्यात्तदंकुरं ॥ ४४ ॥ तदुग्रगंधनाशाय रात्रौ तक्रे विनिक्षिपेत् ॥ अप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०सा० यन्त्वतन्मध्याच्छिलायां पेषयेत्ततः ॥ ५५ ॥ तन्मध्ये पंचमांशेन चूर्णमेषां विनिःक्षिपेत् ॥ सौवर्चलं य
११० वानीच भर्जितं हिंगु सैंधवं ॥ ५६ ॥ कटुत्रिकं जीरकं च समभागानि चूर्णयेत् ॥ एकीकृत्य ततः सर्वं क
ल्कं कर्षप्रमाणतः ॥ ५७ ॥ खादेदग्निबलापेक्षी तथा दोषबलाबलं ॥ अनुपानं ततः कुर्यादेरंडश्रृतम
म्बु हि ॥ ५८ ॥ सर्वांगैकांगजं वातमर्दितं चापतंत्रकं ॥ अपस्मारं तथोन्मादं ऊरुस्तंभं च गृध्रसी ॥ ५९ ॥ उरः
पृष्ठःकटीपार्श्वकुक्षिपीडां हरमीनुजयेत् ॥ अजीर्णमातपं रोषं मतिनीरं पयो गुडं ॥ रसोनसेवी पुरुषस्त
जेदेतन्निरंतरं ॥ इति रसोनकल्कः ॥ शतमंशावशेषेण बलाक्वाथेन साधयेत् ॥ ६१ ॥ तैलं तत्र क्षिपेत्क
ल्कमेभिस्तत्त्यांशकैः कृतं ॥ चंदनोसलमंजिष्ठायष्टीपद्मककुष्ठकैः ॥ ६२ ॥ पिप्पलीकेसरैलात्वक्प
त्रकागरुजीरकैः ॥ गोक्षीराढकसिद्धं तत्तैलं वातामयापहं ॥ धातुस्तंभान्महावातान्ज्वरानपि वि
नाशयेत् ॥ इति बलाद्यं तैलं ॥ हरिद्रा पिप्पली शुंठी कुष्ठं जीरकं सैंधवं ॥ ६४ ॥ यष्टी वचा जमोदे

९१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिचूर्णमालोड्य सर्पिषा ॥ पूर्वाह्णे भक्षयेन्नित्यं लेहं कल्याणकाभिधं ॥ ५५ ॥ एकविंशतिरात्रेण वातरो
गानिमान्जयेत् ॥ अजउगद्गदमूकत्वं श्रुतिमांद्यं च नाशयेत् ॥ ५६ ॥ गंभीरोदारमधुरध्वनिः स्याद्स्य सेव
नात् ॥ इति कल्याणकोवलेहः ॥ रास्नैरंडामृताशुंठीदेवदारु च गुग्गुलं ॥ ५७ ॥ विमर्द्य गुटिका खादेद्वातरो
गी भगंदरी ॥ नाडीव्रणयुतं कर्णनेत्ररोगी च सर्वदा ॥ ५८ ॥ रास्नाद्यो गुग्गुलुः ॥ तेजस्विन्यो योषयुता
यवानी च शतावरी ॥ अश्वगंधागुडूची च हपुषा चैव गोक्षुरः ॥ श्यामा नागरकं रास्ना समान्येतानि
चूर्णयेत् ॥ दत्वा चूर्णसमं चात्र गुग्गुलुं च घृतं ततः ॥ ६० ॥ गुग्गुलोरर्द्धभागेन सर्वमेकत्र मर्दयेत् ॥ खा
देत् शार्द्धकं नित्यं कोष्णं चानु पिबेज्जलं ॥ क्षौद्रं वा मुद्गयूषं वा जयेद्रोगानिमांस्ततः ॥ बाहुकंपगृध्रसी
पृष्ठकटिजानुहनुग्रहान् ॥ ६२ ॥ संधिगं मारुतं पादकरग्रीवादिपीडितं ॥ अस्थिगतं स्नायुगतं मज्जास्थि
तमुरोग्रहं ॥ कुअलं सरुजद्रोगान्योनिगर्भाश्रितामयान् ॥ आमानपि च वातोत्थान् रोगान् हंति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ सं॰ न्न संशयः॥६४॥ त्रयोदशांगको नाम गुग्गुलुः सर्ववातजित्॥ इति त्रयोदशांगगुग्गुलुः॥ तैलेने
१११ रंडजेन शुंठीकषायेण पिबेन्महं भकुक्षिबस्तिकटीशूलदशमूलोसतेन वा॥६५॥ बलामूलकषायस्य
भागाश्चत्वारो प्रकल्पयेत्॥ अंशोत्र दशमूलोत्थ क्वाथभागान् समाहरेत्॥६६॥ कुलत्थयवकोलानां नि
क्वाथश्चाष्टभागिका॥६७॥ गोक्षीरश्चाष्टभागश्च चतुर्थे तु पयः पचेत्॥ एकभागमितं तैलं तस्मि
न्कल्कमिदं क्षिपेत्॥६८॥ सैंधवागरुमंजिष्ठा चंदनं देवदारु च॥ रास्नं च सरलं कुष्ठं मेलाशैलेयपत्र
कं॥६९॥ शालिपर्णी पृष्टपर्णी शतपुष्पा पुनर्नवा॥ वचाशतावरी मांसी तगरं चाश्वगंधिका॥७०॥
मधुरश्च गणः सर्व एषां कल्कसमीरितः॥ सिद्धतैलं शुभे पात्रे बलाख्यं स्थापयेत्सुधीः॥७१॥ स
र्वेषु वातरोगेषु प्रशस्तं गर्भिणीषु च॥ प्रसूतासु च नारीषु पुरुषे क्षीणरेतसि॥७२॥ अश्माभिपत्रे
हिकार्ते गुल्मार्ते च विशेषतः॥ षण्मासानुपयोगेन वंध्यापि तनयो भवेत्॥७३॥ सर्वरोगविनिर्मु
११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रः पंचसायकविग्रहः ॥ इतिबलाद्यंतैलं ॥ क्वाथेकेतकिमूलस्य बलातिबलयोरपि ॥ ७४ ॥ पक्वंतैलं
तुषजलेबकुले प्रपचेत्ततः ॥ केतक्यादिजयेत्तैलमास्थिप्राणमरुद्भयं ॥ ७५ ॥ प्रसारिणीमुग्निमंथंपा
टलंबृहतीद्वयं ॥ अश्वगंधाबलामुद्गंमस्योनाकंचपुनर्नवा ॥ ७६ ॥ एरंडकेतकीरास्नानिर्गुंडीचकुरंट
कं ॥ फणीजकंमर्कटीचकुर्याद्दशपलंपृथक् ॥ ७७ ॥ चतुर्द्रोणेजलेपक्वापादशेषंश्रृतंनयेत् ॥ तैलाढ
केनसंयोज्यशतावर्यारिसाढकं ॥ ७८ ॥ क्षिपेत्तत्रचगोक्षीरंतैलात्तस्माच्चतुर्गुणं ॥ शनैर्विपाचयत्से
भिः कल्कैर्द्विपलकैः पृथक् ॥ ७९ ॥ कुष्ठैलाचंदनबलाशतपुष्पेंद्रदारुभिः ॥ पर्णीचतुष्टयेनैवमांसी
शैलेयसैंधवं ॥ ८० ॥ रास्नाश्वगंधातिबलाचंदनागरुमुस्तकैः ॥ पुनर्नवालवंगाभ्यांमंजिष्टायष्टि
कानखैः ॥ ८१ ॥ श्रीवासग्रंथिपर्णीभ्यांनतपत्रतुरुष्ककैः ॥ जातीपत्रजातिफलेस्तथैवगजकेस
रैः ॥ ८२ ॥ पचेन्मधुरवर्गैश्चयथालाभंतुकल्कितैः ॥ कर्पूरंकुंकुमंचैवकस्तूरीचत्रयंततः ॥ ८३

222

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ सं॰ २३२

यथालाभं विनिःक्षिप्य तैलं तच्छ्रेष्ठभाजने ॥ स्थापये भावमभ्यंगे पाने बस्तौ नियोजयेत् ॥ ८४ ॥ प्रसा
धात हनुस्तंभं गतिभंगं कटिग्रहं ॥ गात्रशोषं इन्द्रियध्वंसं मन्यास्तंभं गलग्रहं ॥ ८५ ॥ पार्श्वशूलं च पंगुत्वं
वृद्धिहानिं च गृध्रसी ॥ कुब्जत्वं पंगुतां चैव नष्टशुक्रं ज्वरक्षयात् ॥ ८६ ॥ अन्याश्च विषमान्वातान् मये
त्सर्वांगसंस्थितान् ॥ अस्य प्रभावाद्वंध्यापि नारी पुत्रं प्रसूयते ॥ ८७ ॥ मर्त्योपि वा तुरंगो नागो तैलादस्मा
त्सुखी भवेत् ॥ यथा नारायणो देवो दुष्टदैत्यविनाशनः ॥ ८८ ॥ तथा नारायणं तैलमिदं वातामयापहं
इति नारायणतैलं ॥ प्रसारणीपलशतं जले द्रोणे पचेद्भिषक् ॥ पादशेषं जलं ग्राह्यं तैलं दधि च तत्समं ॥
८९ ॥ कांजिकं च समं तेन तैलात्क्षीरं चतुर्गुणं ॥ तैलात्तथाष्टमांशेन सर्वाण्येतानि कल्पयेत् ॥ ९० ॥ मधु
कं पिप्पलीमूलं रास्ना च गजपिप्पली ॥ प्रसारिणी देवदारु चित्रकं सैंधवं वचा ॥ ९१ ॥ भल्ली च शतपु
ष्पा च मांसी मिश्रं च विपाचयेत् ॥ एतत्तैलं वरं पक्वं वातश्लेष्मामयान् जयेत् ॥ ९२ ॥ कोष्ठे खंजत्व पांगु

१

223

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लं ग्रध्रसीमर्द्दितं तथा ॥ हनुपृष्ठकटिग्रीवाशिरस्तंभं च नाशयेत् ॥ ९३ ॥ अन्यांश्च विषमान् वातान्
सर्वानाशु विनाशयेत् ॥ ९४ ॥ इति प्रसारिणी तैलं ॥ माषक्वाथेन संसिद्धं तैलं सैंधवकल्कितं ॥ नस्यपानेत
थाभ्यंगे वातरोगेषु शस्यते ॥ ९५ ॥ इति माषतैलं ॥ तैलं पचेन्माषबलाकषाये रास्नाशताह्वाकपिकच्छु
माषैः ॥ एरंडसिंधूत्थयुतैः समस्तैः पक्षाभिघातं विनिहंति वातं ॥ ९६ ॥ इति माषतैलं ॥ हिंगुजिंगिणि
क्षिपीसोरोचकं मर्करीचुचा ॥ नस्यमेतन्निहंत्याशु चिरोत्थमपि बाडुकं ॥ ९७ ॥ शुंठंस्तेमनं तं लोहं ता
प्यं गंधकतालकं ॥ पथ्याग्निमंथनिर्गुंडी त्र्यूषणं टंकणं विषं ॥ ९८ ॥ तुल्यांशं मर्दयेत् खल्वे दिनं निर्गुंडि
काद्रवैः ॥ मुंडीद्रावैर्दिनैकं तु द्विगुंजं वटकीकृतं ॥ ९९ ॥ भक्षयेद्वातरोगार्तो रसस्वच्छंदभैरवः ॥ रास्नाम
तादेवदारुशुंठीवानारि जसतं ॥ १०० ॥ सगुग्गुलुः पिबेत्कोष्णमनुपानं सुखावहं ॥ इति स्वच्छंदभैरवो
रसः ॥ रूक्षान्नशीतजलगाहनमैथुनानि व्यायामशोकभयजागरसेवनानि ॥ उष्णादियानविषमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल० त्स०
२२३

शानलं घनानि वा तामयी परिहरेद्दपि वातमुक्तः ॥१०२॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे अशीतिवातरोगनि
दानं चिकित्सा कथनं नाम त्र्यस्त्रिंशत्तमोध्यासः ॥३३॥ अथ वातरक्तनिदानं चिकित्सा ॥ लवणाम्ल
विदाहि स्निग्धाम्लानि कटूनि च ॥ विरुद्धमस्वितानूपशुष्कनीरोद्भवामिषं ॥१॥ माषारनालमूला
नि मद्यानि विषमासनं ॥ पिण्याकादीनि चान्यानि सेवमानस्य चानिशं ॥२॥ अजीर्णभोजनं क्रोधदि
वास्वप्नादिकारणं ॥ सुकुमारतनोः प्रायः स्थूलः स्याः श्रमकारिणः ॥३॥ प्रदुष्टो मारुतो रक्तं प्रदहं
स्तस्य धाश्रितः ॥ रक्तं न शुद्धमांसस्य हेतुं तं याति दूषितं ॥४॥ वातरक्तमिति प्रोक्तं वायुना रक्तदूष
णात् ॥ तस्य प्राग्लक्षणं स्वेदो बहुत्वा नैव वा भवेत् ॥५॥ कृशत्वं च तनोरंगभ्रसुप्ति पिटकोद्गमः
संधिशैथिल्यमालस्यमल्पहेतुव्रणाति रुक् ॥६॥ हस्तांघ्रिसंधिकच्चूरु आनुजंघागभेदनं ॥ स्य
शप्रबोधशून्यत्वं वैवर्ण्यं स्फुरणं तथा ॥७॥ कंडूसंधिषु रुग्दाहो भूत्वा नश्यति वासकृत् ॥ गात्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पां गौरवं देहे मंडलानां च दर्शनं ॥ ८ ॥ पादयोः कुपितो शोथं विशेषाणां नयानतः ॥ हस्तयोश्चाप्यगा
त्रेषु प्रवृत्तं वातशोणितं ॥ ९ ॥ विकारान् कुरुते नेकान् कष्टानि सकलान्यपि ॥ इति निदानं ॥ अथ चिकि
त्सा ॥ वातरक्ते हरेद्रक्तं यथादोषं यथाबलं ॥ १० ॥ यथा न कुप्यते वायुः श्रावयेद्रुधिरं तथा ॥ पुराणाः
षष्टिका गोधूमा यवशालिमकुष्टकाः ॥ ११ ॥ श्यामाकयवमुद्गाद्याश्च पाका वातरक्तिनां ॥ गडूची
धान्यशुंठीभिः कषायं साधितं पिबेत् ॥ १२ ॥ वातरक्तं न कुष्ठानि तेन शीघ्रं व्यपोहति ॥ गडूच्यायः
कृतं क्वाथं पिबेद्गुग्गुलुसंयुतं ॥ १३ ॥ स जयेद्दीर्घकालोत्थमचिराद्वातशोणितं ॥ बहुकालं निषेवे
त यो गडूच्या रसं नरः ॥ चूर्णकल्ककषायं वा वातरक्ते समुच्यते ॥ त्रिस्रोता वा पंच वा पथ्या जग्ध्वा गुड
समन्विता ॥ १५ ॥ पिबेत्सोमोद्भवा क्वाथं वातरक्तं विनाशयेत् ॥ नागरं पिप्पली चव्यं सर्षपाजीरक
द्वयं ॥ १६ ॥ भष्टहिंग्वजमोदा च पिप्पलीमूलचित्रकैः ॥ कटुफलाति विषा भार्गी विडंग गज पिप्प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शा०सं० ली॥१७॥ रेणुकेंद्रयवापाठावचामूर्वीति भागतः॥ प्रत्येकं शाणका निःस्युः द्रव्याणी मानि विंश
११४ तिः॥१८॥ द्रव्येभ्यः सकलेभ्यश्च त्रिफला द्विगुणा भवेत्॥ एभिश्चूर्णैः कृतैः सर्वैः समो देयः पलः गु
ग्गुलुः॥१९॥ एकपिंडेनतः कृत्वा स्थापयेद्घृत भाजने॥ कृत्वा च गुटिकास्तस्य शाणमात्रा प्रयोजयेत्॥२०
गुग्गुलुर्योगराजोयं त्रिदोषघ्नो रसायनः॥ मैथुनाहारपानानां त्यागो नैवात्र विद्यते॥२१॥ सर्वान्वात
मयान्वातरक्तं चाशुनिवारयेत्॥ कुष्ठान्मष्टादशाशांसि प्रमेहान्गृहणीस्तथा॥२२॥ उदावर्तं क्षयं गु
ल्मं नाभिशूलं भगंदरं॥ मंदाग्निं श्वासकासांश्चाप्यपस्मारमुरोग्रहं॥२३॥ नाशयेदुपयोगेन रोगा
न्यांश्च सर्वतः॥ रेतोदोषहरः पुंसां रजोदोषहरः स्त्रियां॥२४॥ वंध्यानां गर्भदश्चैव पुंसां चापत्यजन्म
द॥ विविधं मारुतं हंति रास्नादिक्वाथसंयुतः॥२५॥ काकोल्यादिसृतात्पित्तं कफमारग्वधादिनः॥
मेदोवृद्धिं च मधुना गोमूत्रेण च पांडुतां॥२६॥ दार्वी सितेन मेहांश्च कुष्ठं निंबसृतेन च॥ छिन्नाका

११

227

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

थेन वातास्रशोफं शूलं त्रिरक्तसत्तमात् ॥२७॥ त्रिवृन्मूषकजं हंति पाटलाक्वाथसंयुतं ॥ पुनर्नवादि क्वाथेन
हन्यात्सर्वोदराण्यपि ॥२८॥ नेत्ररोगान् जयेद्धेषा त्रिफलाक्वाथसंयुतः ॥ इति योगिराजगुग्गुलुः ॥ मं
जिष्ठाति विषा किरातक महानिंबामृता चित्रकं भार्गीनिंदन पिप्पली घनवचा पूती कषायोदकं ॥ पाठारग्व
धदेवदारुकटुकाक्षुद्राहरिद्राद्वयं वासानिंब जसार वत्सकविडंगत्रायमाणान्वितं ॥२९॥ मूर्वात्रैभूफलसा
रिवेंदुयवकृष्णामापटोलकुशाः शुंठी पर्पट बीजकं सवदिरेंद्राक्रोसलके तथा ॥ ब्राह्मीवाकुचिका नवैं
वरुणं क्वाथः समे कल्पितो वातास्रं विनिहंति कुष्ठनिजयं त्वग्दोषरक्तामयान् ॥३०॥ इति मंजिष्ठा
दिकषायः ॥ सारिवासिक्थमंजिष्ठासर्जैर्यष्टी पयोयुतैः ॥ सिद्धं तैलं तु पिंडाख्यं वातरक्तनिवारयेत् ॥
३१॥ इति पिंडतैलं ॥ अमृताक्वाथकल्काभ्यां सक्षीरं सारिवं घृतं ॥ वातरक्तं निहंत्याशु कुष्ठान्यष्टाद
शापि च ॥३२॥ अमृताद्यं घृतं ॥ पटोलकटुकाभद्री गडूची त्रिफलासमा ॥ क्वाथोयं विनिहंत्याशु स

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लु०स० ११५

दाहं वातशोणितं ॥ ३३ ॥ विदाहीलवणोष्णानि स्निग्धं शीतं वुवाहनं ॥ अजीर्णमिह्दिवास्वप्नं वातरोगी
विवर्जयेत् ॥ ३४ ॥ इति लक्ष्मणोत्सवे ग्रंथे वातरक्तनिदानचिकित्साकथनं नाम चतुस्त्रिंशत्तिमोध्यायः
३५ ॥ स्निग्धरूक्षोष्णशिशिरकठिनद्रवसेवनैः ॥ जीर्णाजीर्णाद्विकाहारैर्विरुद्धद्वंद्वसेवनैः ॥ १ ॥ रात्रौ
आगरणेरह्निनिद्राभिः सकफानिलः ॥ मेदोयुतश्च संदूष्य संचितामं स्वहेतुभिः ॥ २ ॥ सक्थ्यस्थी
निप्रपूर्यान्तः स्यादूरुस्तंभकारकः ॥ परकीयाविवगुरू स्यातामूरू च शीतलौ ॥ ३ ॥ अतिमथेन भव
तः श्लेष्मासंमुत मारुतात् ॥ इति निदानं ॥ अथ चिकित्सा ॥ मुत्स्यात्तक्कफहरं किंचिदामस्य च विशो
धनं ॥ ४ ॥ वातप्रशमनं कार्यमूरुस्तंभे तदौषधं ॥ सर्षपः सौद्रवल्मीकमृत्तिका संयुतैर्दृढं ॥ ५ ॥
ऊरुस्तंभे विधातव्यमाछादनमतिप्रथे ॥ ऊरुस्तंभविनाशाय गोमूत्रेण पुरं पिबेत् ॥ लिह्याद्वा
त्रिफलां चव्यतिक्तां ग्रंथिकं माक्षिकं ॥ त्रिफलारोहिणीचूर्णं लिह्यान्मधुसमन्वितं ॥ ७ ॥ उरुस्तं

१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भे पिबेत्कोष्णं त्रिफलाकटुकाश्रितं ॥ पिबेत्पट्टचरणाक्षोदं मुरसं तं भेसतांबुना ॥ ८ ॥ पिप्पलीव
र्द्धमानं सक्षौद्रं रसादेहुउ नवा ॥ इत्यूरुस्तंभचिकित्सा ॥ अथामवातनिदानं ॥ विरुद्धभोजने दुष्टअभि
श्रमविवर्जनात् ॥ ९ ॥ अग्निमांद्यादतिस्निग्धभोजनादामसंचयः ॥ प्रपद्यते कफस्थानं प्रेरितो दुष्ट
वायुना ॥ १० ॥ आमवातो भवेदेवमनेकामयसंश्रयः ॥ आमे विदग्धे समरुद्धमनी प्रतिपद्यते ॥ ११
गात्रे प्रकुरुते स्तब्धं त्रिकसंधिमथामपि ॥ तद्धं गमर्दो गुरुता श्वपथुर्वह्निमंदता ॥ १२ ॥ ज्वरआ
लस्यमरुचिरामवातस्य लक्षणं ॥ इत्यामवातनिदानलक्षणं ॥ अथ चिकित्सा ॥ स्वेदनं लंघनं शस्तंपा
चनं च विरेचनं ॥ स्नेहपानं च कटुकं तिक्तं चाप्यामसारुते ॥ वालुकापुटकैश्च रूक्षस्वेदं समाचरेत
१५ ॥ उपनाहं च कुर्वीत लेपं स्नेहविवर्जितं ॥ शुंठी सठी वचा पथ्या वासको देवदारु च ॥ क्वाथोयमा
मवातस्य पाचनो रूक्षभोजनः ॥ चित्रकं कुटजं पाठा कटुका तिविषामृता ॥ १६ ॥ शुंठी वचा देवदारु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊ॰ स॰ शिवा मुस्ता जमोदकं ॥ कोष्णं बुभापिबेत्क्वाथ मेषा मामानिलापहं ॥१७॥ रास्नात्रिकंटकैरंडदेव
२३६ दारुपुनर्नवा ॥ राजवृक्षो मतांत्वेव क्वाथः शुंठीरजोयुतः ॥१८॥ पार्श्वशूलं जयत्याशु जंघोरुत्रिकवे
दना ॥ पृष्ठशिंबि प्रशमयेद्यशः परवधूरिव ॥१९॥ शुंठ्या त्रिकंटकाक्वाथं पिबेदुषसि पाचनं ॥ आम
वातकटीशूलं जयेत्सर्वांगवेदना ॥२०॥ अथ अजमोदादि चूर्णं ॥ अजमोदा विडंगानि शतपुष्पा च
पिप्पली ॥ पिप्पलीमूल सिंधूत्थं मरिचं दारुचित्रकं ॥२१॥ कर्षास्युः पंचपथ्याया दशास्युर्वृद्धदार
कात् ॥ नागराद्दश वसुः सर्वाण्येकत्र चूर्णयेत् ॥२२॥ पिबेत्कोष्णजलेनैव चूर्णमश्वपुथुनाश
नं ॥ आमवातयुतं हंति संधिपाडां च गृध्रसिं ॥२३॥ कटिपृष्ठगुदाध्मानं जंघयोश्चरुजं जयेत् ॥
तूनीप्रतूनी विश्वाचीकफवाताम्यान् जयेत् ॥२४॥ समेन वा गुडेनास्य गुटिकां कारयेत्सुधीः
तु स्यजमोदाद्यं चूर्णं ॥ अथ सौभाग्यशुंठीमाह ॥ विश्वौषधपलान्यष्टौ सर्पिषः पलविंशतिः
॥२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रस्थद्वयं च गोक्षीरं शर्कराई तुलां तथा ॥ त्रिकटु त्रिसुगंधिं च प्रत्येकं च पलं पलं ॥ २६ ॥ साधयेच्छेत्रेह वि
धिना सम्यक् शुद्धिरसायनं ॥ एषसौभाग्यशुंठीयं वपुःसौभाग्यदायिनि ॥ २७ ॥ आमवातहरेदाशु तन्वि
कांतिं प्रयच्छति ॥ धातुवृद्धिं बलं वृद्धिं मायुष्यं कुरुते चिरं ॥ २८ ॥ वलीपलितनाशं च कुर्याद्दृष्ट्यालनाश
नं ॥ २९ ॥ निस्तुषस्य रसोनस्य न येस्य लशतं वुधः ॥ तिलानां कुडवं चात्र प्रक्षिपेच्च पलं पलं ॥ ३० ॥ प्र
त्येकं त्र्यूषणं हिंगु क्षारौ द्वौ शतपुष्पिका ॥ लवणानि च पंचैव कुष्ठग्रंथिकचित्रकैः ॥ ३१ ॥ अजमोद
यवानी च धान्यकं च विचूर्णितं ॥ एकत्र पिंडितं सर्वं मृत्भांडे विनिक्षिपेत् ॥ ३२ ॥ यदा स्युः षोडशाऽ
हानि ततः स्तैलं च कांजिकं ॥ प्रस्थार्द्धं च पृथक् देयं खादेत् कर्षप्रमाणकं ॥ ३३ ॥ अलं चानुपिबेत्तस्य जं
मे द्वातामयास्ततः ॥ आमवातं च सर्वांगवातमेकांगमारुतं ॥ ३४ ॥ अपस्मारं तथोन्मादं कासश्वासा
मयं तथा ॥ भग्नवातं तथा शूलं विनिहंति न संशयः ॥ ३५ ॥ इति रसोनपिंडः ॥ हिंगु सैंधव च व्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र॰सं॰
११७

णि त्र्यूषणं च पलं पलं ॥ प्रस्थमात्रं च गोसर्पिः आरनालाढके पचेत् ॥ २६ ॥ घृतं तज्जठरं हन्यात् आमवात
कटिग्रहे ॥ शूलं विबंधमानाहं ग्रहणीमग्निमंदतां ॥ २७ ॥ इति कांजिकघृतं ॥ चतुर्गुणितसौवीरे घृतं
नागरकल्कितं ॥ साधितं हंति मंदाग्निमामवातं च दुर्जयं ॥ इति शुंठीघृतं ॥ २८ ॥ आमवाते गुरु स्नि
ग्धमभिष्यंदि गुडं पयः ॥ दधि पिष्टान्नवान्नानि त्यजेदानूपमामिषं ॥ २९ ॥ इति लक्ष्मणोत्सवे ग्रंथे
उरुस्तंभामवातयोर्निदानं चिकित्साकथनं नाम पंचत्रिंशतितमः ॥ ३५ ॥ अथ शूलनिदानं चिकित्सा
माह ॥ एकैकद्वंद्वमिलितैर्दोषैरामेन चाष्टधा ॥ शूलानि सुश्रुतः सर्वेषु वायोः प्राधान्यमादिशेत् ॥ १ ॥ अति
शीतांबुपानस्त्रीसंगव्यायामजागरैः ॥ अतिरूक्षविरूढान्नाजीर्णैश्च विषमाशनैः ॥ २ ॥ कषायतिक्त
विदलयवकोद्रवकादिभिः ॥ विरुद्धान्नैः शुष्कशाकामिषैर्वेगनिरोधनैः ॥ ३ ॥ शोकोपवासहास्याति
भाषणे रतिसेवितैः प्रदुष्टो मारुतः स्वस्वहेतुभिः कुपितान्मलान् ॥ ४ ॥ प्राप्य वा केवलः कुर्यात्स्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते हृद्बस्तिपार्श्वयोः ॥ पृष्ठे त्रिके च बस्तौ वा यथाहेतु प्रदेशकं ॥ ५ ॥ इति निदानं ॥ अथ चिकित्सा ॥ शस्यं
ते शूलिनां पूर्वं स्वेदपाचनलंघनम् ॥ क्षारचूर्णादिगुटिका लंघनं फलवर्तयः ॥ ६ ॥ जेतव्यः पवनः पूर्वं शी
घ्रकारी यतो ह्यसः ॥ तं जित्वा च जयेत्सिन्नं पित्तं जित्वा कफं जयेत् ॥ ७ ॥ तुंबुरूणि शिवा हिंगु लवणत्र
यपोष्करं ॥ गुल्मापतंत्रकी शूली पिबेत्प्रातर्यवांबुना ॥ ८ ॥ एरंडमूलशुंठीभ्यां सिद्धं क्वाथं तु यः पि
बेत् ॥ हिंगुसौवर्चलोपेतं सद्यः शूलात्प्रमुच्यते ॥ ९ ॥ भवानीसैंधवं हिंगु क्षारसौवर्चलाभया ॥ पि
बेत्कोष्णांबुना वातोद्भवं शूलं निवर्तये ॥ १० ॥ सौवर्चलाम्लिकाजाजी मरीचैर्द्विगुणोत्तरैः ॥ मातु
लिंगरसे बद्धाः गुटिकाः सर्वशूलहृत् ॥ ११ ॥ मदनं कांजिकं पिष्टं शूलहृन्नाभिलेपनात् ॥ जीवंति
मूलकल्को वा सतैलः पार्श्वशूलहृत् ॥ १२ ॥ स्नेहपानं गुडं क्षीरं विरेकः शालियोयवाः ॥ पित्त
शूले प्रशस्यंते शीतान्यस्मानि चौषधं ॥ १३ ॥ जलपूर्णानि पात्राणि मणिधाराद्रवाणि च ॥ ध

234

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्व०सं० ११८

मास्तु पयसि पिनोत्थं शूलघ्नं सेवतल्लक्षणात्॥१४॥ रसं धात्र्या विदार्याश्च त्रायंतीगोस्तनीजलैः॥ पिबे
त्पित्तज्वरछर्दिशूलपीडोपशांतये॥१५॥ शतावरीरसं प्रातः पिबेन्माक्षिकसंयुतं॥ पित्तशूलं च
दोषाग्नि दाहतृष्णादिशांतये॥१६॥ त्रिफलाकटुकारिष्टयष्ट्यारग्वधैः कृतं॥ पिबेन्मधुयुतं क्वा
थं दाहशूलोपशांतये॥१७॥ छर्दनं लंघनं स्वेदः कफशूलेषु शस्यते॥ देहश्रममधुनोपेतामृसमन्नं
पुरातनं॥१८॥ कफशूले पिबेत्संचकोलरामठसंयुतं॥ लवणत्रयसंयुक्तं वातेः कोष्णेन वारिणा॥
१९॥ शुंठीबिल्वजले रंडचित्रकैः क्वथितं जलं॥ हिंगुसैंधवसंयुक्तं सद्यः शूलं निवारयेत्॥२०॥ म
धुः क्षारयुतः पीतो मातुलिंगरसोद्भवः॥ शिग्रुक्वाथोथवा हंति शूलं हृत्पार्श्वबस्तिगं॥२१॥ वि
हारी दाडिमरसो लवणाम्लोषसंयुतः॥ माक्षिकेन युतः पीतः शूलं हंति त्रिदोषजं॥२२॥ दोषद्वयोद्
वं शूलमेकैकप्रभवं तथा॥ एरंडफलमूलानि गोक्षुरुर्बृहतीद्वयं॥२३॥ पर्णीचतुष्टयं शंख

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुष्पिचैवेलवालकं॥ सहदेवीद्वयंचैतत्समांशेक्वथितंजलं॥२४॥ यवक्षारयुतंपीतंशूलंहंतित्रिदोष
जं॥ द्रसेरंडकद्वादशकाथकं॥ गोमूत्रशुद्धमंडूरंचूर्णंत्रैफलसंयुतं॥२५॥ लीढंमधुघृतोपेतंहंतिशूलं
त्रिदोषजं॥ आमप्रशमनंयस्याद्वह्निबलवर्द्धनं॥२६॥ आमशूलेघृतंसेव्यंपच्चशूलेमहरंभवेत्॥ ए
रंडगोक्षुरजटाबिल्वंचबृहतीद्वयं॥२७॥ मातुलिंगशिलाभेदःक्वाथंएरंडसमन्वितं॥ सक्षारहिंगुलव
णेरंडतैलयुतोजयेत्॥२८॥ श्रोण्यंसमेढ्रहृदयस्तनशूलरुजःक्षयात्॥ द्रसेरंडसमन्वितं॥ हिंगुत्रि
कटुकंपथ्यायवानीक्षारतुंबरु॥ चित्रकंलवणंचैतच्चूर्णमुष्णांबुनापिबेत्॥ विण्मूत्रानिलशूलघ्नं
पाचनंदीपनंपरं॥३०॥ शुंठीहरीतकीकृष्णात्रिवृत्सौवर्चलंतथा॥ समभागानिसर्वाणिसूक्ष्माण्येव
कृत्वाचूर्णयेत्॥३१॥ ह्येयंपंचसमंनामसर्वशूलहरंपरं॥ आध्मानजठरार्शोघ्नंमामवातविनाशनं॥३२
इतिपंचसमचूर्णं॥ लवणात्रितयंक्षारोशतपुष्पाद्वयंवचा॥ मरीचंपिप्पलीमूलंहपुषाजीरकद्वयं॥३३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वै०स०
१११

अजमोदा जगंधाव पिप्पली गजपिप्पली ॥ शुंठी चित्रकवंशाणि सरी पाठोपकुंचिका ॥ ३४ ॥ हिंगुश्च र
हिंगुपत्री च विडंगं नाम्लवेतसं ॥ रुद्रवारुणिका भार्गी त्रिवृद्दंती शतावरी ॥ ३५ ॥ दाडिमं तिंतिडीकं च देव
दारु यवानिका ॥ कुस्तुंबरी तुंबरूणि पौष्करं बदराणि च ॥ ३६ ॥ पथ्या चेति समांशानां चूर्णमेषां प्रक
ल्पयेत् ॥ भावयेदार्द्रकरसे बीजपूररसे तथा ॥ ३७ ॥ तत्पिबेत्सर्पिषा चूर्णं मद्यकोष्णेन वारिणा ॥ कौ
लंभसा वा तक्रेण दुग्धेनोष्णेन मस्तुना ॥ ३८ ॥ पकृतख्री हकटी शूलगुदकुक्षिहृदामयान् ॥ अर्श
विष्टंभमंदाग्निगुल्माष्ठीलोदराणि च ॥ ३९ ॥ हिक्काश्वासाध्मानकासाश्च जयेदेतन्न संशयः ॥ एतैरे
वौषधैः सम्यक्घृतं वा साधयेत्सुधीः ॥ ४० ॥ इति त्रिलवणाद्यं चूर्णं घृतं ॥ मायामं च भवा यं च शो
कं क्रोधं वर्द्धनं च ॥ ४१ ॥ विण्मूत्रवेगरोधं च सजेत्स्थूली च वैदलं ॥ इति शूलचिकित्सा ॥ अथ परिणा
मशूलनिदानं ॥ वायुः स्वहेतुकुपितो आप्याय्य पित्तं कफं तथा ॥ ४२ ॥ अन्नेजीर्यति शूलानि कुर्यात्सि

११

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तसमन्वितः॥ परिणामजशूलेस्मिन् आध्मानायोपविड्ग्रहः॥७३॥ वातिके स्युः पैत्तिके तु स्वेद
दाहतृषादयः॥ कफाच्छर्दिहृल्लासो रुजः सततवेगता॥७४॥ यत्शूलं जायते जीर्णे प्यजीर्णे वा
पि जीर्यति॥ समं पथ्ये प्यपथ्ये वा तदन्नद्रवसंज्ञकः॥७५॥ इति परिणामान्नद्रवशूलनिदानं॥ अथ
चिकित्सा॥ वमनं लंघनं पूर्वं पाचनं च विरेचनं॥७६॥ सर्वेषु पंक्तिशूलेषु बस्तिकर्मापि शस्यते॥ शुंठी
गुडतिलान्मिष्टा पयसास्तु स्वादति॥७७॥ सज्जयेत्ससरात्रेण पंक्तिशूलानि सर्वशः॥ शंबूकं त्र्यूषणं
पंचलवणानि च चित्रकं॥७८॥ मातुलिंगरसेनैषां गुटिकां कारयेद्भिषक्॥ प्रभाते भोजनादौ च भ
क्षयेत्तां यथाबलं॥७९॥ मुच्यते सप्तरात्रेण पंक्तिशूलान्न संशयः॥ लोहचूर्णं कणा पथ्या शर्करा क्षौ
द्रसंयुतः॥ लेहोयं नाशयेच्छूलं परिणामसमुद्भवं॥ अष्टौ पलानि शुद्धस्य मंडूरस्य विचूर्णयेत्॥ श
तावरीरसस्याष्टौ पलान्यत्र विनिःक्षिपेत्॥८१॥ दध्नश्चैव पलान्यष्टौ क्षीरस्याष्टौ पलानि च॥ च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रु॰ स॰ २२० तुः पलं च गोसर्प्पिः सर्वमेकत्र नलसेवेत् ॥ ५२ ॥ यावत्तत्पिंडतां याति सिद्धं तत्प्रभक्षयेन्नरः ॥ भोजने ना
दौ तथा मध्ये यथादोषं यथाबलं ॥ ५३ ॥ वातिकं चैव शूलं च परिणामजं ॥ हंति मंडूरयोगोयं सम्यग्भि
हिवसेध्रुवं ॥ ५४ ॥ इति शतावरी मंडूरं ॥ त्रिफलासवरसेः पक्वं लोहचूर्णं गुडान्वितं ॥ शूलं त्रिदोषजं
हंति परिणामसमुद्भवं ॥ ५५ ॥ लोहचूर्णं शिवाशुंठीचूर्णं क्षौद्रसमन्वितं ॥ परिणामभवं शूलं हंति दो
षत्रयोद्भवं ॥ ५६ ॥ क्षीरे च गुग्गुले सर्प्पिः सिद्धं कृष्णा गुडान्वितं ॥ परिणामजशूलघ्नं जरसिमं च नाश
येत् ॥ ५७ ॥ पित्तावसाने वमनं कफांते च विरेचनं ॥ अन्नद्रवे प्रकर्तव्यं जरसि तो दितं च यत् ॥ ५८ ॥
माषेंडरी मसूरिका खिआश्रास्ता घृतान्विता ॥ गोधूममुद्गकाश्चान्न गुडोपेतं घृतं तथा ॥ ५९ ॥ अन्न
द्रवे जरसि ते यतः स्यादग्निमंदता ॥ अन्नपानानि ते मात्रमात्राहीनानि कल्पयेत् ॥ ६० ॥ अन्नद्रवो
दितं सर्वं जरसि ते विशस्यते ॥ अनाहो वेदना मूर्छा श्वासः कासोरुचिस्तथा ॥ ६१ ॥ गौरवं च तथा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फिक्का शूलस्योपद्रवा नव ॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे परिणामशूलयोर्निदानं चिकित्सा कथनं नाम
षट्त्रिंशत्तमोध्यासः ॥ ३६ ॥ अथोदावर्त्तानाहयोर्निदानं चिकित्सा च ॥ जृंभोद्गाराश्रुवमनोच्छ्वासक्षु
ण्मूत्ररेतसां ॥ निरोधात्स्यादुदावर्त्तं निशाक्षुत्पमरुद्विषां ॥ १ ॥ वेगास्त्रयोदशोक्ता ये तेषां रोधात्पृथक्
पृथक् ॥ जायंते वा तजा रोगास्तान्यथावच्च लक्षयेत् ॥ २ ॥ मन्यागलस्तंभशिरोनेत्रहृत्कुक्षिबस्ति
गाः ॥ कर्णोदरकटीमेढ्रपार्श्वगास्तु तथा रुजः ॥ ३ ॥ इत्युदावर्त्तनिदानं ॥ मलमामं विपक्वं वा विबध्ना
ति यदा मरुत् ॥ तदा स्युर्ये विकारास्ता आनाह इति चेष्यते ॥ ४ ॥ आनाहनिदानं ॥ अथ चिकित्सा ॥ य
था पीलु यवक्षार त्रवच्चूर्णं घृतान्वितं ॥ पीतं हन्यादुदावर्त्तं मरुदावरुद्ध वर्द्धितं ॥ हिंगुकुष्ठवचास्वर्जि
विडुंचे द्विगिरुत्तरं ॥ चूर्णमासवसंयुक्तमुदावर्त्तहरं परं ॥ ५ ॥ पिप्पलीमदनं कुष्ठं वचा गौरश्च सर्षपः
गुडक्षारान्विता शस्ता पायोस्तु फलवर्त्तयः ॥ ६ ॥ पक्वोन्मितात्त वस्तु कर्षमात्रा रुक्मा सितापलं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰स॰ तिस्राच्चूर्णमथापेतमुदावर्त्तहरं परं ॥ ८ ॥ प्रशस्तं भोजनस्यादौ प्रातःकाले यवाग्निहेतु ॥ यथादोष
१२१ गातं ज्ञात्वा चूर्णं नाराच संज्ञितं ॥ ९ ॥ इति नाराचचूर्णं ॥ हिंगु सिंधूत्थमधुभिर्हिंस्नावर्त्तिः सुवर्त्ति
ता ॥ घृताभ्यक्ता गुदे न्यस्ता स्यादुदावर्त्तनाशिनी ॥ १० ॥ मूत्रकृच्छ्राश्मरी बंधे पंचमूलीसृतं पयः ॥
द्राक्षारसं पिबेद्वापि बस्तिमेवाथवा पुनः ॥ ११ ॥ जृंभोत्थितमुदावर्त्तं स्नेहः स्वेदं समं नयेत् ॥ अश्रु
जं वा श्रुमोक्षेण स्निग्धस्वेदैश्च पालनः ॥ १२ ॥ नासांतर्न्यस्तया वर्त्या क्षुतं कुर्यात्क्षयोद्भवे ॥ प्रकु
पाते स्नेहिकं धूममुद्गार प्रतिबोधने ॥ १३ ॥ यथादोषं जयेत्तस्य स्नेहाद्ये छर्दिसंभवं ॥ क्षारं चूर्णगु
ड़ेनाथ स्निग्धमाना स्वशोषणात् ॥ १४ ॥ पीतं पीतं बस्तिशुद्धिं कुर्यात्शुक्रपथां जयेत् ॥ काममेतत्प्रि
यां नारी शुक्रोदावर्त्तपीडितः ॥ १५ ॥ तद्विघाते पिबेन्मंथं यवागूं वाति शीततं ॥ स्वप्नरोधे पिबेदु
ग्धं शृणु यान्यानुता कथाः ॥ १६ ॥ स्निग्धमुष्णमहितं सर्वं मंशुद्धि यात्तेतु भोजनं ॥ उदावर्त्तो हिताका १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मीक्रिया नाहेपि सर्वत: ॥ २७ ॥ वचापथ्याया वश्रूक चित्रकोपविषाकणा: ॥ कुष्टं चेति पिबेच्चूर्णं
सुखाम्भेनेव वारिणा ॥ २८ ॥ विमूढमारुतं हन्या दानाहं च हिताशिन: ॥ तवङ्कुरीतकीश्यामास्नुहि
क्षीरेण भाविता: ॥ २९ ॥ गुटिका मूत्रपीता स्तात्श्रेष्ठाश्वानाहभेदिका: ॥ इति श्रीमाथुरकायस्था
वतंसामरसिंहात्मजलक्ष्मणनाम कथिते लक्ष्मणोत्सवे ग्रंथे उदावर्तानाहयोर्निदानं चिकित्साक
थनं नाम सप्तत्रिंशत्तिमोऽध्यास: ॥ ३७ ॥ अथ गुल्मनिदानं ॥ वेगैर्वमनकर्षिपै: कर्षितो योति
वातल: ॥ बुभुक्षित: पिबेद्वारि शीतं वांति निरोधकृत् ॥ १ ॥ इत्यादिक विरुद्धान्नचेष्टा भेषजवाश्र
य: ॥ तस्य सेहेतु कुपिता दोषा वातप्रधानका: ॥ २ ॥ गुल्मान्प्रकुर्वते नाभौ बस्तौ वा हृदि पार्श्व
यो: ॥ अन्यत्रापि यथादोषस्थानं गुल्मं प्रचक्षते ॥ ३ ॥ विड्बंधो द्गारबाहुल्यमाटोपाध्मानतृम
य: ॥ अंत्रकूजनमालस्यं गुल्मानां पूर्वलक्षणं ॥ ४ ॥ अनाहकृच्छ्रे विण्मूत्रमारुतांत्रविकूजनं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ स॰ अरुच्यं चोर्ध्ववातं च सर्वगुल्मेषु लक्षयेत् ॥५॥ इति गुल्मनिदानं ॥ अथ गुल्मचिकित्सा ॥
१२२ लघ्वन्नं दीपनं स्निग्धं उष्णं वातानुलोमनं ॥ तत्सेव्यं सर्वगुल्मेषु बृंहणं यच्च भेषजं ॥६॥ सौवर्च
लं शृंगवेरमम्लवेतसदाडिमं ॥ सहिंगुकं भवेच्छ्वासहृद्गुल्मशमनं परं ॥७॥ स्वर्जिकाकेतकीक्षार
कुष्ठं चेति समं त्र्यंशं ॥ पीतं तैलेन सहितं वातगुल्मान्निवारयेत् ॥८॥ सुखोष्णो जांगलरसः सुस्नि
ग्धो म्लक्तसैंधवः ॥ त्र्यूषणेन युतः पीतो हन्ति गुल्मानशेषतः ॥९॥ एरंडतैलं पयसा वा तद्गुल्मं
निवारयेत् ॥ भवेत्पित्तप्रकोपश्चेत्कार्यं तत्र विरेचनं ॥१०॥ भेषजैरप्यशांते स्याद्गुल्मे सृग्मोक्ष
णं हितं ॥ घृतेन पित्तगुल्मेषु काकोल्यादिशृतेन च ॥११॥ स्नेहनं शमयेत्पश्चात्योजयेद्बस्ति
कर्मणां ॥ श्लेष्मगुल्मं प्रशमयेद्वातगुल्मोक्तभेषजैः ॥१२॥ स्नेहोपनाहनस्वेदतीक्ष्णरेचनब
स्तिभिः ॥ त्रिफलां दशमूलं च तत्र दंतीपलं पलं ॥१३॥ पक्त्वा चतुर्गुणजले चतुर्भागावशेषि

१

243

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ते॥ सर्पिरेरंडजं तैलं क्षीरं चैकत्र साधयेत्॥१४॥ साधितो मिश्रकस्नेहो मासिकेण युतो जये
त्॥ गुल्मश्लेष्ममलकुष्टयोनिशूलोदराणि च॥१५॥ इति मिश्रकस्नेहः॥ हिंगुपाठा तथा धान्यं
हपुषा चाम्लवेतसः॥ अजमोदा त्रिकटुकं जीरकं पौष्करं वचा॥१६॥ अजगंधा तिंतिडीकं दाडि
मं चित्रकं सठी॥ चव्यं क्षारद्वयं पंचलवणानि च चूर्णयेत्॥१७॥ प्राग्भोजनस्य मद्येन वा चूर्णमेतत्प्र
योजयेत्॥ पिबेद्वा तक्रसंयुक्तं मद्याकोष्णेन वारिणा॥१८॥ गुल्मे वातकफोद्भूते हृद्ग्रहे प्लीहिकासु च
हृद्बस्तिपार्श्वशूलेषु शूलं च गुदयोनिजे॥१९॥ मूत्रकृच्छ्रे विबाहे च पांडुरोगे रुचौ तथा॥ हिक्कायां वक्रति
प्लीहाश्वासे कासे गलग्रहे॥२०॥ गहण्यर्शोविकारेषु चूर्णमेतत्प्रशस्यते॥ भावितं मातुलिंगस्य बहुश
स्वरसेन वा॥२१॥ कुर्याद्गुटिका वै यो वातश्लेष्मामयापहाः॥ हिंग्वाद्यं चूर्णं॥ चित्रकं नागरं हिंगुपि
प्पली पिप्पलीजटा॥२२॥ चव्याजमोदमरिच प्रत्येकं कर्षसंमितं॥ सर्जिका च यवक्षारः सिंधुसौवर्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०सं० लं बिडं ॥ २३ ॥ सामुद्रकं रोमकं च कोलमात्राणि कारयेत् ॥ एकीकृत्य सारिकं चूर्णं भावयेन्मातुलिंगजैः
१२२ २४ ॥ रसैर्दीप्तिमज्जेर्यापि शोषयेदातपेन वा ॥ एतच्चूर्णं जयेच्छूलं ग्रहणीमाममारुतं ॥ २५ ॥ अग्निं च
कुरुते दीप्तं रुचिकृत् कफनाशनं ॥ इति चित्रकाद्यं चूर्णं ॥ सामुद्रलवणं कार्यं मष्टकर्षमितं बुधैः ॥ २६
पंचसौवर्चलं ग्राह्यं बिडसैंधवधान्यकं ॥ पिप्पलीपिप्पलीमूलं कृष्णजीरकपत्रकं ॥ २७ ॥ नागकेस
रं तालीसमम्लवेतसकं तथा ॥ द्विकर्षमात्राण्येतानि प्रत्येकं कारयेद्बुधः ॥ मरिचं जीरकं विश्वमेकैकं क
र्षमात्रकं ॥ दाडिमं स्याच्चतुःकर्षं त्वगेला चार्द्धकार्षिका ॥ २९ ॥ एतच्चूर्णकृतं सर्वं लवणं भास्कराभिधं
शाणप्रमाणं देयं तु तक्रमस्तासवादिभिः ॥ ३० ॥ वातश्लेष्मभवं गुल्मं प्लीहानमुदरं क्षयं ॥ अर्शां
सि ग्रहणीकुष्ठं विविधं च भगंदरं ॥ ३१ ॥ शोफं शूलं श्वासकासमामदोषं च हृद्रुजं ॥ मंदाग्निं
नाशयेत् क्षिप्रं दीपनं पाचनं परं ॥ ३२ ॥ सर्वलोकहितार्थाय भास्करेणोदितं पुरा ॥ इति लवणभास्क

245

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रचूर्णं॥ वेदलं शुष्कशाकानि मीनवल्लूरमूलकं॥ गुल्मरोगी परिहरेन्मधुराणि फलानि च॥ इति
गुल्मचिकित्सा॥ अथ हृद्रोगस्य निदानं॥ अत्यम्लगुरुतीक्ष्णोष्णवेगसंरोधसेवनैः॥ श्रमाभिघाता
ध्यशनप्रसंगैः स्याद्धृतामयः॥ ३५॥ हेतुभिः कुपिता दोषा हृदयं प्राप्य नेरसं॥ शोषयित्वा प्रकुर्व
न्ति हृद्रोगं विविधं त्वयं॥ ३६॥ हृदस्फुरणसंस्तंभशून्यत्वादि मरुद्भवे॥ मूर्च्छा तृष्णा भ्रमो दाहस्वे
दः पित्तोद्भवे भवेत्॥ ३७॥ निद्रा निष्ठीवनं हृद्यं हृदयं पूर्णवत्कफे॥ त्रिदोषजे त्रिलिंगत्वं त्रिभिर्भ्यः
श्यावनेत्रता॥ ३८॥ तमःप्रवेशहृल्लासशोषाघं वात्रजस्पेन॥ ३९॥ इति हृद्रोगनिदानं॥ अ
थ चिकित्सा॥ हृद्रोगे वातजे स्निग्धमातुरं मामयेद्भिषक्॥ दशमूलीकषायेण सस्नेहलवणेन
च॥ ४०॥ शुंठ्याः क्वाथं पिबेदुष्णं चूर्णं वा कोष्णवारिणा॥ हृद्रोगश्वासशूलाग्निमांद्यवातनि
वृत्तये॥ ४१॥ श्रीपर्णीक्षौद्रमधुकसितागुडजलैर्वमेत्॥ हृद्रोगे पित्तसंभूते मधुरैर्वा सितै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० वमेत् ॥ ४२ ॥ प्रदेहं परिषेकं च शीतं पित्तार्दिते हृदि ॥ विरेकं चान्नपानानि शीतान्यत्र प्रकल्प
२२४ येत् ॥ ४३ ॥ ककुभस्य त्वचा सिद्धं पिबेद्दुग्धं हृदामये ॥ ककुभत्वग्भवं चूर्णं दुग्धेनाज्येन वा पिबे
त् ॥ ४४ ॥ गुडोदकेन वा हंति हृद्रोगं सास्रपित्तकं ॥ हृद्रोगे कफवातोत्थे वचाक्वाथं सहिंगुकं ॥ ४५ ॥
पिप्पल्यादिकचूर्णं वा पिबेत्सर्वामयापहं ॥ लिह्याद्धापोष्करं चूर्णं क्षौद्रेण सह योजितं ॥ ४६ ॥ क
कुभत्वक्कभवं चूर्णं कासहृत्शूलनाशनं ॥ हिंगुशुंठीवचाकृष्णा पथ्या चित्रककुष्ठकं ॥ ४७ ॥ या
वशूकं पौष्करं च विडं सौवर्चलान्वितं ॥ पिबेद्यवांबुना सर्वं शूलहृद्रोगशांतये ॥ ४८ ॥ पिबेन्मू
त्रेण संयुक्तं चूर्णं कुष्ठविडंगयोः ॥ हृदयस्थाः पतंत्येव कृमयो हृद्रुजावहाः ॥ ४९ ॥ अर्जुनस्य त
त्वः क्वाथः कल्काभ्यां साधितं घृतं ॥ सततं सेवितं हन्यात् सर्वाण्येव हृदामयान् ॥ ५० ॥ चि
त्रकं त्रिफला मोषक्षारो लवणपंचकं ॥ यवानी पिप्पलीमूलं हपुषा जीरकं वचा ॥ ५१ ॥ कुष्ठ

१

247

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चेस्थे कर्कपर्णी विशालात्रायन्ती द्विकर्षिका ॥ द्विकार्षिका तथा चात्र दंती कर्षत्रयोन्मिता ॥ ५२ ॥
शातलाच चतुः कर्षा सर्वमेकत्र चूर्णयेत् ॥ पाचनस्नेहनाद्येश्च स्निग्धकोष्ठस्य रोगिणः ॥ ५३ ॥
दद्याच्चूर्णं विरेकाय सर्वरोगहरं परं ॥ हृद्रोगे पांडुरोगे च गरहिक्मा च गलग्रहे ॥ ५४ ॥ मंदाग्नौ च
ज्वरे कुष्ठे कासश्वासे भगंदरे ॥ दद्यात्सुखाम्बुपानेन तथाध्माने सुरादिभिः ॥ ५५ ॥ गुल्मोदरे च नी
रेन विड्ग्रहे दधिमस्तुना ॥ उष्णाम्बुभिरजीर्णे च रसाम्लैः परिकर्तिषु ॥ ५६ ॥ उष्ट्रीदुग्धेनोदरेषु त
था तक्रेण वा गवां ॥ प्रसन्नया वातरोगे दाडिमांभोभिरर्शसि ॥ ५७ ॥ द्विविधे च विषे दद्यात् घृते
न विषनाशनं ॥ चूर्णं नारायणं नाम दुष्टरोगगणापहं ॥ ५८ ॥ इति नारायण चूर्णं ॥ यवानीदा
डिमं शुंठी तिंतिडीकाम्लवेतसौ ॥ बदराम्लं च कुर्वीत चतुःशाणमितानि तु ॥ ५९ ॥ सार्द्धद्विशाणम
रिचा पिप्पली दशशाणिका ॥ त्वक्सौवर्चलधान्याकजीरकं द्विद्विशाणकं ॥ ६० ॥ चतुःषष्टिमितेः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ स॰ शाणैः शर्करामत्र योजयेत् ॥ चूर्णितं सर्वमेकत्र यवानीखांडवाभिधं ॥ ६१ ॥ चूर्णमेतत्पांडुरोगं स्या
१२५ हृद्रोगं ग्रहणीज्वरं ॥ छर्दिं शोषातिसारौ च प्लीहानाहविबंधता ॥ ६२ ॥ अरुचिशूलमंदाग्निअशी
जिकागलामयान् ॥ अन्यांश्च विविधान् रोगान् शीघ्रमेव अपोहति ॥ ६३ ॥ इति महायवानीखांडु
वं चूर्णं ॥ क्षीरं दधि गुडैः सार्धं शौद्रकानूपमामिषं ॥ वर्जयेच्च प्रयत्नेन हृद्रोगे ह्यपि पंचसु ॥ ६४ ॥
इति श्रीलक्ष्मणोत्सवे ग्रंथे गुल्महृद्रोगयोर्निदानं चिकित्साकथनं नामाष्टत्रिंशत्तमोऽध्यायः
३८ ॥ अथ मूत्रकृच्छ्रनिदानं ॥ अतिव्यवायतीक्ष्णोष्णभेषजाद्यादिसेवनैः ॥ आयामे रूक्षवि
षमाध्यशनाजीर्णभोजनैः ॥ १ ॥ मत्स्यानूपासवाद्यैश्च पृष्ठयानैश्च सततं ॥ जायंते मूत्रकृच्छ्रा
णि दोषैर्वस्तिमुपाश्रितैः ॥ २ ॥ मूत्रवर्त्मनि संरुद्धे दोषैर्दुष्टैः स्वहेतुभिः ॥ मूत्रं कृच्छ्राद्धि निर्या
ति मूत्रकृच्छ्रं ततः स्मृतं ॥ ३ ॥ मूत्रयेद्वातजे कृच्छ्रे स्तोकं स्तोकं मुहुर्मुहुः ॥ पित्ते पित्तं सदाहा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्रिरक्तं वा स्तोककं चिरात् ॥ ७ ॥ बस्तौ मेंढ्रे भवेच्छोफः कफजे गौरवं तथा ॥ इति निदानं ॥ अथ
चिकित्सा ॥ अश्मरीरोगविधयो ये प्रोक्ता प्रसमीक्षितान् ॥ ५ ॥ यथारोगं यथायोगं तानत्रापि समाच
रेत् ॥ स्वेदाभ्यंगोपनाहाश्च स्नेहनाद्यं च वातजे ॥ ६ ॥ वाततैलैः साधितानां मूत्रकृच्छ्रेण माचरेत्
अमृता गोक्षुरः शुंठी धात्री वाजीकरी तथा ॥ ७ ॥ प्रपिबेद्वातरोगोत्थे मूत्रकृच्छ्रेऽतिशूलवान् ॥ से
कावगाहः शिशिरः प्रदेहाः पित्तसंभवे ॥ ८ ॥ मूत्रकृच्छ्रे प्रशस्यन्ते विरेकः शीतमौषधं ॥ दर्भः
शरकुशः काशः इक्षुश्चेति तृणोद्भवं ॥ ९ ॥ पंचमूलं पित्तकृच्छ्रनाशनं बस्तिशोधनं ॥ दुग्धमे
वसतं पीतं श्रोणितं हंति मेढ्रगं ॥ १० ॥ हरीतकी दुरालंभा कृतमालकगोक्षुरैः ॥ पाषाणभेदस
हितः क्वाथो माक्षिकसंयुतः ॥ ११ ॥ विबंधमूत्रकृच्छ्रेच सदाहे सरुजे हितः ॥ हरीतक्यादिः ॥ समू
लगोक्षुरः क्वाथः शर्करामधुसंयुतः ॥ १२ ॥ नाशयेन्मूत्रकृच्छ्राणि सर्वाण्येव न संशयः ॥ स्व

(A)

KKSU LIBRARY
RAMTEK
441 106
M-1778
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰उ॰ क्ष्मां त्रुटिं पिबेत्पिष्ट्वा मूत्रेण सुरयापि वा ॥१३॥ कदलीस्वरसं चापि कफकृच्छ्रे प्रशांतये ॥ शितिमार
१२६ कबीजानि पिष्ट्वा तक्रेण संपिबेत् ॥१४॥ नराणां नाशयेच्छीघ्रं मूत्रकृच्छ्रं सुदारुणं ॥ गुग्गुलुं गुडसमायुक्तं
पिबेत्कोष्णांबुना मतः ॥१५॥ मूत्रकृच्छ्रेषु सर्वेषु शर्करा चात्र शस्यते ॥ यवक्षारेण संयुक्तं पिबेत्तक्रं
तु का मतः ॥१६॥ मूत्रकृच्छ्रप्रशांत्यर्थमश्मरीनाशनाय च ॥ अभिघातोद्भवे कुर्यात्सद्यो व्रणविधिः
क्रमं ॥१७॥ लिह्याच्छुक्रविबंधेषु सक्षौद्रं युक्तं शिलाजतुं ॥ एला शिलाजतु कणा शिलाभेदान् गुडा
न्वितान् ॥१८॥ पिबेत्तंडुलनीरेण मूत्रकृच्छ्रापनुत्तये ॥ यवक्षारः सितोपेतो मूत्रकृच्छ्रहरः परः
॥१९॥ केटारिकारसो वाथ समधुर्मूत्रकृच्छ्रजित् ॥ शतावरीकाशकुशधात्रीगोक्षुरकैः शृतं ॥२०
विदारिकेक्षुसंयुक्तैः घृतं सद्यो निवारयेत् ॥ मूत्रकृच्छ्राणि संपीतं यूषैः कौलत्थजैः सह ॥२१
इति मूत्रकृच्छ्रचिकित्सा ॥ अथ मूत्राघातनिदानं ॥ दोषाः स्वहेतुभिर्दुष्टाः मूत्रमार्गप्रदेशगाः

Acc. No. 8462 M.1778 (B)
Title - लक्ष्मणोत्सव ग्रंथ.
(B)
KKSU LIBRARY RAMTEK 441 106 M.1778 Dist Nagpur
Checked 2012
251
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मूत्राघाताः प्रकुर्वंति त्रयोदशविधामतः ॥२२॥ रूक्षाद्वेगघाताद्दुष्टो बस्तौ समीरणः ॥ कुं
डलीकृतसंस्थानो मूत्रमाविश्य तिष्ठति ॥२३॥ मूत्रं प्रवर्तते नात्र स्तोकं स्तोकं सवेदनं ॥ वातकुंड
लिकेत्याहुस्तं रोगमतिदारुणं ॥२४॥ मूत्रघातांस्तथान्यांश्च यथादोषं तु लक्षयेत् ॥ इति निदानं ॥
अथ चिकित्सा मूत्राघातस्य ॥ त्रिफला सैंधवोपेतां पिबेत्तंदुलवारिणा ॥२५॥ क्षुद्रापावारसं तेन
मूत्राघातापनुत्तये ॥ निःशोषितं जले कल्कं सक्षौद्रं कुंकुमस्य च ॥२६॥ पीत्वा विनाशयेत्सर्वान्
मूत्राघातान्न संशयः ॥ धन्वयासरसः पीतः कषायो वासकस्य च ॥२७॥ मूत्राघातान् जयेत्स
र्वान् इंद्रियाणीव संयमी ॥ शतावरीगोक्षुरकैरंडैः सिद्धं पयः पिबेत् ॥२८॥ त्रिणपंचकमूले
र्वा मूत्ररोगापनुत्तये ॥ अतिव्यवायसंसक्तो रुधिरं यस्तु मूत्रयेत् ॥२९॥ बृंहणीयो विधिस्तस्य का
र्यो नैव च मैथुनं ॥ चित्रं सारवेदेन बलाद्राक्षा च पिप्पली ॥३०॥ विशाला त्रिफलायष्टीकुष्ठ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लं॰सा॰ १२८ धात्री फलानि च ॥ अश्मान्नैः पचेद्देतैः कल्कै रथ्याटकं भिषक् ॥ ३१ ॥ दुग्ध द्रोणे जल द्रोणावसि
ष्टं तद्व तारयेत् ॥ शीते परिस्रुते तस्मिन् सिता प्रस्थ समन्विते ॥ ३२ ॥ तुगाक्षी र्याश्चि तत्सर्वं मतिमानवप
रिभ्रमयेत् ॥ यथा बलं यथा दोषं तच्च निसं पिबेन्नरः ॥ ३३ ॥ वातशुक्रः पित्तशुक्रः कफशुक्रो भवेच्च
यः ॥ ग्रंथिशुक्रोश्व शुक्रश्च पीत्वैतत्सुखमाप्नुयात् ॥ ३४ ॥ घृतमासुष्करं वृष्यं प्रजोत्पत्तिकरं नृणां ॥
स्त्रीणां गर्भप्रदं योनि दोषाः स गदोषनाशनं ॥ ३५ ॥ मूत्रदोषेषु सर्वेषु सर्वेषामेव शस्यते ॥ इति चि
त्रकाद्यं घृतं ॥ इति मूत्राघातचिकित्सा ॥ अथाश्मरीनिदानं ॥ वातात्पित्तात्कफात् दुष्ट शुक्रात्स्याच्च
च्चाश्मरीगदः ॥ ३६ ॥ श्लेष्माधिष्ठानं न सर्वासु व्यपदेशस्तु लक्षणैः ॥ वायुर्बस्तिगतो दुष्टो रेतः पि
त्तकफान्वितः ॥ ३७ ॥ संशोषयति मूत्रेण तदा संजायतेश्मरी ॥ सर्व दोषोद्भवे श्लिन्ने स्त्रिदोषो
द्भवकृच्छ्रदा ॥ ३८ ॥ सर्वासामेव तासां तु जायते पूर्वलक्षणं ॥ ज्वरोरुचिर्मूत्रकृच्छ्रं मूत्रे वास्तः स

१२

253

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गंधता ॥ ३९ ॥ वस्त्याध्मानं बस्तिपार्श्वदेशेष्वपरि तोरुजः ॥ सामान्यलक्षणं तासां मूत्रं गोमेद
संनिभं ॥ ५० ॥ भवेद्विशीर्णधारं च तथा मार्गविरोधने ॥ तदभावे सुखं मेहेत्स्वच्छं सततधारया ॥ ५१ ॥
इति निदानं ॥ अथ चिकित्सा ॥ वरुणस्य त्वचं शुंठी गोक्षुरं च समांशकं ॥ यवक्षारगुडाभ्यां च क्वाथ
यित्वा पिबेज्जलं ॥ ५२ ॥ वातजामश्मरीं हंति चिरकालोत्थितामपि ॥ वेल्लंतरो वृक्षवृंदाकासः सह
चरत्रयं ॥ ५३ ॥ कुशद्वयं नलो गुंद्रा रक्तपुष्पोग्निमंथकः ॥ मूर्वा पाषाणभेदश्च स्योनाको गोक्षुर
स्तथा ॥ ५४ ॥ अपामार्गश्च वकमलं ब्राह्मी चेति गणो वरः ॥ वीरतर्वादिरित्युक्तः शर्कराश्मरिकृ
च्छ्रहा ॥ ५५ ॥ मूत्राघातान्वायुरोगान्नाशयेन्नचिरेणानपि ॥ वीरतर्वादिः ॥ एका मधुकगो
क्षुरेणुकेरंडवासकाः ॥ ५६ ॥ कृष्णाश्मभेदसहिताः क्वाथ एषां सुसाधितः ॥ शिलाजतुयु
तः पेयः शर्कराश्मरिकृच्छ्रहा ॥ ५७ ॥ एलादिः ॥ अष्टाविंशतिसंख्यानि पलान्यायगोक्षुरैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰सा॰ विपचेत्स जुणे नीरे क्वाथो ग्राह्योर्द्ध शेषतः॥ ततः पुनः क्षिपेत्तत्र पुरं सप्तपलं पदेत्॥ गुडपाकस
१२८ माकारं शीतां तत्र विनिक्षिपेत्॥ ४९॥ त्रिकटु त्रिफलामुस्तं चूर्णितं पलसप्तकं॥ ततः पिंडीकृतस्या
स्य गुटिकामुपयोजयेत्॥ ५०॥ हन्यात्प्रमेहं कृच्छ्रं च प्रदरं मूत्रघातकं॥ वातासृक्वातरोगांश्च शुक्र
दोषं तथाश्मरीं॥ ५१॥ गोक्षुरादि गुग्गुलुः॥ वरुणस्य त्वचो सिद्धः क्वाथो गुडसमन्वितः॥ अश्मरी
पातयेच्छीघ्रं बस्तिशूलं च नाशयेत्॥ ५२॥ कुलत्थं सातलाथाव श्वूकं गोक्षुरकस्तथा॥ विडंगसारसिं
धूत्थं बीजं कूष्मांडकस्य च॥ ५३॥ एभिः कल्की कृतैः सर्पिर्वरुणस्य त्वचः सृतं॥ साधितं हंति दुः
साध्यामश्मरीं मूत्रकृच्छ्रकं॥ मूत्रघातं मूत्रबंधं मद्दिरेवविरेकितं॥ ५४॥ अथ रसः॥ अजाक्षीरे
पचेत्ताम्रमतं सम्यक्कुलाग्निना॥ ५५॥ ततस्ताम्रं शुद्धसूतं च गंधकं च समं त्रयं॥ निर्गुंडीस्वरसे मं
र्द्यं दिनैकं गोलकीकृतं॥ ५६॥ पचेत हडुकामंत्रे याममेकं द्विगुंजकं॥ भक्षयेद्बीजपूरस्य मूलस्या १

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भः स्तु तः पिबेत् ॥५७॥ सितोपेतं जयेत्सर्वं मूत्राघातमयापहः ॥ त्रिविक्रमो रसः ॥ उष्णादिया
नविषमासनतीक्ष्णो निषेवनं ॥५८॥ शोकमायाममध्यानि स्मजेन्मूत्रामयोक्षितः ॥ सर्षपान्रा
त्रिकान्मत्स्यान्दधिकं गुकल्मायकान् ॥५९॥ वेगरोधं निधुवनं त्यजेन्मूत्रामयोक्षितः ॥ इति श्री
लक्ष्मणोत्सवे ग्रंथे मत्रकृच्छ्र मूत्राघाताश्मरीरोग निदानचिकित्साकथनो नामैकोनचत्वारिंशत्तमो
ऽध्यासः ॥ अथ प्रमेहनिदानं ॥ संततास्यात्स्वप्नसुखं दधीनि गुडवैकृतं ॥ ग्राम्योदकानूपरसान
वान्नं कफकृच्चयत् ॥१॥ तत्सर्वं सर्वमेहानां सामान्यं कारणं स्मृतं ॥ एतस्माच्च विशेषाः स्युः मेहा
मेदा यथातथं ॥२॥ कफो वस्तिगतो दुष्टो धातूनां कृष्य दूषणात् ॥ मेदोमज्जावसा कादीन् दशमे
हान् प्रवर्तयेत् ॥३॥ पित्तमुष्णादिसहितैः दुष्टं पूर्वोक्तकारणैः ॥ प्रमेहान्तद्भवकुरुते चतुरो मा
रुतस्तथा ॥४॥ असाध्या वातजास्तेषु याप्याः पित्तसमुद्भवाः ॥ साध्याः कफोद्भवाः प्रोक्ताः प्रमे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ स॰
१२९

ह्राअचिरोत्थिता:॥५॥ मेदोस्रशुक्रांबुरसालसीकौजांसि चामिषं॥ मज्जा चेति यथायोगं प्रमेहे
क्षीणा धातवः॥६॥ दोषैर्दुष्टाः स्रवंत्येते प्रमेहा तेन सीरदति॥ मूत्रवर्णरसाकारैर्भेदसंज्ञाविकल्पना
७॥ देहे चिक्कणता च क्रामाधुर्यं हस्तपादयोः॥ दाहस्तृट्तालुदंतेषु मलस्तत्पूर्वलक्षणं॥८॥ तेषां
सामान्यं लिंगं प्रभूताविलमूत्रता॥ दोषदूष्यविशेषैः स्या तत्र योगविशेषतः॥९॥ जले सुसांद्र
सिकता सुरापिष्टाः शनैस्तथा॥ लाला शुक्रप्रमेहो च शीतश्च दशमो भवेत्॥१०॥ क्षारनीलो च हा
रिद्रकालमांजिष्टरक्तता॥ वसा मज्जा हस्तिपुम्न प्रमेहा विंशतिः स्मृताः॥११॥ मसूरिका सर्षपि
का जालिनी विनताऽलजी॥ शराविका कच्छपिका विद्रधिश्च विदारिका॥१२॥ पुत्रिणी चेति पिटि
का मेहस्यापड्वादश॥ मांसलेषु प्रदेशेषु जायंते संधिमर्मसु॥१३॥ इति प्रमेहनिदानं॥ अथ चि
कित्सा॥ कुलत्थकोद्रवोद्दालश्यामाकाश्चणकास्तथा॥१४॥ गोधूमांश्च प्रमेहेषु भोज्यानि संपु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पुरातनाः ॥ हारुत्रिफलदार्व्यब्दश्रितः क्षौद्रेण मेहजित् ॥ १५ ॥ त्रिफलामुस्तकुटजा सनदार्वी भृक्तो
पिबा ॥ पिबेदङ्कूचीस्वरसं सक्षौद्रं मेहशांतये ॥ १६ ॥ पद्मा धात्रीरसं क्षौद्रं निशाकल्कयुतं पिबेत् ॥ स
क्षौद्रं त्रैफलं चूर्णं प्रमेहान् हंति सेवितं ॥ १७ ॥ शुद्धाश्मजतु चूर्णं वा सक्षौद्रं मेहनाशिनि ॥ त्रिफला
चित्रकं दार्वी काथस्तु न्यांशकैः कृतः ॥ १८ ॥ समाक्षिकोजयेत्सर्वान् प्रमेहान् प्रबलानपि ॥ त्रि
फलामुस्तकं दार्वी विशालेति समैः कृतं ॥ क्वाथो निशारजः क्षौद्रयुक्तः सर्वप्रमेहजित् ॥ न्यग्रो
धं पिप्पलं निंबो उंबुराम्रकपित्थकं ॥ २० ॥ जंबू मधूक मधुकं शोनाकारग्वधाशनं ॥ लोध्रं प्रिया
ङ्वरुणं पटोलं ककुभद्वयं ॥ २१ ॥ करंजमेषशृंगी च भल्लातकफलानि च ॥ त्रिफला माढकी दंती चि
त्रकं कटुजं तथा ॥ २२ ॥ सर्वमेकीकृतं चूर्णं शिलाक्षौद्रेण संयुतं ॥ फलत्रिककषायं च कुर्यादस्या
नुपानकं ॥ २३ ॥ न्यग्रोधाद्यमिदं चूर्णं मूत्रशुद्धिकरं परं ॥ प्रमेहान्नाशयेत्सर्वान् मूत्रकृच्छ्राणि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लं॰सं॰ पानि च ॥२४॥ न्यग्रोधाद्यं चूर्णं ॥ त्रिफला त्र्यूषणं चव्यं पिप्पलीमूलचित्रकं ॥ दारु माक्षिकधातुश्च
१३१ द्वौ क्षारौ लवणत्रयं ॥२५॥ एतानि शाणमात्राणि प्रत्येकं कारयेद्बुधः ॥ त्रिवृद्दंतीपत्रकं च त्वगेलावंश
रोचना ॥२६॥ प्रत्येकं कर्षमात्राणि कुर्याद्देतानि बुद्धिमान् ॥ द्विकर्षमत्र लोहं स्याच्चतुःकर्षा सिताभ
वेत् ॥२७॥ शिलाजित्वष्टकर्षं स्यादष्टौ कर्षाश्च गुग्गुलुः ॥ एभिरेकत्र संयुक्तैः कर्तव्या गुटिकाः
शुभाः ॥२८॥ चंद्रप्रभेति विख्याता सर्वरोगप्रनाशिनी ॥ प्रमेहविंशतिं कृच्छ्रं मूत्रघातं तथाश्मरीं ॥
२९॥ विबंधानाहशूलानि मेहनं ग्रंथिमर्बुदं ॥ अंडवृद्धिं तथा पांडुं कामलं च हलीमकं ॥ ३०॥ अन्त्रवृ
द्धिं कटिशूलं श्वासं कासं विचर्चिकां ॥ कुष्ठानीव तथा कंडूं प्लीहोदरभगंदरे ॥ वातपित्तं कफं हन्याद्
द्बल्या वृष्या रसायनी ॥ ३१॥ चंद्रप्रभा गुटिका ॥ गोकंटकग्रन्थिविषा वचा वरूणरोध्रकं ॥ ३२॥ सोम
वल्का गुडूची रिष्ट भल्लातकपटोलकं ॥ मंजिष्ठा दीप्यक निशा पाठा पद्मक मुस्तकं ॥ ३३॥ चंदनं सा

259

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सागरः समे रे भिस्नेहं तु साधयेत्॥ कफवातप्रमेहेषु सिद्धं तैलं प्रशस्यते॥ २४॥ द्वंद्वजेषु घृतं शस्तं
तैलाज्यं च त्रिदोषजे॥ कंटकाद्यं घृतं तैलं युगलं च प्रशस्यते॥ २५॥ प्रमेहोत्था तु पिटिकाः शोफवत्स
मुपाचरेत्॥ पक्वास्ताः शमयेद्दोव्रणरोहणभेषजैः॥ २६॥ अथ रसः॥ शुद्धतार्क्ष्यं शिलाजीवं कपि
त्थं कोलबीजकं॥ कंकोलं रजनीचूर्णं भाव्यं भृंगांबुभिः समं॥ २७॥ भावना विंशति देयाः शोषयेच्च
पुनः पुनः॥ निष्कमात्रं तु सक्षौद्रं लिह्यादनुपिबेत्ततः॥ २८॥ महानिंबस्य बीजानि षट्टंक तैन दि
निष्ककं॥ तंडुलांबुपलं सर्वमेकीकृत्य पिबेद्दिनं॥ २९॥ तेन सर्वे प्रणश्यंति प्रमेहा दुर्जया अपि॥ स
र्वप्रमेहहरो रसः॥ व्यायाममैथुनं क्रोधं दिवास्वप्नं गुरूणि च॥ ३०॥ तीक्ष्णोष्णलवणाम्लानि प्रमे
ही सर्वदा त्यजेत्॥ इति श्री लक्ष्मणोत्सवे ग्रंथे प्रमेहरोगनिदानचिकित्साकथनं नाम चत्वारिंश
त्तमोऽध्यायः॥ ४०॥ अथ मेदोरोगस्य निदानं॥ दिवास्वप्नाद्व्यायामाभावात् मधुरश्लेष्मजाशनैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० स्निग्धैश्च मेदसो वृद्धिर्भवेदुत्साहनाशिनी ॥ १ ॥ मेदोमांसातिवृद्ध्या स्याच्चलत्स्फिग्गुदरो स्तनः ॥
१३१ अयथावद्वपुस्थौल्यात्तस्मात्साध्यासु रूपदृग्वा ॥ २ ॥ इति मेदोनिदानं ॥ अथ चिकित्सा ॥ मेदस्विनां प्रश
स्यन्ते पुराणाः शालयः सदा ॥ यवा मुद्गाः कुलित्थाश्च मद्यान्यहेत्ररतं न भवेत् ॥ ३ ॥ व्यायामः शस्यते
निसंचिताक्रोधोऽस्य निद्रुता ॥ पंथा अवायो धूमाश्च सेव्या मेदस्विभिः सदा ॥ ४ ॥ रूक्षा यवाः सर
जः क्षारयवामलकनागरं ॥ विडंगं चेति योगोयं स्थौल्यनाशकरं परं ॥ ५ ॥ प्रातः प्रातः पिबेन्नि
त्यं जलं माक्षिकसंयुतं ॥ अन्ने जीर्णे च भुंजीत स्थौल्यं तेन जयेद्ध्रुवं ॥ ६ ॥ व्योषजीरकचव्यानि हिं
गुसौवर्चलाग्निकं ॥ एभिर्मधुयुताः पीताः सक्तवः स्थौल्यनाशनः ॥ ७ ॥ त्र्यूषणत्रिफलामुस्ता
विडंगानलगुग्गुलुन् ॥ भक्षयेन्नाशयेद्रोगान् मेदश्लेष्मामवातजान् ॥ ८ ॥ नवांगो गुग्गुलुः ॥
तालपत्रोद्भवं क्षारं भक्तमंडसमन्वितं ॥ सहिंगुकं पिबेन्नित्यं मेदोदोषनिवृत्तये ॥ ९ ॥ शंखचूर्णं

१३

261

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

न संयुक्तो वा सा पत्ररसो हरेत्॥ दौर्गंध्यं वपुषो श्रुह्या बिल्वपत्रोद्भवो रसः॥१०॥ पथ्यानिंबस्य प
त्राणि वल्कलं दाडिमाश्रयेः॥ रोध्रं चे संगरागो यं मंगनानां प्रशस्यते॥११॥ पुंसां अंबूकषायो यमंग
दौर्गंध्यनाशनः॥ अथ रसः॥ शुद्धसूतं मृतं ताम्रं तारं बोलं समांशकं॥१२॥ मर्दयेद्दर्कपयसा दिनमे
कं ततः सुधीः॥ लिह्याद्गुंजमितं क्षौद्रं संयुक्तं च ततः पिबेत्॥१३॥ पलं तोयं पलं क्षौद्रं द्वयमेकत्र योजि
तं॥ वडवाग्निरसो नाम स्थौल्यमाशु व्यपोहति॥१४॥ संवेशभोजनस्थाने श्लेष्मलानि दधीनि च॥ म
धुराणि श्रमाभावं मेदस्वी सर्वदा त्यजेत्॥१५॥ इति मेदोरोगचिकित्सा॥ अथोदररोगनिदानं॥ मं
दाग्नौ व्याधयः सर्वे विशेषादुदराणि च॥१६॥ भवत्यजीर्णदुष्टान्नमलदोषाति संचयैः॥ दोषाः स्वहे
तुवाहानि श्रोतांस्यास्तर्वर्कोपिनः॥१७॥ दूषयित्वानलं प्राणापानौ च जठरं गताः॥ कुर्वंति जठरं
व्याधीन्नष्टधा सम्प्रजायते॥१८॥ वातोदरं पित्तकफसन्निपातक्षतोदरं॥ प्लीहबद्धोदरं चैव जलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द०ल० दरमथापरं ॥१९॥ निदानभेदतस्तेषां भेदानामनुसारतः ॥ पूर्वरूपाणि तेषां तु बलवर्णरुचिक्षयः
१२२ २०॥ जीर्णान्नं पादशोफो विदाहो बस्तिवेदना ॥ सर्वेषु जठरे पुस्या ह्याध्मानं वह्निमंदता ॥२१॥ शोथोंग
सादो विड्मूत्रसंगो दाहो बलक्षयः ॥ अनाशो जठरी वक्रो पक्षसीणो न जीवति ॥२२॥ उत्पद्यमानरोग
श्चे जीवेत्सम्यक् चिकित्सितः ॥ इत्युदरनिदानं ॥ अथ चिकित्सामाह ॥ जठरेषु प्रशस्यंते यवा मुद्गाश्च
सर्वदा ॥२३॥ आंगलश्चरसा रक्तशाल्यश्च विरेचनं ॥ तैलमेरंडजं क्षारमूत्रयुक्तं दिने दिने ॥२४॥ पिबे
ज्जो नित्यमतो तैलं जठरे वा पयोयुतं ॥ पिप्पलीलवणोपेतां तक्रं वातोदरी पिबेत् ॥२५॥ पित्तोदरी पिबे
त्स्वादु शर्करामरिचान्वितं ॥ यवानी मोषसिंधूत्थजाजीयुक्तं कफोदरी ॥२६॥ त्रूषणक्षारसंयुक्तं तक्रं
दोषत्रयोदरी ॥ कृष्णा तंडुलजं चूर्णं स्नुहिक्षीरेण भावितं ॥२७॥ योगं सप्त दिने हन्याज्जठरमाधिमु
त्कटं ॥ यथाविधि निषेवेत पिप्पलीवर्द्धमानकं ॥२८॥ निहन्यात्ते न सर्वाणि जठराणि न संशयः ॥ आ

९१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्रवेतससिंधूत्थपिप्पलीमरिचान्वितः ॥ २९ ॥ पीतः शोभांजनः क्वाथः प्लीहोदरविनाशनः ॥ पि
प्पल्यो भाविताभूयः पलाशक्षारवारिभिः ॥ ३० ॥ हंत्युः प्लीहोदरं घोरं गुल्मं मंदाग्नितामपि ॥ पुरद
ग्धं सलवणं अर्कपत्रं विचूर्णितं ॥ ३१ ॥ मस्तुना च समं पीतं प्लीहानं नाशयेद्बुधः ॥ शरपुंखा जटा क
ल्कः पीतस्तक्रेण संयुतः ॥ ३२ ॥ शीघ्रं प्लीहोदरं हंति चिरकालसमुद्भवं ॥ पथ्या पुनर्नवा शुंठी दारुछि
न्नोद्भवा श्रृतः ॥ ३३ ॥ मूत्रगुग्गुलुसंयुक्तः शोफोदरहरः परः ॥ पिबेन्मूत्रेण संयुक्ताशुंठी रोहितका
भया ॥ ३४ ॥ सर्वोदरप्रमेहार्शः कृमिगुल्मोपशांतये ॥ पिबेदेरंडतैलं च दशमूलयुतं नरः ॥ ३५ ॥ क्षी
रान्नभुक्तो बलवान् गोमूत्रं श्वपथूदरे ॥ तुंबुरूणि त्रिलवणं यवानी पुष्कराह्वयं ॥ ३६ ॥ यवक्षाराभ
या हिंगु विडंगानि समानि च ॥ तत्र त्रिभागा विज्ञेया सर्वाण्येकत्र चूर्णयेत् ॥ ३७ ॥ पिबेदुष्णांबुना
चूर्णं यवक्काथेथवा समं ॥ सर्वगुल्मोदराध्मानशूलान्याशु विनाशये ॥ ३८ ॥ चित्रकाशंखिनी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लं॰सं॰ पथ्या दंती दंतीफलं तथा ॥ वृद्धदारश्च शम्याकः कपिलस्त्ववतायुगं ॥ ४९ ॥ कोशातकी देवदाली वि
१३३ डंगं कटुकी तथा ॥ सातला पिप्पलीमूलं नीलिनी गिरिकर्णिका ॥ ५० ॥ हेमक्षीरी च विषं चैतैरेकैकैरेभिः
पिचून्मितैः ॥ घृतप्रस्थं स्नुहीक्षीरं षट्पलं च पलद्वयं ॥ ५१ ॥ अर्कदुग्धस्य दद्यात्तु साधितं कुक्षिगुल्म
नुत् ॥ हितं शूलमुदावर्तं शोफाध्मानभगंदरान् ॥ ५२ ॥ शमयत्युदराण्यष्टौ निपीतं बिंदुमात्रकं ॥ गो
दुग्धेनोष्ट्रदुग्धेन कौलत्थेन सतेन वा ॥ ५३ ॥ उष्णोदकेन वा पीतं बिंदुवेगैर्विरिच्यते ॥ एतद्बिंदुघृतं ना
म नाभिलेपाद्विरिच्यते ॥ ५४ ॥ बिंदुघृतं ॥ सौवर्चलं यवक्षारं सामुद्रं च सैंधवं ॥ टंकणं स्वर्जिकाक्षा
रं तुल्यमेकत्र चूर्णयेत् ॥ ५५ ॥ अर्कदुग्धैः स्नुहीदुग्धैर्भावयेदातपे त्र्यहं ॥ लेपयेदर्कपत्रेण रुध्वा
भांडे पुटे पचेत् ॥ ५६ ॥ क्षारं तच्चूर्णयेच्चाथ विडंगं त्र्यूषणाग्निकं ॥ ५७ राजिका त्रिफला चव्यमेकीकृत्य
प्रयोजयेत् ॥ वज्रक्षाराभिधं चूर्णं शंभुना भाषितं पुरा ॥ खादेन्निष्कद्वयं सर्वजठराणि जयेन्नरः ॥ ५८ ॥ शो
९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

फं गुल्मं चाश्मलानि युन्हि मांद्यमजीर्णकं ॥ वाताधिके क्षये कुष्टे कफे पित्ते च शस्यते ॥ ४९ ॥ अल्पगो मूत्रे के
मुक्तिमारनाले स्त्रिदोषजित् ॥ पिबेद्धो मूत्रसंयुक्तं खदिरं देवदारु च ॥ ५० ॥ उदरं पांडुरोगं च शूलं वास्तुविना
शयेत् ॥ इति वज्रक्षारचूर्णं ॥ औदकानूपमांसानि पिष्टान्नाजीर्णभोजनं ॥ ५१ ॥ आयामाध्वदिवास्व
प्नं जठरी परिवर्जयेत् ॥ शाकाम्ललवणोष्माणि विदाहीनि गुरूणि च ॥ ५२ ॥ बहुशस्तोयपानं च वर्ज
येज्जठरी सदा ॥ शाकाम्ललवणोष्माणि अध्वास्वप्नं परित्यजेत् ॥ ५३ ॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे मेद
जठररोगयोर्निदानं चिकित्साकथनं नामैकचत्वारिंशत्तमोऽध्यायः ॥ ४१ ॥ वायुः स्नेहनु भिर्दुष्टो रक्तपि
त्तकफानु बहिः ॥ नीत्वा तु दुष्टाः श्वेते ः सर्वैः संनिरुध्य गतिः स्वयं ॥ १ ॥ त्वग्मांसाश्रयमुत्सेधरूपं शोथं प्र
वर्त्तते ॥ विशेषात्कफहेतुत्वे प्राधान्यात्तद्धि रेचनं ॥ २ ॥ प्रसेकद्वंद्वमिलितैर्दोषैः स्याद्भिधा ततः
त्रिधा चैव नवधैवं स्यात्तस्य तं यथातथं ॥ ३ ॥ तस्य प्राग्लक्षणं दाहः शिरायामः सगौरवं ॥ अप्रवृत्तिश्च

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लु. सा.
२२७

रक्तक्षयस्य जायते बलहीनता ॥ ४ ॥ गात्रसंशोधनं माधिलं घनोद्वेश्च पेलवाः ॥ बलहीनाश्च तेषां स्यादम्ल
तीक्ष्णोष्णसेवनैः ॥ ५ ॥ गुरुदध्याममत्स्याद्यैः विरुद्धान्नविषैरपि ॥ अभिघातादतिस्नप्नमर्मपीडादिहेतुभिः
६ ॥ स्त्रीणां प्रसूतिवैषम्यात् शोथस्याद्दुस्तु संभवात् ॥ नृणां मूर्द्धगतः पद्भ्यां स्त्रीवक्त्राद्धोगतिः ॥ ७ ॥ अ
साध्यः शोथ उद्दिष्टो बस्तिगश्चोभयोरपि ॥ श्वासोरुविस्तृषाच्छर्दिर्दौर्बल्यं ज्वर एव च ॥ ८ ॥ अतीसारश्च
श्वसिते तेशोथस्योपद्रवाः स्मृताः ॥ इति निदानं ॥ अथ शोथचिकित्सा ॥ पुनर्नवैरण्डशुंठी पंचमूलीसृ
तं जलं ॥ ९ ॥ प्रपिबेद्धन्ति केशोथे तैले वा अभिसाधयेत् ॥ दार्वीफलत्रिकारिष्टपटोलानां सगुग्गुलुः ॥
१० ॥ क्वाथः पित्तजं शोथं हन्ति तृष्णाज्वरान्वितं ॥ माहिषाक्षं पिबेन्मूत्रसंयुक्तं वा जलान्वितं ॥ ११ ॥ कफो
द्भवं जयेत्तेन श्वपथुं बंधुविस्तरं ॥ खादेद्गुडेन सहितं मार्द्रकं वापि नागरं ॥ १२ ॥ पथ्यां वापि च्यं लौह्वापि क
र्षेत त्रिफलावधिः ॥ सर्वर्द्धितं पक्षमेकं मासं वापि निरंतरं ॥ १३ ॥ शोथं जयेत् अतिश्यायं गलवक्त्रमयां

१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तंतः॥ पीनसः श्वासकासांश्च जीर्णज्वरमरोचकं॥ १४॥ ग्रहण्यर्शोविकारांश्च वातश्लेष्मामयाञ्जये
त्॥ अजाक्षीराशनो नित्यमार्द्रकस्य रसं पिबेत्॥ १५॥ पुराणगुडसंयुक्तं सर्वशोफान्विनाशयेत्॥ पिप्पली
चित्रकं शुंठीकं दारीचित्रकं घनं॥ १६॥ हरिद्रेभकणापाठा पिप्पलीमूलकं समं॥ सर्वमेकीकृतं चूर्णं पिबेदु
ष्णेन वारिणा॥ १७॥ नाशयेच्छ्वयथून् सर्वान् हृच्छूलानपि ध्रुवं॥ इति पिप्पल्यादिचूर्णं॥ पुनर्नवादेव
दारुगडूचीदशमूलजे॥ १८॥ क्वाथाढके गुडतुला मार्द्रकस्य रसे तथा॥ प्रस्थमात्रे पचेत्तस्मिन् सिद्धपाके प्रक्षि
पेदिदं॥ १९॥ औषधत्र्यपत्रनागेलाकर्षमात्रा पृथक् पृथक्॥ शीतले तु ततस्तस्मिन् मधुनः कुडवं क्षिपे
त्॥ २०॥ पुनर्नवावलेहोयं सर्वशोथविनाशनः॥ शूलकासारुचिश्वासनाशनो बलवर्णकृत्॥ २१॥ इति
पुनर्नवावलेहः॥ सिद्धं पुनर्नवाकल्कैः पंचकोलकुलत्थयोः॥ क्वाथे घृतं जयेदाशु सर्वश्वयथुनाशनं
२२॥ इति पंचकोलघृतं॥ शुंठीकल्कयुतं सर्पिर्दशमूलस्ते जले॥ सिद्धं निहन्त्यच्छु पथुं ग्रहणीमाम

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

५·स· जामयान् ॥२३॥ अम्लं विदाहि लवणं दिवास्वापं मदं स्त्रियं ॥ मषामिषगुरु स्निग्धं शोथरोगी विवर्जये
२२५ त् ॥२४॥ इति शोथचिकित्सा ॥ अथांत्रमुष्कवृद्धिनिदानं ॥ प्रकुपितो धोगतिर्वायुः फलकोशाभिवाहिनी
॥२५॥ प्रदूष्य धमनी मुष्कौ प्राप्य वंक्षणदेशतः ॥ शोफशूलकरो वृद्धिं प्रकुर्यात् फलकोशयोः ॥२६॥ वात
पित्तकफैर्मेदोमूत्रांत्रैः सप्तधा भवेत् ॥ लघुरूक्षः पृथुर्वातात्सितो नीलो बगाकृतिः ॥२७॥ सदाह स्रुभ
वेन्मुष्कः कफात्कंडूमुष्को गुरुः ॥ स्निग्धशीरुश्वरक्तेन सस्फोटः पित्तलक्षणः ॥२८॥ मेदसा कफलिं
गस्यान्मृदुर्मूत्रभवः स्मृतः ॥ प्रपीडितो ततः श्वनवान् अंत्रवृद्धिगदः स्मृतः ॥२९॥ अत्यभिष्यंदि गु
र्वामप्रकुष्टे वंक्षणाश्रयः ॥ ग्रंथिवत्कुरुते शोफं रोबोर धंतुत विदुः ॥३०॥ इत्यंत्रवृद्धिनिदानं ॥ अथ
चिकित्सा ॥ गोमूत्रेरंडतैलाभ्यां गुग्गुलुं प्रपिबेन्नरः ॥ वातोद्भवां जयेत्तेन मुष्कवृद्धिं न संशयः ॥३१॥
तैलमेरंडसंभूतं सक्षीरं वा पिबेन्नरः ॥ पामाभ्यंजनयोगोऽयं तैलं नारायणाभिधं ॥३२॥ चंदनोशीरमधु

१३

269

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

कंपमनोलोसलैः कृतः॥ लेपः क्षीरयुतैर्मुष्के दाहशोथरुजापहः॥ ३३॥ पंचवल्कलकल्केन प्रलेपः स
र्पिषायुतः॥ मुष्करोगं प्रशमयेत् सितासक्षकफसंभवः॥ ३४॥ सर्वं पित्तहरं कार्यं रक्तजे रक्तमोक्षणं॥ क
वृद्धिजये तु हैमं मूत्रपिष्टैश्च लेपयेत्॥ ३५॥ शिरोविरेकद्रव्यैर्वा सुखोष्णैर्मूत्रसंयुतैः॥ संसेचयमूत्रप्रभ
वस्त्रपट्टेन वेष्टयेत्॥ ३६॥ पीतदारुकृतं क्वाथं पिबेन्मूत्रसमन्वितं॥ मेदःसमुत्थितं स्विन्नं स्वरसारे
न लेपयेत्॥ ३७॥ विध्येद्धृष्टिं मुखेनाधः सीमन्तो पार्श्वतो बुधैः॥ शंखस्योर्ध्वं च कर्णान्ते दग्ध्वा सीमनि
दरात्॥ ३८॥ व्यत्यासाद्वा सिरां विध्येदन्त्रवृद्धिप्रशान्तये॥ रास्नागोक्षुरकैरंडबलायष्ट्यमृताश्रितः॥
अन्त्रवृद्धिजये रात्रुरनुतैलेन संयुतं॥ स्नुह्यमैरंडजं तैलं क्षीरयुक्तं बलान्वितं॥ ४०॥ पीतमाध्मानशूल
घ्नं मंत्रवृद्धिमपोहति॥ गोघृतं सैंधवोपेतं शंबूकस्वरसैः कृतैः॥ ४१॥ पक्वं समर्दितं हन्याच्छीघ्रं वा
करंडुजं॥ गोधूमकुंदराभवमवितुगधेन संयुतं॥ ४२॥ चूर्णं सुखोष्मकं लेपात् तद्वध्मशूलहरं परं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लं॰ स॰ १३६ मूलं बिल्वकपित्थयो रलुकयोः स्याग्नेर्बृहत्योर्द्वयोः श्यामा पूतिकरंजशाग्रुकतरो र्बिभ्वोषधं पौष्करं
कूष्मांडग्रंथिकवेल्लपंचलवणक्षाराजमोदान्वितं पीतं कांजिककोष्णतोयमथितैः चूर्णीकृतं वघ्नजित्
इति बिल्वाद्यं चूर्णं ॥ वृंदात् ॥ सैंधवं पिचुलं कुष्ठं शतावहा मधुकं वचा ॥ ५५ ॥ ह्रीबेरं मधुकं शुंठी मेदे द्वे देव
दारु च ॥ शाठी विडंगातिविषा विशाखा भीरुचित्रकं ॥ ५६ ॥ कट्फलं वाजमोदे द्वे पौष्करं रेणुका स्थिरा ॥ रा
स्नाद्रुतिकणा श्यामा बिल्वकं नीलिनी समैः ॥ ५७ ॥ एभिरेरंडजं तैलं सिद्धं वातकफापहं ॥ ब्रध्नाश्लीह
मेहानामुदावर्तस्य नाशनं ॥ ५८ ॥ अनाहं शमयेत्क्षिप्रं मश्मरीपानलेपनैः ॥ इति बृहत्सैंधवाद्यं तैलं
उच्चारोहणविण्मूत्रधारणोत्कटनाशनं ॥ ५९ ॥ विषमोहत्रध्वनाध्वस्त्री संगमात्त्वधर्मरुक् त्यजेत् ॥
इति श्रीलक्ष्मणोत्सवे ग्रंथे शोथरोगात्रवृषणादीनां निदानं चिकित्सा कथनं नाम द्विचत्वारिंशत्तमोध्या
यः ॥ ४२ ॥ अथ गडगंडनिदानं ॥ कफवातौ गले दुष्टौ मन्यामेदप्रदूषकौ ॥ शोथं मुष्कांकृति कुरुतम

१३६

271

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हं तं वा प्रकुर्वीतः॥१॥ गलगंडसविज्ञेयो यथावत्तं पिबेच्च येत्॥ इति गलगंडनिदानं॥ अथ चिकि
त्सा॥ यवामुद्गाश्च भास्यंते कंडूरूक्षं च भोजनं॥२॥ वमनं रक्तमोक्षश्च गलगंडे महार्दितैः॥ शिग्रुबीजा
त्रि निंबुलं मूलबीजातसीयवान्॥३॥ धान्यबीजा विराम्लेन तक्रेण मर्दलेपनं॥ कृतं निहंति सकलान् ग
लगंडोद्भवामयान्॥४॥ सग्रंथी गंडमालां च नाशयेदपचीमपि॥ श्वेतापराजितामूलं पीतं घृतसमन्वि
तं॥५॥ निम्ननाहारयुक्तश्च गलगंडं विनाशयेत्॥ इति गलगंडचिकित्सा॥ समाहमुषितं पक्वं तिक्तलां
बुफले जलं॥६॥ गलगंडं हरेत्स्नानात् सततं पथ्यसेविता॥ साधितं सर्षपं तैलं षड्गुणांबुफले द्रवे॥७
विडंगं मोषरास्नाग्निक्षारसैंधवदारुभिः॥ कटुतुंबीफलैः सर्वैरेभिः निर्मुलं नस्यकर्मणि॥८॥ तैलेनं ना
शयेच्छीघ्रं गडगंडं चिरोत्थितं॥ इति गलगंडचिकित्सा॥ अथ गंडमालानिदानं॥ दोषा मम्मा क्षिमेदोस्थि
कक्षावंक्षणसंश्रया॥१॥ प्रकुर्वंते स्निग्धान् वार्ताकामलकाकृतीन्॥ संततोसन्निकां गंडान् गंड

272

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ स॰ मालेति तान्विदुः ॥१०॥ चिरकालानुबंधेन गंडमालापची स्मृता ॥ इति निदानं ॥ अथ चिकित्सा ॥ काथो व
१३७ रुणमूलस्य पीतः क्षौद्रेण संयुतः ॥ गंडमालां हरेदाशु चिरकालोद्भवामपि ॥११॥ क्षेत्रसुंडीदलोद्भूतं द्विप
लेप्र विवर्द्धनं ॥ कामलां गंडमालां च नाशयेदपचीमपि ॥१२॥ कटुतुंबीरसैः सिद्धं कटुतैलं चतुर्गुणं ॥
कल्किते सैंधवक्षारगास्नोग्रादेवदारुभिः ॥१३॥ सविडंगैर्जयेद्देनां गंडमालां सुदुस्तरां ॥ पिष्टं सोभां
जनं देवदारु कांजिक संयुतं ॥१४॥ कोष्णं प्रलेपतो हन्यादपचीमपि दुर्जयां ॥ पिष्ट्वा जलेन निर्गुंड्याः शि
फां नश्येन्नियोजयेत् ॥१५॥ तेनाशु निचितां हन्यात् गंडमालां चिरोत्थितां ॥ विडंगमोषसिंधूत्थमधुकं
देवदारु च ॥१६॥ एतैः संसाधितं तैलमपचीमाशु नाशयेत् ॥ वनकार्पासिकामूलं पिष्ट्वा तंडुलकैः सह
॥१७॥ पक्वापूपलिकां खादेदपचीं तेन नाशयेत् ॥ इति गंडमाला चिकित्सा ॥ अथ ग्रंथिनिदानं ॥ दोषा मेदो
स्रमांसानि संदूष्य ग्रंथिसंनिभं ॥१८॥ कफः प्रधानाः कुर्वंति शोथं तं ग्रंथिकं विदुः ॥ तस्या दोषास्त्रमे

१

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

दोस्थिशिरामांसरणोद्भवः॥१९॥ नवध्येवं च तल्लिंगैर्यथावद्व्यसयेद्बुधः॥ इति ग्रंथिनिदानं॥ शोफ
क्रियां प्रकुर्वीत ग्रंथि– मेषु बुद्धिमान्॥२०॥ पक्वेषु प्रवेणां कुर्यात्शोधनं रोहणं तथा॥ हिंस्रास्योना
१व्वा कबीजैर्निकुंभगंधगडूचिका॥२१॥ रोहिण्यगुरुभार्गीचपिष्टागोक्षीरसंयुता॥ तालपत्र्यासहं ग्रं
थौ हितो लेपो मरुद्भवे॥२२॥ पित्तग्रंथौ प्रकुर्वीत क्षीरोदकनिषेवणं॥ काकोलीवर्गनिष्क्वाथं पिबेच्छी
तं सशर्करं॥२३॥ पथ्याचूर्णं पिबेद्द्राक्षारसेनेक्षुरसेन वा॥ ग्रंथिकं नाशयेत्तेन सदाहं तीव्रवेदनां॥२४
जंबूमधुककक्कुभवेतसानां तु वल्कलैः॥ प्रदेहं कल्पयेद्ग्रंथौ वेदनापरिशांतये॥२५॥ कफोद्भ
वे प्रकुर्वीत ग्रंथिके स्वेदनं भिषक्॥ प्रलेपानुष्णतीक्ष्णाश्च भेषजं कटुकफलादिकं॥२६॥ कफोद्
वे प्रकुर्वीत ग्रंथिके स्वेदनं भिषक्॥ दंतीचित्रकजटाकल्कैः स्नोर्थार्कपयसी गुडः॥ भल्लातकास्थिका
सीसं लेपोऽयं ग्रंथिभेदकृत॥२७॥ अतिदुष्टमपक्वं च शस्त्रेणोत्कृत्य यत्नतः॥ कुर्याद्व्रणविधिं भि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰स॰ त्वा प्रदेहे छोणिते स्त्रिते ॥ २८ ॥ इति ग्रंथि चिकित्सा ॥ अथार्बुदनिदानं ॥ सिरास्थकुपिता दोषा
२३८ मेदो मांसास्तनः शिराः ॥ संदूष्याकूष्य कुर्वंति पाकं तं वार्बुदं विदुः ॥ २९ ॥ दोषास्रग्मांसमेदोभिरर्बुदं
षड्विधं भवेत् ॥ लक्ष्मसो र्लक्ष्मेद्धीमान्न तेद्रूदानपि सर्वशः ॥ ३० ॥ इति निदानं ॥ अथ चिकित्सा ॥ स्वेदं वात
हरैर्द्रव्यैः कुर्याद्वातार्बुदे भिषक् ॥ शृंगेण च हरेद्रक्तं ग्रंथिवच्च विधिं चरेत् ॥ ३१ ॥ मृदुस्नेहोपनाहादि
कार्यं पित्तोद्भवेर्बुदे ॥ शस्तं विरेचनं चात्र पथ्यं शीतं तथा लघु ॥ ३२ ॥ यष्टीप्रियंगुककुभराल पत्तंगरो
ध्रकैः ॥ श्लक्ष्णचूर्णीकृतैः कुर्यात्सक्षौद्रं लेपमर्बुदे ॥ ३३ ॥ श्लेष्मिके शंखचूर्णेन सह मूलकभस्मना
अर्बुदे लेपनं कुर्यात् ग्रंथिकादौ विशेषतः ॥ ३४ ॥ गृहधूममशिलालोध्रनिशापतंगमाक्षिकैः ॥ वि
लेपनं कृतेहन्माभ्र मेदोर्बुदकुलापहं ॥ ३५ ॥ पलाशानां दशकं ग्राह्यं कांचनारत्वचो बुधैः ॥ पट्टप
ला त्रिफला ग्राह्या ओषग्राह्य पलत्रयं ॥ ३६ ॥ पलेकं वरुणस्यापि त्वगेला पत्रकं तथा ॥ कर्षकर्ष १

275

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

मितीग्राह्यं सर्वाण्येकत्र चूर्णयेत् ॥३७॥ सर्वचूर्णमिदं कुर्यात्तावन्मात्रस्तु गुग्गुलुः ॥ संमर्द्य गु
टिकाः कार्याः शाणमात्रास्ततो बुधः ॥३८॥ एकैकां भक्षयेद्धीमान् प्रातः प्रातः सदा नरः ॥ गं
डमालां जयत्युग्रां अपचीमर्बुदानि च ॥३९॥ ग्रंथीन् व्रणानि गुल्मांश्च कुष्ठानि च भगंदरं ॥ अनुपानं प्र
योक्तव्यः क्वाथो मुंडतिकाभवः ॥४०॥ क्वाथः खदिरसारस्य पथ्याक्वाथोथवोष्मकं ॥ कांचनारोगुग्गु
लुः ॥ गुरुपिष्टान्नमम्लं च श्लेष्मपं च दधीनि च ॥ एकं सर्वं वैदलं चैव गंडमालादिकं त्यजेत् ॥४१॥ इति श्री
लक्ष्मणोत्सवे ग्रंथे गंडमालागलगंडादीनां निदानचिकित्साकथनं नाम त्रिचत्वारिंशत्तमोऽध्यायः ॥४२
अथ श्लीपदनिदानं ॥ वंक्षणोरुस्थिता दोषाः कफमुख्याः स्वहेतुभिः ॥ प्रदुष्टाः प्राप्य चरणौ मांसमसृक्च
प्रदुष्य च ॥१॥ शोफं शनैः शनैः कुर्युः श्लीपदं तं प्रचक्षते ॥ पाणिकर्णाक्षिशिश्नौष्ठशिरस्वाश्चाहुश्च
केचन ॥२॥ इति निदानमथ चिकित्सा ॥ वमनैर्लंघनैः स्वेदैः रक्तमोक्षैर्विरेचनैः ॥ उपाचरेत्कफह

276

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लं०स० रैः श्लीपदं चो ह्ममेषजैः॥३॥ निर्गुंडीशीग्रुवृषीभूसर्षपैसंउ धूर्त्तकैः॥ प्रलेपो विहितो हन्यात् श्ली
१३९ पदं च विरोत्थितं॥४॥ श्लीपदे वातजे कुर्यात् स्नेहः स्वेदोपनाहकः॥ गुल्फोपरिशिरां विध्येत् प्रदेशे
चतुरंगुले॥५॥ श्लीपदे पित्तजे विध्येत् गुल्फस्याधः शिरां बुधः॥ विधिं पित्तहरं कुर्यात् सितार्बुद
विसर्पवत्॥६॥ श्लीपदे श्लेष्मजे विध्येच्छिरामंगुष्ठवर्त्मनि॥ सेवेत मधुसंयुक्तं कषायाश्चकफापहं॥
७॥ हारूशुंठी शिवायुक्तं पिबेन्मूत्रेण गुग्गुलुं॥ श्लीपदं नाशयेत्तेन दृढमूलं चिरोत्थितं॥८॥ गोमूत्रेण
गुडूपेतां रजनीं श्लीपदं जयेत्॥ पानाद्वा कांजिकोपेतं वद्धदारूकजं पयः॥९॥ न श्यावाता रितैले
न पथ्या गोमूत्रसंयुता॥ निपीता श्लीपदं हंति सप्तरात्रेन संशयः॥१०॥ त्रिफला त्र्यूषणं चव्यं क्षेत्रगु
डी चंगास्करं॥ गडूचीवरुणं दावीं मेकीकुसाव चूर्णयेत्॥११॥ वद्धदारूभवं चूर्णं सर्वचूर्णसमं क्षिपेत्
कांजिकेन पिबेच्चूर्णं प्रातःकालेक्षमात्रकं॥१२॥ जीर्णे च भोजनं कुर्यान्न साज्यं तत्र किंचन॥ नाशयेत्
१३

277

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्लीपदं शूलं मामवातमरोचकं ॥१३॥ गुल्मकुष्टवातकफप्रभवांश्चामयानपि ॥ क्षणादेव विनश्यं
ति दारुचूर्णस्य भक्षणं ॥१४॥ इति श्लीपदचिकित्सा ॥ अथ विद्रधीरोगनिदानं ॥ दूषयित्वास्थिगा दोषा
मेदोमांसं च शोणितं ॥ भशोत्थिता प्रकुर्वंति गुल्मं ते विद्रधीं विदुः ॥१५॥ महामूलमथं वृत्तमायतं वा
समुन्नतं ॥ पाकानुबंधिनं शोफं गुल्माभं मुष्टिमात्रकं ॥१६॥ तं प्राहुर्विद्रधिं रोगं गुल्मं पाकविवर्जि
तं ॥ विद्रधीः शोणिते मांसे गुल्मो दोषेषु वर्त्तते ॥१७॥ न पच्यते ततो गुल्मो विद्रधीस्तु विपच्यते ॥ वा
तपित्तकफोद्भूतः सर्वरोगोद्भवस्तथा ॥१८॥ क्षतजो रक्तजश्चेति विद्रधीः षड्विधः स्मृतः ॥ हिक्काछ
र्दिस्तृषायुक्तं श्वासपीडासमन्वितं ॥१९॥ आध्मानबद्धनिष्यंदं सजेद्विद्रधिरोगिणं ॥ इति निदानं ॥ अ
थ चिकित्सा ॥ असृग्हरेज्जलौकाभिमर्दुकुर्याद्विरेचनं ॥२०॥ अन्नं लघु च भुंजीत सर्वस्मिन्नेव विद्रधौ
वातघ्नैरौषधैः पिष्टैर्घृततैलसमन्वितैः ॥२१॥ सुखोष्णोह्मेलेपनं कार्यं विद्रधौ वातसंभवे ॥ शिग्रू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल० त्स० पक्वे न कुर्वीतोपनाहं स्वेदनं तथा ॥२२॥ पक्वे पूये त्वित्र पिष्टैर्यवगोधूममुद्गकैः ॥ अपक्वो विद्रधिस्ते
१५० न क्षणादेव विलीयते ॥२३॥ शर्करासारिवायष्टीलाजैः क्षीरसमन्वितैः ॥ प्रदिह्यात्स्वेत्तिक्तं यद्वा पयस्या
क्षीरचंदनैः ॥२४॥ त्रिफलायाः कषायं वा त्रिवृत्कल्कयुतं पिबेत् ॥ इष्टकागोशकृल्लोहसिकतातुष
पांसुभिः ॥२५॥ गोमूत्रपिष्टैः कफजं विद्रधिं स्वेदयेच्चिरात् ॥ हिंगुसैंधवसंयुक्तैर्निर्यूहशिग्रुसंभवैः
२६॥ नाशयेद्विद्रधिं शीघ्रं प्रातः प्रातर्निषेवितैः ॥ वरुणाः स्वेतवर्षाभूमूलेन क्वथितं जलं ॥२७॥ अ
पक्वं विद्रधीं हन्ति प्रसह्य पानतो ध्रुवं ॥ वरुणस्य त्वचः क्वाथो हिंगुकासीससैंधवैः ॥२८॥ शिलाजतु
गुग्गुलं चूर्णैर्द्वितैः सज्जिर्मनोजयेत् ॥ अभ्यंतरसमुद्भूतमकंसपथुद्रुमं ॥२९॥ विद्रधं सुदृढं नंगा
सततं सेवनाे ध्रुवं ॥ अपक्वे क्वथितं तैलं तत् पक्वे व्रणविधिं चरेत ॥३०॥ इति विद्रधी चिकित्सा
इति लक्ष्मणोत्सवे ग्रंथे श्रीपदविद्रधी रोगयोर्निदानं चिकित्सा कथनं नाम चतुश्चत्वारिंशत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मोऽत्रासः ॥ ७७ ॥ अथ व्रणशोथनिदानं ॥ एकदेशे प्रकुपिता दोषाः संदूष्य शोणितं ॥ व्रणं कुर्वंति
तत्पूर्वं लक्षणं स्वयथूद्गमः ॥ १ ॥ एकैकशः सर्वदोषाः स्नागंतुजः सत्वषड्विधः ॥ दोषत्रयप्रकोपेपि प्रा
धान्याद्वेदकल्पना ॥ २ ॥ वातं विना न रुक्कुपितं विना पाको न जायते ॥ कफं विना न पूयः स्यात्तस्मा
त्पाकस्त्रिदोषजः ॥ ३ ॥ वातेन विषमं पित्तं शीघ्रं विरतं कफात् ॥ पच्यते पित्तवद्रक्तागंतुहेतु
द्भवो व्रणः ॥ ४ ॥ मंदपाकोऽल्पशोथत्वं काठिन्यं त्वक्सवर्णता ॥ मंदं वेदनतेति निर्दिष्टं शोथानामामल
क्षणं ॥ ५ ॥ यथा कक्षं दहेद्वह्निर्वायुना समुदीरितः ॥ तथैवां ‾ स्थितः पूयः स्नायुमांसस्थिरादह
हेत् ॥ ६ ॥ इति शोथव्रणनिदानं ॥ अथ चिकित्सा ॥ कुर्यादिम्लानं पूर्वं द्वितीयमावसेचनं ॥ उपनाह
नतीयं च चतुर्थं पाटनं तथा ॥ ७ ॥ शोधनं पंचमं कार्यं रोहणं षष्ठमिष्यते ॥ सप्तमं वैकृतोत्सादं व्र
णानां क्रमतो विदुः ॥ ८ ॥ अभ्यंजयः सेचयेत्पूर्वं वेणुनाड्याः शनैः शनैः ॥ विरापनार्थं मंजीमा

280

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० दंगुष्टेन तले नवा ॥९॥ आद्यावेव प्रकुर्वीत शोषितस्यावसेचनं ॥ दृढे शोथेति विस्तीर्णे व्रणे वा वेद
१५१ नावपि ॥१०॥ लेपः सेकावसेके यौ व्रणे नेवा पतर्प्पणे ॥ शमं प्रयाति रक्तस्य मोक्षणात्सो पिशाम्यति ॥
व्रणस्यान्यो पचारोन रक्तमोक्षसमो भवेत् ॥ यथां करोति रक्तं हि हते तस्मिन्कुतोन्यथा ॥१२॥ द्वाद
शांगुलनः शृंगं तुंबी चाष्टांगुलं द्वरेत् ॥ जलौकां ग्रंथिमात्रस्य रक्तं सर्वांगजं शिरा ॥१३॥ शृंगं गवा
नोद्भवे शस्तं पित्तजे तु जलौकसः ॥ तुंबी कफोद्भवे भाडी सन्निपातोद्भवे व्रणे ॥१४॥ रास्ना हिंस्रा देव
दारू मातुलुंगं च नागरं ॥ अग्निमंथश्च लेपो यं वातशोथहरः परः ॥१५॥ चंदनं मधुकं दूर्वा नलमूलं
च पित्तजे ॥ शोथे विलेपनं शस्तं सर्वैः शीतगणैस्तथा ॥१६॥ वेतसोदुंबराश्वत्थप्लक्षन्यग्रोधवल्क
लैः ॥ प्रलेपो घृतसंयुक्तैः शोफशांतिकरः परः ॥१७॥ एकैषिकाजश्चंगी च सरला वाजगंधिका ॥ का
लानुरगगंधा च लेपो यं कफशोथजित् ॥१८॥ लेपं कुर्वीत नो रात्रौ दधास्मर्पुषितं न वा ॥ न धार

१

281

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ये हूणे शुष्के स्रुतं भूयो न धारयेत् ॥१९॥ उपनाहो तसी बीज दध्यम्ल तिलसक्तुभिः ॥ शस्यते कि
ण्वलवणकुष्टैः शोथव्रणामये ॥२०॥ सक्तवः सर्षपा शोणाः श्यामूलकबिल्वकं ॥ शिग्रो फला
नि चेता निशा स्यं सकछ्मानि पाचने ॥२१॥ जलघृष्टेन नागस्य दंतेन षप्रलेपनात् ॥ पक्वं ते कठिनः
शोथो भिद्यते चक्षणादपि ॥२२॥ चिरबिल्वाग्निमारौच चित्रकाग्निकदंतिकः ॥ गद्ध्रकंककपोता
नां विष्ठा शोथविदारकृत् ॥२३॥ क्षारद्रव्याणि यावंती शस्तानि व्रणदारणे ॥ पटोलपत्रनिंबोत्थ
काथः प्रक्षालने हितः ॥२४॥ पूतिमांसापनुत्पन्नं नवमांसप्ररोहणं ॥ निंबपत्र तिलक्षौद्र पिंडि
का कुरुते व्रणे ॥२५॥ तद्वद्दंतितिलानिंबपत्रं माक्षिक सैंधवं ॥ दुष्टव्रणस्य लेपो यं शमनः शोध
ने हितः ॥२६॥ शरपुंखा मधूपेता व्रणस्याशु प्ररोहिणी ॥ व्रणान् संध्यस्थिमर्मस्थान् सूक्ष्मव
ध्या विशोधयेत् ॥२७॥ पथ्यादंतीच हलिनी तद्वत् क्षौद्रं च सैंधवं ॥ सुरवली पत्र धत्तूर कर्णमोदकु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क॰स॰ देरका ॥२८॥ एते शस्ता पथ कुले पा गंभीरव्रणशांतये ॥ शुक्तिचूर्णयुतैः पंचवल्कलैः परिक
१५२ ल्पनात् ॥२९॥ रोहंति धातकीरोध्रचूर्णवाता दृशा व्रणाः ॥ निंबछेदवचासर्पि हिंगुसैंधवकल्कि
तः ॥३०॥ धूपो रक्षः कृमीहरो व्रणे कंडूरुजापहः ॥ पित्तविद्रधिवीसर्पविधानं सम्यगाचरेत् ॥३१॥
अग्निदग्धव्रणेष्वेषुः शमनं लेपनादि च ॥ सास्रान्वा ताभिभूतांश्च धूपयेत्सरुजोव्रणान् ॥३२॥ श्री
वेष्टकाज्यमदनयवभूर्ज्यसुराह्वयैः ॥ करंजनिंबनिर्गुंडीरसो व्रणकृमीन्जयेत् ॥३३॥ लशुनेन
कृतो वापि लेपः कृमिविनाशनः ॥ त्रिफलायारसः पीतो हरेत्गुग्गुलसंयुतः ॥३४॥ शोथपाकश्च ति
ले दुर्गंधयुक्तान् पित्रणान् ॥ जातीनिंबपटोलं च कटुका द्विनिशे तथा ॥३५॥ यष्टिका शिक्थं मंजिष्ठा
करंजोशीरसारिवा ॥ तुत्थं चविपचेत्सम्यक् कल्कैरभिधीतं बुधः ॥३६॥ लेपादस्य प्ररोहंति सूक्ष्मा ना
डीव्रणा अपि ॥ मर्माश्रिताः क्लेदिनश्च गंभीरा सरुजो व्रणाः ॥३७॥ दूतिजाता यंघतेः ॥ लाक्षामनः

३५

286

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शिलाचैव मंजिष्टा रजनी द्वयं॥ घृतक्षौद्रयुतो लेपः स्त्व विशुद्धिकरः परः॥४८॥ लोहचूर्णं सकासीसं कुं
सुमं त्रिफलान्वितं॥ विलेपनं प्रकुर्वीत कृष्णत्वसपदि व्रणे॥४९॥ इति शोथव्रणचिकित्सा॥ अथ सद्यो
व्रणचिकित्सा॥ व्रणं सद्यः क्षतं शूलं कर्तुं परिषेचयेत्॥ सर्पिषा वा किंचिदुष्णेन यष्टीचूर्णयुतेन वा॥५०॥
आगन्तुजं व्रणं ज्ञात्वा घृतमाक्षिकसंयुतं॥ शीता क्रिया विधातव्या पित्तरक्तोष्मनाशिनी॥५१॥ आमाश
ये स्थिते रक्ते वमनं कारयेद्बुधः॥ पक्वाशये स्थिते रक्ते कार्यं तस्य विरेचनं॥५२॥ त्वक्दंष्ट्रैरंडवंशत्वगश्मभे
दैः सतैजलं॥ सहिंगुसैंधवं पीतं स्रावयेत् कोष्ठतोसृजं॥५३॥ कुलत्थं जलकोलानां रसैः स्नेहविवर्जि
तैः॥ भुंजीतान्नं यवान्नं वा पिबेत्तैलं सैंधवसंयुतं॥५४॥ सद्यो व्रणे हितः प्रोक्तो रेषः सप्ताहिको विधिः॥ अ
त ऊर्द्ध्वं प्रयोक्तव्यः शारीरव्रणवद्विधिः॥५५॥ आयासात् स्यात् व्रणे शोथो रागः शापश्च जागरात्॥ पी
डार्त्तिं च दिवास्वप्नात् चमत्कृच्चैव वाद्धिपनः॥५६॥ इति सद्यो व्रणचिकित्सा॥ अथ भग्नव्रणचिकित्सा॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लु॰ सं॰ १४२ आदौ भग्नव्रणं ज्ञात्वा सेचयेच्छीतलांबुभिः ॥ कुर्यात्सालेपनं पंके बंधनं हृद्बंधनैः ॥४७॥ मंजिष्ठां यष्टि
कां चैव पिष्ट्वा चाम्लेन लेपयेत् ॥ शतधौतघृतोपेता शालिपिष्टेन वा क्षितं ॥४८॥ न्यग्रोधादिकषाये
स्तु सुशीतैः परिषेचनं ॥ पंचमूलेस्तैः क्षीरैः कुर्याद्वा वेदनाव्रते ॥४९॥ सक्तुस्त्रुस्तुतगोक्षीरं साधि
तं मधुरौषधैः ॥ लाक्षाध्वतप्तु तं शीतं प्रातर्भग्नव्रणी पिबेत् ॥५०॥ संधिभंगेस्थिभंगे च लाक्षा गोर
धूममर्जुनं ॥ सार्पिषा सहितं प्रातः पिबेत्क्षीरेण मानवः ॥५१॥ रसोनोज्यसिता क्षौद्रकल्कं प्रातः स
मश्नतः ॥ छिन्नभिन्नाच्युतास्थ्नां च संधानुमचिरोद्भवेत् ॥५२॥ आभा फलत्रिकं व्योषं तुल्यांशं चात्र
गुग्गुलुः ॥ सर्वैः सममस्तु भग्नास्थि कुर्याद्धृज्जोपमं दृढं ॥५३॥ आभागुग्गुलुः ॥ मैथुनं कटुकं क्षारमम्ल
लवणमातपं ॥ भग्नव्रणी न सेवेत रूक्षं धान्यां समासेवं ॥५४॥ लाक्षास्थि संहृत्ककुभ वाजिगंधा वि
चूर्णयेत् ॥ दत्वा पुरं समा लोज्य मेलयेत्सर्वमेकतः ॥५५॥ लाक्षागुग्गुलयो गोपं भग्नास्यस्थीनि से

१

285

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विनः ॥ संधितानि प्रकुरुते वज्रादपि दृढानि च ॥ ५६ ॥ इति लाक्षागुग्गुलुः ॥ इति भग्नव्रणचि
कित्सा ॥ अथ नाडीव्रणचिकित्सा ॥ पक्वस्य श्वयथोर्भेदात् भावाद्दुःपथ्यसेवनात् ॥ पूयः प्रविश्य मांसा
दिधातून् दूरं प्रधावति ॥ ५७ ॥ नाडीमार्गेण सा दूरं गतिः पूयस्य जायते ॥ दोषैर्व्यस्तैः समस्तैश्च श
ल्येनैवं च पंचधा ॥ ५८ ॥ सरुक् सूक्ष्ममुखी वातात् हिवर्णा फेनिला हुमा ॥ रात्रौ श्रवति पित्तात्तु सदा
हज्वरकृद्भवेत् ॥ ५९ ॥ कफाद्दु घना स्रव्या पिच्छिला चैव जायते ॥ तोददाहज्वरश्वासा बहुरूपद्
वदुःखकृत् ॥ ६० ॥ दोषसंसर्गतो ज्ञेया नाडी घोरा मतिप्रदा ॥ गात्रस्य चलने तीव्रदुःखगौरवकारि
णी ॥ ६१ ॥ शल्यमंतःस्थितं नाडी लक्ष्ये लक्षणैर्निजैः ॥ अथ चिकित्सा ॥ गतिर्मनुष्यनाडीं नाश
त्रेणोत्साद्य बुद्धिमान् ॥ व्रणोक्तप्रक्रमं पूर्वं कुर्याच्छोधनरोपणं ॥ ६२ ॥ धारितं वातिके दोषे नाडीस
म्यक् प्रक्षालयेत् ॥ लेपयेच्च तिलैः पिष्टैः प्रसक्तु पुष्पीफलान्वितैः ॥ ६३ ॥ हरिद्रातिलमंजिष्ठा महती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० चेद्वारुणी ॥ एतत्कल्केनुपिनोत्थ कोपो नाडी प्रलेपयेत् ॥ ६४ ॥ श्लेष्मिकां लेपयेन्नाडीं तिलपथ्याढ्
१५५ सैंधवैः ॥ निंबपत्रैः सदंतीकैरेकीकृत्य सावचूर्णितैः ॥ ६५ ॥ लेपयेत्तिलमध्वाज्यैः शाल्मुली छिन्नशोधि
तां ॥ त्रुमाः स्यात्तः कर्णिकारः क्षोद्राज्यैर्दुरविद्रया ॥ ६६ ॥ संलिप्ता सूत्रवर्तिस्तु संयोज्या तस्य सिद्
ये ॥ मधुसैंधवसंयुक्ता वर्तिर्वा निहिता व्रणे ॥ ६७ ॥ नाडीगतिं निहंत्येषा शोधनं कुरुते परं ॥ कृशदुर्बल
भीरूणां नाडीमर्मगता तु या ॥ ६८ ॥ तां छिंद्यात्क्षारसूत्रेण न शस्त्रेण कदाचन ॥ क्षारसूत्रानुसारि
ण्या सूच्या नाम विनिर्हरेत् ॥ ६९ ॥ सूत्रस्यांतं समानीय गाढं बंधं समाचरेत् ॥ तीक्ष्णक्षारबलं पश्चा
त्क्षारास्फेन प्रलेपयेत् ॥ ७० ॥ सूत्रमन्यत् क्षिपेत्प्राज्ञः यावन्न छिद्यते गतिः ॥ भगंदरेप्ययं प्रोक्तो वि
धिश्चार्बुदकादिषु ॥ ७१ ॥ नाडीदुष्टव्रणहरो भगंदरविनाशनः ॥ निर्गुंडीपत्रमूलाभ्यां पीडयित्वा
रसं नयेत् ॥ ७२ ॥ साधितं तेन तुल्येन तैलं नाडीव्रणापहं ॥ इति निर्गुंडीतैलं ॥ दुष्टव्रणेषु सर्वेषु २१

287

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्फोटे विविधेषु च ॥७३॥ पाने चाभ्यंजने चैव सेचने च प्रशस्यते ॥ कासीसं हरिद्रे द्वे मुस्तं हरितालं मनःशि
ला ॥७४॥ कंपिल्लकं गंधकं च विडंगं गुग्गुलुस्तथा ॥ शिक्थकं मरिचं कुष्टं तुत्थकं गौरसर्षपाः ॥७५॥ रसां
जनं च सिंदूरं श्रीवासं रक्तचंदनं ॥ अरिमेदं निंबपत्रं करंजं सारिवां वचां ॥७६॥ मंजिष्ठां मधुकं मांसीं
शिरीषं रोध्रपत्रकं ॥ हरीतकी प्रपुन्नाटं चूर्णयेत्कार्षिकां पृथक् ॥७७॥ ततस्तच्चूर्णमालोड्य त्रिंशत्पल
मिते घृते ॥ स्थापयेत्ताम्रपात्रेण घर्मे सप्तदिनानि च ॥७८॥ अस्याभ्यंगेन कुष्ठानि दद्रू पामा विचर्चिका
शुक्रदोष विसर्पाश्च विस्फोटा वातरक्तजा ॥७९॥ शिरःस्फोटोपदंशाश्च नाडीदुष्टव्रणानि च ॥ शोफा भ
गंदराश्चैव लूताः शाम्यंति देहिनां ॥८०॥ शोधनं रोपणं चैव सवर्णीकरणं घृतं ॥ इति कासीसाद्यं घृ
तं ॥ इति नाडीव्रणचिकित्सा ॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे शोथव्रण सद्योव्रण भग्नव्रण नाडीव्रण निदा
नं चिकित्साकथनं नाम पंचचत्वारिंशत्तमोऽध्यासः ॥४५॥ अथ भगंदरनिदानं ॥ गजाश्वपृष्ठगमनैः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लं०स०
१४५

कृष्ठिनोत्कटकासनैः ॥ अर्शोनिदानकथितैरपचारश्च सेवितैः ॥१॥ आयंते पिटका ग्रंथिपायोर्द्वकां
गुले तथा ॥ पायोरंतर्भवेवापि दुष्टोसग्मां सगो भवेत् ॥२॥ बस्तिमूत्राशयाभ्यासगतत्वात्स्यंदनात्मकः
भगंदरः स विज्ञेयो भगं दारयतीति यत् ॥३॥ प्रत्येकं द्वंद्वमिलितैः दोषैरागंतुभिस्तथा ॥ हेतुभिः सोष्टधा
प्रोक्तो द्विधा पक्वादिभेदतः ॥४॥ अपक्वं पिटिकामाहुः पक्वं तु भगंदरं ॥ वातात्शोवारुणो तोदभेद
स्फुरणातुष्करी ॥५॥ पिटका जायते पित्तादुष्ट्रग्रीवावदुन्नता ॥ ऊष्मा घा रागिणी तन्वी ज्वरतापसम
न्विता ॥६॥ कफात्कंडूकरी स्निग्धा महामूला च पांडुरा ॥ वातपित्तोद्भवा श्यावा ताम्रा दाहोष्मरुक्करी ॥७
कफानिलोद्भवा पांडुश्यावा कृच्छ्रेण पच्यते ॥ पांडुरारुणवर्णा च पित्तश्लेष्मसमुद्भवा ॥८॥ पादांगुष्ठ
समानैकैश्चाथा स्यात्सन्निपातजा ॥ दाहारो वक्तृतट्छर्दिशूलज्वरसमन्विता ॥९॥ आगंतुजापि
विज्ञेया तस्यैवो दोषसंगता ॥ व्रणात्वं ताश्च गच्छंति पिटका परिपाकतः ॥१०॥ वातजस्तु मुखछि

१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्रैस्राबेदुष्टं च फेनिलं ॥ शत्रपोनकृसंशोय मृष्ट्रग्रीवस्तु पित्तजः ॥११॥ कफोद्भवः परिस्रावी बहुपि
छपरिस्रवेत् ॥ बहिर्गुदं परिक्षिप्य प्राकारपरिखेवयः ॥१२॥ जायते सपरिसेपि वातपित्तसमुद्भ
वः ॥ रिजु गत्वा गुदं पाति रिजुर्वत्र कफोद्भवः ॥१३॥ अर्शो मूलगतः पित्तकफजो दाहशोषकृत् ॥ कं
डूकृत्क्लेदयन्मूलमर्शसां पाक भेदवान् ॥१४॥ श्रवत्यजस्रं बहुशंस्तत्य मर्शो भगंदरः ॥ शंबुकाव
र्तैणाका सं सन्निपातसमुद्भवः ॥१५॥ नानौग्रवेदनो घोरो दुःसाध्यो हि भगंदरः ॥ असम्मा सास्थिका
द्री नां संक्षो भादंतरे च यः ॥१६॥ पक्वो भित्तकृमि भवेद्दीर्येते सक्षतोद्भवः ॥ अभिघातादिसंभूतकं
डूदाहाद्युपद्रवः ॥१७॥ सन्निपातक्षतोद्भूतो हि कोष्ठेषट्भगंदराः ॥ नैवास्यर्थे प्रकुपिता भवेयुः
कृच्छ्रसाधनः ॥१८॥ इति भगंदरनिदानं ॥ अथ भगंदरचिकित्सा ॥ लंघनैर्बहुविधैर्विरेचनैरस
म्मोक्षणैः सततशोधनैरपि ॥ नाधिगच्छति भगंदरो यथा पाकमेव प्रतिमानुपाचरेत् ॥१९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰स॰ गुडीपुनर्नवाच्छिन्नावरपत्रैश्च काकृतः ॥ सुधिष्टपिटकास्नुहीलेपः शस्तो भगंदरे ॥ २० ॥ सु
३५६ शीतलैः स्निग्धैरेंडमधुकैः पयसा युतैः ॥ सरक्ते वेदनायुक्ते लेपः शस्तो भगंदरे ॥ २१ ॥ भिषक्
नाडीं ततस्कुर्यात् व्रणान् सूक्ष्मान्ततोऽनेके ॥ पश्चात्तु स्वरसैः शोध्या नाडी रूपा चरेत् ॥ २२ ॥ उष्ट्री
वा मध्यच्छित्त्वा क्षारं तत्र निपातयेत् ॥ पूतिमांसमपोहार्थं ततः पश्चात्तु चाचरेत् ॥ २३ ॥ शुक्ले स्नि
ग्धे ततो पैत्ते पश्चादेनं प्रलेपयेत् ॥ घृतेन च प्रकुर्वीत बृंहणं स्निग्धसेचनं ॥ २४ ॥ आवे मार्गे समु
च्छिद्य परिश्रावि भगंदरे ॥ आवमार्गं दहेद्वापि तीव्रक्षारेण बुद्धिमान् ॥ २५ ॥ तैलेन च सुखोष्मे
न शोधयेत् कुद्दमंडलं ॥ नाडीमार्गं तु जे वैद्यः शस्त्रेणोत्कृत्य सम्यक्ततः ॥ २६ ॥ अंबोष्टेनाग्निवर्णेन तप्त
या वा शलाकया ॥ तद्दहेच्च व्रणं वैद्यः पश्चाद्भेषजमाचरेत् ॥ २७ ॥ यदि शस्त्रनिपातेन वेदना
स्य प्रजायते ॥ परिषेकस्तु कोष्णेन तैलेनात्र प्रशस्यते ॥ २८ ॥ त्रिवृत्तेजोवती दंती मंजिष्ठा ति

९५

291

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वपत्रकृवः ॥ रसांजनं हरिद्रे द्वे लेपो नाडीव्रणापहः ॥ २९ ॥ दंतीतिलांस्तव तकुष्ठं मागधी म
धुसैंधवं ॥ हरिद्रा त्रिफला तुल्यं सर्वव्रणविशोधनं ॥ ३० ॥ फल्गुहरिद्रा राजवृक्षचूर्णं मध्वाज्यसंयु
तं ॥ वर्त्तिमग्रे निहितं दुष्टव्रणनाशोधनं परं ॥ ३१ ॥ स्रावविनाशाय स्नेहयोगो मेघमिवानिलः ॥
स्नुही अर्क धुदार्वीणां कृत्वा वर्त्तिं भिषग्वरः ॥ ३२ ॥ तथा भगंदरगतिं दृष्ट्वा धीमान्प्रपूरयेत् ॥ ना
डीहन्यादिमं वर्त्तिः सर्वदेहगतामपि ॥ ३३ ॥ निंबपत्र वचा रोध्र निशा कुष्ठ तिला भया ॥ सुरक्तश्वा
गरुधूमेन गणः शस्तो भगंदरे ॥ ३४ ॥ उपदंशे तथा नाडीव्रणे शोधनरोपणः ॥ पिप्पलीकर्ष
मादाय त्रिफलाकर्षकत्रयं ॥ ३५ ॥ गुग्गुलुं पंचकर्षश्च विदध्याद्गुटिकां भिषक् ॥ कुष्ठं भगंदरं ह
न्यात् नाडीदुष्टव्रणं तथा ॥ ३६ ॥ नवकार्षिको गुग्गुलुः ॥ सुवर्चिकां लांगलिकां हरितालं सुधां
वचां ॥ ज्योतिष्मतीं च संगत्य तैलं सम्यक् पचेद्भिषक् ॥ तैलं विष्यंदनं नाम प्रदद्यात्तं भगंदरे ॥

292

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ सं॰ शोधनं रोपणं चैव दुष्टव्रणनिवारणं ॥ ३८ ॥ करवीराग्निकरुणो दंतीलांगलिनी निशा ॥ मातु
१४७ लिंगार्कवासाश्च समाहृत्य तु साधयेत् ॥ ३९ ॥ तैलं भगंदरे शस्तं करवीराद्यमुच्यते ॥ करवीराद्यं
तैलं ॥ उपरूढव्रणो वर्षं नरो मांसं त्यजेन्मैथुनं ॥ ४० ॥ पृष्ठयानं तथा भारं त्यजेच्च गुरूणि च ॥ ४१
इति भगंदरचिकित्सा ॥ अथोपदंशशूकदोषदूषितयोर्निदानं ॥ दोषाधिष्ठितसंकीर्णमलिना
तुरजः पथं ॥ सहसा गच्छतो नारी भगस्यान्नेव सूतिकां ॥ ४२ ॥ अन्ययोनिमनिच्छंति मथवा दूषितं जल
लं ॥ रतांते स्पृशतो मुद्रा स्पृशतो नक्रदाचन ॥ ४३ ॥ लिंगवर्द्धेखपातीक्ष्णलेपादीन्यपिकुर्वतः ॥ विष
वक्षूकनखरमुष्टिदंडादिपाततेः ॥ ४४ ॥ अतिदीर्घखरस्पर्शे घट्टनैर्वेगनिग्रहैः ॥ सेषा गुह्यं गता
कुर्युरुपदंशादिकान्गदान् ॥ ४५ ॥ दोषैर्व्यस्तैः समस्तैश्च सास्रैः पंचोपदंशकाः ॥ लिंगे शोथो
रुजश्चित्राः वायुजे स्तंभमोटनं ॥ ४६ ॥ सज्वरः सपथुः पित्ते पक्वोदुंबरसन्निभं ॥ कंडूमांसीनलः
१५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्निग्धः गुरुः श्लेष्मसमुद्भवः ॥४७॥ क्षतजेनासितः स्फोटाः सज्वरः सास्रविस्रुतः ॥ त्रिदोषे सर्वचि
ह्नं स्याच्छोथः स्यादपि मुष्कयोः ॥४८॥ घोरः स्यात्सुपतनं कृमयश्च विदारणं ॥ मस्कदः सन्निपातोत्थो आ
ष्यो रक्तसमुद्भवः ॥४९॥ साध्यो दोषसमुद्भूत उपदंशाः प्रकीर्तिताः ॥ गुप्तासक्तमांसगे दोषैः कुपि
तैर्मांसकीलपा ॥५०॥ कंडूलाः शोफसा मध्ये बहिर्वापि भवंति च ॥ पिच्छास्रस्रावास्तद्योगो वा
छत्रसंनिभाः ॥५१॥ घ्नंति मेढ्रं वपुस्त्वन्यो योषितां च भगार्त्तवं ॥ लिंगरस्द्धिं यो मूढो मुष्कमेणाभि
कांक्षति ॥५२॥ तस्य रोगाः प्रजायंते दशावाप्येव शूकजाः ॥ पिटका विविधाकार वर्णाश्च विविधा
यथा ॥५३॥ नाम्ना सर्षपिकाद्यास्तालक्ष्मे दोषलक्षणैः ॥ तस्योपदंशनिदानं ॥ अथ चिकित्सा ॥
स्निग्धस्विन्नस्य कुर्वीत लिंगे रक्तविमोक्षणं ॥ पाकं वरक्षेत्प्लात्पाको यं लिंगनाशकः ॥ पाटोल
त्रिफलानिंबगडूची क्वाथकं पिबेत् ॥५५॥ खदिरासनयोर्वापि त्रिवृता परिमिश्रितं ॥ यद्वा

294

ल॰ल॰ गुग्गुलुसंयुक्तमुपदंशानिवृत्तये ॥ ५६ ॥ प्रपौंडरीकसरलागुरुभद्रापुनर्नवा ॥ रास्नामधुककुष्ठ
२५८ चलेपोयंवातसंभवे ॥ ५७ ॥ गैरिकामधुकोशीरमंजिष्ठांजनपद्मकैः ॥ सचंदनोत्पलैः स्निग्धैः कु
र्यात्लेपंचपैत्तिके ॥ ५८ ॥ शालाजकर्णाश्वकर्णौ धन्वान्विश्वकफोद्भवे ॥ कषायैः पंचवल्कोत्थपि
त्तोक्तमुपदंशके ॥ ५९ ॥ प्रक्षालनाय पत्राणि करवीरस्य योजयेत् ॥ आस्फोतारग्वधयोस्तद्वदेवंयंस
र्जयोरपि ॥ ६० ॥ त्रिफलाक्वाथितजलैर्भृंगराजरसेन वा ॥ उपदंशानिवत्सर्वव्रणप्रक्षालनेहितं ॥
६१ ॥ शिरीषककुभंयासंनिंबसप्तच्छदासनं ॥ पलाशंच तथा जातीतथैवोदुंबरकर्णिका ॥ ६२ ॥ तु
ल्यभागंसमादाय क्वाथंकुर्याद्विचक्षणः ॥ तेन प्रक्षालनंकार्यमुपदंशोपशांतये ॥ ६३ ॥ क्वाथेना
नेनतैलंचसाधयेत्तत्रनिक्षिपेत् ॥ धातुकीरोध्रमधुकमंजिष्ठावल्कलंवचा ॥ ६४ ॥ हरिद्रात्रिफला
दार्वीपतंगमदयंतिका ॥ एतच्चूर्णयुतंतैलमभ्यंगाद्व्रणरोहणं ॥ ६५ ॥ रसांजनंगैरिकंचमधुले

१५१

295

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पनकं हितं ॥ लाक्षा द्राक्षा रसः क्षौद्रः लेपः स्याद्व्रणरोपणः ॥ ६६ ॥ महिषीघृतसंयुक्तं कटाहे त्रिफलां
दहेत् ॥ लेपयेदुपदंशस्य तथा संशांतये व्रणं ॥ ६७ ॥ बब्बूलतरुपत्राणां चूर्णं वा दाडिमत्वचः ॥ पुष्पा
धो गुडं नं शस्तं लेपः पूगीफलेन वा ॥ ६८ ॥ मूलेन करवीरस्य पिष्टेन सहवारिणा ॥ लिंगे लिंगे शमं
याति तुः साध्याप्युपदंशारुकं ॥ ६९ ॥ पिष्ट्वा समूलपत्रं तु भृंगराजं रसान्वितं ॥ मेढ्रं प्रलेपयेत्तेन पुरु
षस्याधिशांतये ॥ ७० ॥ कांचनारैः पयः पिष्टैः सहजं वा म्लवेतसैः ॥ अस्फुलकटोपि पुंव्याधिः प्रश
मं याति लेपनात् ॥ ७१ ॥ करंजनिंबककुभशाल्मलं वृक्षकटाहे जे ॥ सिद्धं कल्कैः कषायैश्च घृतं हंत्यु
पदंशार्कं ॥ ७२ ॥ सदाहमतिपाकं च सस्रावं तीव्रवेदनं ॥ करंजाद्यं घृतं ॥ इत्युपदंशचिकित्सा ॥ शु
क्रदोषे हितं प्राक्तं घृतपानं विरेचनं ॥ ७३ ॥ मोक्षणं च सजः शस्तं पथ्यं च लघुभोजनं ॥ लेप्या सर्ष
पिका सूक्ष्मे त्रिफलारोध्रतिंदुकैः ॥ ७४ ॥ अभ्यंजनाय पैतैरेव साध्यं तैलं व णाफहं ॥ तैः प्रलेपाव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लु॰ त्स॰ वमथे पि स्नाव्यं रक्तं तथो भयोः ॥७५॥ अष्ठीलायां हृते रक्ते श्लेष्मग्रंथिवदाचरेत् ॥ कुंभिकायां हृते
१४९ रक्ते व्रणंपक्वं विशोधयेत् ॥७६॥ साध्योलेपस्तथा लेपस्त्रिफलारोध्रतिंदुकैः ॥ अलज्यां च हृते रक्ते त्व
यमेव विधिः स्मृतः ॥७७॥ ग्रंथिते स्वेदयेद्धीमान्नाडीस्वेदविधानतः ॥ उपनाहैः सुखोष्णैश्च सुस्नि
ग्धैरुपनाहयेत् ॥७८॥ पिटकामुत्तमाङ्गस्थां तु संछिद्य विशोधनं ॥ क्षौद्रयुक्तैः कषायाणां चूर्णैः
कल्कैः समाचरेत् ॥७९॥ पुष्करीमूढयोः पित्तविसर्पोक्तो हितो विधिः ॥ बलातैलेन कोष्णेन स्पर्शहा
नौ प्रसेचयेत् ॥८०॥ त्वक्पाके चापि तैलेन मधुरैश्चोपनाहयेत् ॥ रसक्रियां चरेद्धीमान् लेखनैः शतपो
नके ॥८१॥ पृथक्पर्ण्यादिसंसिद्धं तैलं चानंतरं क्षिपेत् ॥ रक्तविद्रधिवत्कुर्यात्क्रमं शोणितजे
र्बुदे ॥८२॥ कल्कैः कषायैर्घृततैलचूर्णै रसक्रियाभिश्च भिषग्वरेश्च ॥ बलाबलं वीक्ष्य निदान
दोषमुपाचरेच्छूकगदानथ पलात् ॥८३॥ मांसपाकं गदमर्बुदं तथा विद्रधीव तिलकालकामयं नआ
१५१

श्चिनेयमततत्त्ववेदिनः कीर्तयंति भिषजामगोचरं ॥ ५४ ॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे भगंदररो
गोपदंशशूकनिदानचिकित्साकथनंनाम षट्चत्वारिंशत्तमोऽध्यायः ॥ ४६ ॥ अथ कुष्ठनिदानमाह
विरुद्धाहारचेष्टाभिः साधुनिंदावधादिकैः ॥ अगम्यागमनान्यस्वहरणाद्यैश्च कर्मभिः ॥ १ ॥ दो
षाः कुप्यंति ते मार्गं शिराणां प्राप्य सत्वरं ॥ दूषयंत्यखिलान्धातून् त्वगासृक्पिशितादि
कान् ॥ २ ॥ कुर्वंति श्लथतां गात्रे त्वचि चाति विवर्णितां ॥ त्वक्शोणितादिसंक्लेदाद्वपुरेव विशीर्य
ते ॥ ३ ॥ कुष्ठं तदष्टदशधा दोषैः पूर्ववदादिशेत् ॥ कापालौदुंबरं दद्रुमंडलं पुंडरीककं ॥ ४ ॥ काक
णा स्यर्क्षजिह्वेषु महाकुष्ठानि सप्त वै ॥ वपुः श्लक्ष्णं खरस्पर्शं दाहः कंडूर्विवर्णता ॥ ५ ॥ स्वेदः
क्लेदोंगसुप्तिश्च तोदः कोठोद्भवस्तथा ॥ व्रणानामुद्भवः शीघ्रं स्वल्पमेवात्र कारणात् ॥ ६ ॥ चिर
स्थितिश्च रोमांचः कंडूः प्राग्रूपलक्षणं ॥ श्यामारुणं कपालाभं खरं रूक्षं समुत्थितं ॥ ७ ॥ तोद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०सा०
१५०

रोमांचकंडूमत्तकपालं शीघ्रसर्पि च ॥ औदुंबरं ताम्रवर्णं त्वग्रोमगौरशिरान्वितं ॥ ८ ॥ पक्वो
दुंबरसंकाशं व्रणं स्यात् कृमिरक्तवान् ॥ मंडलाख्यं स्थिरं स्त्यानं पेउं कंडुकमिश्रितः ॥ ९ ॥ श्लक्ष्णं
पीताभपर्यंतं मंडलं परिकीर्तितं ॥ श्यावासं कंडू पिटिकालसीकाव्याविचर्चिका ॥ १० ॥ सतोददाहरुक्
दं श्यावं वर्णं च कर्कशं ॥ पित्तके रिक्षजिह्वाभेदुतं स्यादृक्षजिह्वकं ॥ ११ ॥ कठिनं मखरस्पर्शं कुष्ठं स्या
च्चर्मकाभिधं ॥ मत्स्यशल्कवदुनिभं स्वेदहीनं किटिभमुच्यते ॥ १२ ॥ सिध्माख्यं तु खरस्पर्शं रूक्षं कंडूलका
सितं ॥ बहिस्निग्धनखे घर्षादंतः किरतियद्रजः ॥ १३ ॥ मृदुस्पर्शारूणाश्वेतरक्तकंडूलगंडुकं ॥ तत्
स्याद्दलमकं कुष्ठं प्रायेणोर्ध्वशरीरगं ॥ १४ ॥ दारुणा स्याद्योपाण्यो कंडूला निर्विपादिकं ॥ अतसीपु
ष्पसंकाशं कंडूरं छिन्नमंडलं ॥ १५ ॥ दीर्घप्रतानादूर्वावद्दद्रुः सा परिकीर्तिता ॥ श्यावारक्तं सदाहा
र्तिस्थूलमूलं समुन्नतं ॥ १६ ॥ शतारुषं स्केदकरं प्राय्यः स्यात्सर्वसंभवं ॥ शोणितं तेषु पाण्डाभं मध्ये
१

2.91

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दाहभ्रमथायुतं ॥१७॥ कंडूसेथयुतं रक्तं श्वित्रं तप्रभमिवाभ्रमिः ॥ घनभूरिलसीकास्रकूप्रायं स्यात् सुंदरी
ककं ॥१८॥ विस्फोटदाहस्फोटैः स्फोटैः तनुत्वगभिश्वित्रं भवेत् ॥ सूक्ष्मश्यावारुणानेकपिटकारुक्समन्वि
ता ॥१९॥ सकंडूकेरषामाख्यपायः स्युक्पाणिकूर्परे ॥ अस्पर्शक्षम विस्फोटं दाहकंडूभ्रमतोदवत् ॥
२०॥ कुष्टं रक्तदलं चर्मदलमित्यभ्यते बुधैः ॥ पूर्वरक्तं ततः कृष्णं तीव्रदाहं तु काकणं ॥२१॥ कुष्टलिंगैर्यु
तं सर्वैरनेकाकारवर्णवत् रूक्षारुणं भवेद्दातास्त्रिंपित्तोद्भवं पुनः ॥२२॥ ताम्रकमलपत्राभं परिताप
समन्वितं ॥ कफोद्भवं सकंडूकं घनस्तितसगौरवं ॥ कुष्टे त्वचि स्थिते तोदो वैवर्ण्यं रूक्षता भवेत् ॥ भवेयुरक्त
गे कुष्टे स्वेदशोफप्रवर्तयः ॥२४॥ स्फोटास्युः पाणिपादेषु क्लेदसंधिषु मांसगे ॥ मेदोगते विशीर्णत्वव्यंगा
नां विगतिक्षयः ॥२५॥ स्वरक्षयोस्थिमज्जास्थे नासाभंगोदृशो रुजः ॥ क्षतेषु क्रमयो सर्वं कुष्टे भवति
लक्षणं ॥२६॥ शुक्रस्थे सर्वं पूर्वोक्तलक्षणाधिक्यसंभवः ॥ दारापत्यानुसंचारः कुष्टमाधि प्रजायते ॥२७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०सं० त्रिदोषोत्थमसाध्यं स्यात् शुक्रमज्जास्थिगं तथा ॥ मेदोगतं तु याप्यं स्यात् कृच्छ्रसाध्यं तु तद्भवेत् ॥ २८ ॥ य
१५१ द्रसंग्मासगं कुष्ठं पित्तद्वंद्वसमाचरेत् ॥ साध्यं कफानलोद्भूतमेकदोषबलस्थितं ॥ २९ ॥ असंश्लिष्टमिथश्श्वि
त्रमशुक्लीकृतमेव च ॥ अनग्निदग्धकं साध्यमसाध्यं स्यादतोऽन्यथा ॥ ३० ॥ गुह्यपाणितलोष्ठेषु जातमप्य
चिरंतरं ॥ असाध्यं कथितं श्वित्रमन्यत्रापि विरोद्भवं ॥ ३१ ॥ कुष्ठाधिकेन दंपत्योर्दुष्टशोणितशुक्रयोः ॥
कुष्ठव्याधिरपत्यानामपि संजायते तयोः ॥ ३२ ॥ श्वासांगस्पर्शवस्त्रादिसेवनात्सहभोजनात् ॥ रो
गाः संचारिणः सर्वे संक्रमंति नरान्नरं ॥ क्षयः कुष्ठमपस्मारो नेत्ररोगो मसूरिका ॥ त्वग्विकारास्थिताः
सर्वे रोगाः संचारिणः स्मृताः ॥ ३३ ॥ इति कुष्ठनिदानं ॥ अथ कुष्ठचिकित्सा ॥ वाताधिके कफे घृतं पेयं
वांतिः कार्या कफोत्तरे ॥ कुष्ठे विरेचनं श्रेष्ठमसृग्मोक्षश्च पित्तजे ॥ ३४ ॥ कुष्ठे मांसे स्थिरा मोक्षं प्रतिमा
से विरेचनं ॥ प्रतिपक्षं च वमनं कुष्ठेन स्यान्महाद्भुतं ॥ ३५ ॥ वचानिंबपटोलानां वासायाः फलिनीत्व

१५

301

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

।।श्री।।

।। कृत्वाकज्जलिकांरगोमनसिताद्वेजीरकेद्वे
निशेगोदंतोषणनागरंडुगजयावाकूचिका
सर्पिषा।। लोहंलोहविमर्दितंचसकलंमाहेश्व
रास्वंघतंदद्युकुंडुकिव विकाचहरणंपामापहंले
पनांत ।।१।। अथसर्वेश्वररसपाकः।। पारदंगंधकंशुं
ठुंमवक्षारंसुटंकणं।। सज्जीक्षारंसमंचैवषड्गुणामरि
चानितु।। नरदईवत्सनागंचगुंजामात्रावटीकृता।। आर्द्र
केनरसंबध्वाशीतज्वरहरंपरं।। ऐकाहिकंद्विदिनंचत्रि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिनंचचतुर्थकं॥ एतत्सर्वेश्वरंनामभिषक्दृष्टीप्रय
त्नतः॥ ५१॥
त्रिघंरंकणसेधवंसुमंडौरदरदं मात्रासमंचित्रकं
शुठीद्वादशभागकंसमस्त्विंनिबूरसंमर्दयेत्॥ हंती
शूलविषूचिकांमगहणीकासंवश्वासंजयेत्॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वः ॥ मदनः क्षौद्रसंयुक्तं कषायं वमने पिबेत् ॥ ३६ ॥ कषायः पंचकः ॥ खदिरारिष्टकुटजत्रिफलाभिः
स तपमः ॥ वमनार्थे पिबेत्कुष्टे सर्वदोषोद्भवे पिब ॥ ३७ ॥ कुष्टे विरेचनं शस्तं त्रिवृत्फलत्रिकैः समं ॥ क
लिंगमुस्तत्रिफलाकरंजैर्दार्वीसिसप्तछदकर्णिकारैः ॥ सिद्धः कषायो मदनान्वितः स्यात्स्नानाय युक्तो
स्तो वमनाय चोक्तः ॥ ३८ सर्वाणि कुष्टानि च पांडुरोगं निहंति रोगांस्त्वचि संस्थितांश्च ॥ शोफं च हन्यात्
कुरुते मनोज्ञं वर्णं त्वचि संततसेवनेन ॥ ३९ ॥ खदिरारिष्टदार्वीचिकाथं कुष्टी सदा पिबेत् ॥ सगुडं मोषतु
ल्यांशं पथ्या वा संप्रयोजयेत् ॥ ४० ॥ निंबदार्वीहरिद्राख्या खदिरामरदारुभिः ॥ सिद्धः क्वाथो हरेत्कुष्टं सक्षौ
द्रो वा घृतान्वितः ॥ ४१ ॥ निंबपथ्याकषायं दारुहरिद्रोशीरचंदनं ॥ सहपभक्षितं कुष्टे सदाहे स्नानपानयोः
४२ ॥ तिलतुल्यं तु पः खादेद्द्राक्षा कुविंप्रति वासरं ॥ संवत्सरेण मुच्येत प्रौढकुष्ठामयान्नरः ॥ ४३ ॥ भल्ला
तकाग्निकयवबाकुचीरोहितैः कृतं ॥ सर्वकुष्टविनाशाय पथ्याक्षीं भक्षयेन्नरः ॥ ४४ ॥ मंजिष्ठाकर्णि

304

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु॰सं॰ कारकमुस्तवीजकफल्गुकं ॥ भार्गीकुटुकभूनिंबपर्षपर्णीविबाकुची ॥ ५५ ॥ द्वेहरिद्रे महानिंब गडूची
१५२ निंबकारिका ॥ मंजिष्ठागदारुखदिरपाठादंतीचचित्रकं ॥ ५६ ॥ त्रिफलापर्पटमोषत्रायमाणविडंगकं ॥
मोरटाचक्रबीजानि परोलीबहतीवचा ॥ ५७ ॥ निंबकल्कंचकुटजफलिनीचंदनद्वयं ॥ हपुषाशुकवस्स
श्चभृंगराजंचपद्मकं ॥ ५८ ॥ श्रृंगीलवकुष्ठसवस्सस्पगर्धभांडचमर्कटी ॥ धपत्रंचखधिरशिमसारवोटि
तेतथा ॥ ५९ ॥ एतैः सर्वैः समैः सिद्धंकषायंयेनरःपिबेत् ॥ युक्तंगोमूत्रपादांशं सर्वैःकुष्ठैर्विमुच्यते ॥
६० ॥ कंडुविसर्पकंदद्रुनाडीगृध्रीक्रिमीनपि ॥ पामाप्रमेहद्रुःसाध्यवातरक्तंचनाशयेत् ॥ ६१ ॥ कापा
लोदुंबरंसिध्मंकिटिभंकाकणादिकं ॥ अस्मंग्रस्फुटितंपूतिगंधिनाशादिनाशकं ॥ ६२ ॥ शीर्णकृतवपुःस
र्वंकुष्ठंहन्त्येषपानतः ॥ सततान्भ्यासतःकुर्याद्वपुःपंचशरोपमं ॥ ६३ ॥ पूर्णचंद्रनिभंवक्त्रंकामिनीजन
मोहनं सर्वकुष्ठगदोन्मत्तदंतिध्वंसनकेसरी ॥ ६४ ॥ प्रोक्तोमहाकषायोयंमंत्रिणापरमर्षिणा ॥ इति ॥

९

305

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सर्वकुष्ठहरो मंजिष्ठमहाकषायः॥ प्रस्थत्रयं तु त्रिफलाप्रस्थमेकं गडूचिका॥५६॥ क्षिप्त्वाद्यं लोहपा
त्रे सार्द्धद्रोणजले पचेत्॥ जलमर्द्धश्रितं शीतलागपहीयाद्वस्त्रगालितं॥५७॥ वनसंजातमहिषनेत्रोदर
निभं नयेत्॥ गुग्गुलुः प्रस्थमेकं तु तस्मिन्क्वाथे विनिक्षिपेत्॥५८॥ लोहपात्रे पचेद्दर्व्या चालयेच्च मुहु
र्मुहुः॥ घनीभूतं तु संबुध्वा गुडपाकोपमं तथा॥५९॥ चूर्णयित्वा ततस्तस्मिन्द्रव्याणीमानि निक्षिपे
त्॥ शीते तस्मिन्त्रिकटुकं षडक्षपरिमाणकं॥६०॥ शिवाबिभीतकंधात्रीलेकद्वित्रिपलैर्मितं॥ कर्षक
र्षितं वद्व्सोपलमेकं गडूचिका॥६१॥ विडंगार्द्धपलं चैव दार्व्याभिभूय: मुवालयेत्॥ स्थापयेत्तत आदाय गो
घृते स्निग्धभाजने॥६२॥ ज्ञात्वाग्निबलं खादेच्छाणैकं वा ततोधिकं॥ अनुपाने प्रयोक्तव्यं कोष्णनी
रं पयोपिबा॥६३॥ मंजिष्ठादिकषायं वा मूषमुस्ताथवा पिबेत्॥ हन्यात्कुष्ठानि सर्वाणि वातरक्तं
त्रिदोषजं॥६४॥ गुल्मान्सर्वान्व्रणान्श्चैव पांडुमेदोदराणि च॥ कासाग्निमंदताशोफान्हन्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु०स०१
१५२

च्चपिटकामयान्॥६५॥ एषकैशोरको नाम गुग्गुलुः सर्वकुष्ठहा॥ सतताभ्यासतः कुर्यात् वपुः कैशोर
काकृतिः॥६६॥ इति कैशोरगुग्गुलुः॥ बाकुचीकुटजनिंबचित्रकैस्त्रिफलानितु वचाविडंगकैः॥ कल्कि
तः सखदिरैर्विनाशयेत् क्वाथ एष बकुकुष्ठं संचपान्॥६७॥ इति बाकुच्यादिकषायः॥ भल्लातकसहस्रे
कं त्रिफलावारिणि निःक्षिपेत्॥ द्रोणमात्रे पचेत्तावद्यावत्सादावशिष्यते॥६८॥ शर्करायाद्दशपलान्येकवा
कुचिकापलं॥ तथैवात्र प्रदेयानि पलानि दशगुग्गुलुः॥६९॥ खदिरारिष्टमंजिष्ठं बीजकं चेंद्रवारुणी॥ चित्र
कं हरिद्रे द्वे देवदारु हरीतकी॥७०॥ भार्गीवचेत्रिसर्वं षांप्रत्येकं च पलार्द्धकं॥ प्रक्षिप्य गुटिका कार्या ना
म्ना सर्वांगसुंदरी॥७१॥ प्रसहं भक्षयेद्रोगी एषां बहुमात्रया॥ सर्वानेव गरकुष्ठानि शीघ्रमेव विना
शयेत्॥७२॥ इति सर्वांगसुंदरीगुटि॥ मूलं दलं फलं पुष्पं त्वचं निंबात्समाहरेत्॥ कृत्वा सूक्ष्ममिदं चू
र्णं पलं पंचदशान्वितं॥७३॥ लोहचूर्णं तथा पथ्यां चित्रकं चक्रमर्दकं॥ भल्लातकं विडंगानि पिप्प २

307

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ली मरिचं निशा ॥ ७४ ॥ शर्करामलकं शुंठी बाकुचीकृतमालकः ॥ गोक्षुरश्च पलोन्मानमेकैकं कारये
द्बुधः ॥ ७५ ॥ सर्वमेकीकृतं चूर्णं भृंगराजेन भावयेत् ॥ अष्टभागावशेषेण खदिरासनवारिणा ॥ ७६ ॥
भावयित्वा पुनः शुष्कं कर्षमात्रं ततः पिबेत् ॥ खदिरस्य कषायेन घृतेन पयसाथवा ॥ ७७ ॥ मासमात्रे
ण कुष्ठानि हंति सर्वाण्यसंशयः ॥ पंचनिंबमिदं ख्यातं चूर्णं कुष्ठगदापहं ॥ ७८ ॥ इति पंचनिंबचूर्णं
अमृताक्वाथकल्काभ्यां सक्षीरं विपचेत् घृतं ॥ पाठामुस्तमुशीरं च त्रिफला पर्पटास्तथा ॥ ७९ ॥ पटोल
निंबमंजिष्ठा पिप्पलीपद्मकेसरी ॥ चंदनेंद्रयवासश्च विशालाद्विनिशे तथा ॥ ८० ॥ गुडूचीसारिवे द्वे च मू
र्वारास्नाशतावरी ॥ त्रायंती द्रयवायष्टी भूनिंब चाक्षभागिका ॥ ८१ ॥ घृतं चतुर्गुणं तेभ्यः धता
द्यामलकीरसः ॥ द्विगुणः सर्पिषश्चात्र जलमष्टगुणं भवेत् ॥ ८२ ॥ तत्सिद्धं पाययेत्सर्पिः वातरक्ते
षु सर्वशः ॥ कुष्ठानि रक्तपित्तं च रक्तार्शांसि च पांडुतां ॥ ८३ ॥ हृद्रोगं गुल्मवीसर्पमंडलं गंडमा

308

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र० वि०
१५८

लिकं ॥ क्षुद्ररोगान् ज्वरं चैव महातिक्तमिदं जयेत् ॥ ८४ ॥ इति महातिक्तकं घृतं ॥ मरिचं हरितालं च
मुस्तकं रक्तचंदनं ॥ मनःशिलां हरिद्रे द्वे त्रिवृतं देवदारु च ॥ ८५ ॥ कुष्ठं मांसी विशालां च करवीरं रवेः पयः
गोमयस्य रसं दद्यात् कर्षमात्रं पृथक् पृथक् ॥ ८६ ॥ विषमर्द्धपलं तैलं प्रस्थं सर्षपसंभवं ॥ प्रस्थं द्वयं च
गोमूत्रं तोयं तावच्च निःक्षिपेत् ॥ ८७ ॥ साधयेत्तैलमभ्यंगात् सर्वकुष्ठविनाशनं ॥ मरीचाद्यमिदं श्वित्र
पुंडरीकविचर्चिका ॥ ८८ ॥ पामाक्षिध्मकदद्रूश्च कंडूं चैव विनाशयेत् ॥ इति मरिचाद्यं तैलं ॥ अथ पंचाननो
रसः ॥ शुद्धसूतं समं गंधं चित्रकं मुस्तकं विषं ॥ ८९ ॥ त्रिफलां च त्रिकटुकं तुल्यान्येतानि कल्पयेत् ॥ म
र्दयेन्मार्कवरसैर्याममात्रं दिनत्रयं ॥ ९० ॥ रसपंचाननो नाम रोगादंति निवारणः ॥ क्षयरोगं प्रमेहं च
कुष्ठं चाष्टादशैव च ॥ ९१ ॥ गुल्मप्लीहोदरार्शांसि शिरोरोगांश्च नाशयेत् ॥ भक्षयेद्रक्तिकामात्रं यथा
साम्यं च बुद्धिमान् ॥ ९२ ॥ इति पंचाननो रसः ॥ अथ महातालेश्वरो रसः ॥ शुद्धं तालकसूतमाक्षि

१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कशिलासिंधूत्थकं टंकणं तालं गंधकं तुल्यमेव च मर्दितं जंबीरजैर्द्रवैर्दिने तु ॥ नीरैः पंचदिनादि भूधर
पुटैः षड्भिः पचेत्सर्वं दद्यात् प्रसेकैकपुटं कृतं वसकलं मानेन तत्षट्पलं ॥ तालं मृतं ताम्रं तत्पलद्वयमितं
देयं रजो लोहजं मतालाद्वा द्विगुणं विमर्द्य च पुनर्जंबीरकाम्लद्रवैः ॥ एकाहं च ततः पचेल्लघुपुटे तत्स्त्रिं
शदंशविषं क्षिप्त्वा चूर्णितं मर्दशाणकमितं मिश्रं घृतैर्माहिषैः ॥ ९४ ॥ खादेच्चानुलिहेत् घृतेन मधुना
वा निम्बत्रिफलावाकुचिकाबीजकषायकं प्रमितं जयेत्संततं मष्टादशापि ध्रुवं ॥ कुष्ठान्येषु महाबलान्यपि महा
तालेश्वरोऽयं रसः ॥ ९५ ॥ इति महातालेश्वरो रसः ॥ गुंजाफलोद्भवं चूर्णं लेपनात् श्वित्रकुष्ठनुत् ॥ शि
लापामार्गभस्मापि लेप्या श्वित्रं व्यपोहति ॥ ९६ ॥ एलाकुष्ठविडंगानि शताह्वा चित्रकं बला ॥ दंतीरसां
जनं चेति लेपः कुष्ठविनाशनः ॥ ९७ ॥ दूर्वाभयासैंधवचक्रमर्दकुठेरकाः कांजिकतक्रपिष्टाः ॥
त्रिभिः प्रलेपैः परिबद्धमूलां कंडूं च दद्रूंच विनाशयंति ॥ ९८ ॥ गोमूत्रवारि संपिष्टैः शिलातालं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स०
१५५

कल्लुत्थैकैः॥ लेपः कीरकवीसर्पकुष्टनाशाय पूजितः॥ ९९॥ आरग्वधस्य पत्राणि आरनालेन पेष
येत्॥ दद्रूकिटिभकुष्टानि हंति सिध्मानमेव च॥ १००॥ स्त्रैणेयत्तु निशा दूर्वा सप्तवारान्प्रलेपनात्॥ ध
त्तूररस पिष्टस्तकंडूरकसनाशनः॥ १०१॥ धात्रीखदिरयोः क्वाथं पीतावल्गुजसंयुतं॥ शंखेंदुर्धवलं
श्वित्रं चूर्णं हंति न संशयः॥ १०२॥ मथितेन पिबेच्चूर्णं काकोदुंबरवल्गुजं॥ तैलाक्रोधमसेवी स्यान्नरं
क्राशी श्वित्रमुद्धरेत्॥ १०३॥ अम्लं विदाहलवणम अर्णं शयनं दिवा॥ मापामं मैथुनं क्रोधं त्यजेद्गुडम
गुरूपि च॥ १०४॥ विरुद्धाहारमाषाणां मांसमत्स्यादिभोजनं॥ मनःक्लेशखरस्पर्शकुष्टरोगी वि
वर्जयेत्॥ १०५॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे अष्टादशकुष्टकथनं नाम सप्तचत्वारिंशत्तमोध्यायः॥
४७॥ अथ शीतपित्तदर्दुरकोष्ठानां निदानं चिकित्सां माह॥ हिममारुतसंस्पर्शाद्दोषौ दुष्टौ कफानिलौ
संगम्य सह पित्तेन सर्पतोंतस्तथा बहिः॥ १॥ हृल्लासश्चारविसृष्मादेहसादांगगौरवं॥ नेत्रारुण

१५

311

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च्छु विस्तेषां पूर्वरूपमिदं भवेत् ॥ २ ॥ बहिः संजायते शोथो वरटीदंशसंस्थितिः ॥ कंडू दाह ज्वर छर्दिः
तोदपीडाकरश्च यः ॥ ३ ॥ उदर्दमिति तं प्राहुः शीतपित्तमितीतरे ॥ अभ्यंगसार्षपैस्तैलैस्ततः कोष्णां
बुषेचनं ॥ ४ ॥ वातिः कार्यश्च तत्राशु क्वाथैर्निंबपटोलजैः ॥ पथ्याभाशीनुयः स्वादिस्त्रिव्फलीगुडसं
युतः ॥ ५ ॥ तस्योदर्दा विनश्यंति सप्ताहादेव चोल्बणः ॥ हरिद्रातिलसंयुक्तैः प्रपुन्नाटकसर्षपैः ॥ ६ ॥
उदर्दे कटुतैलेन सिक्ते रूक्षर्त्तनं चरेत् ॥ लेपो दूर्वाहरिद्राभ्यां पामाकंडूनिवारणः ॥ ७ ॥ शीतपित्तहरः प्रो
क्तः कृमिदद्रुविनाशनः ॥ धात्रीनिंबदलोपेतामुपयुञ्ज्याघृतान्वितां ॥ ८ ॥ शीतपित्तकृतान्हन्यात
कंडूकोठविसर्पिकान् ॥ सैंधवक्षारतैलैर्यः स्निग्धैरभ्यंगमाचरेत् ॥ ९ ॥ तस्य कोठा विनश्यंति शीत
पित्तं च दारुणं ॥ एलादिको गणस्तैलयुक्त उद्वर्त्तने हितः ॥ १० ॥ शीतं लघु च यद्रूक्षमन्नपानं च भोज
ने ॥ हितं प्रोक्तं तथोत्साहः शीतपित्ते तथा हितः ॥ ११ ॥ इति शीतपित्तोदर्दकोठचिकित्सा ॥ अथा

312

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०सं० म्लपित्तनिदानं॥ स्वहेतुपचितं पूर्वं पित्तं दुष्टं विदाहिभिः॥ विरुद्धाम्लान्नपानाद्यैर्विदग्धं त्वम्लतां
१५६ व्रजेत्॥१२॥ तदम्लपित्तमित्याहुरेतेके पड्वोदयं॥ तिक्ताम्लोद्गारहृत्कंठदाहोत्क्लेशांगगौरवैः॥१३॥ क्ले
मा विपाकारुचिभिरम्लपित्तं परिलक्षयेत्॥ वातोत्थं वातकफजं तथैव कफसंभवं॥१४॥ दोषचिन्हैस्तत
द्बुध्वा चिकित्सां भिषगाचरेत्॥ यन्नसाध्यं नवोत्पन्नमम्लपित्तं विदुर्बुधाः॥१५॥ जाप्यं चिरोत्थितं प्राहुः
कृच्छ्रसाध्यं च कस्यचित्॥ अथ चिकित्सा॥ ज्वरमुक्तमिवात्मानं बुद्ध्वा वेदम्लपित्तवान्॥१६॥ तस्य सं
शोधनं पूर्वं कार्यं पश्चाच्च भेषजं॥ पूर्वं तु वमनं कुर्यात् पश्चाभनु मृदु विरेचनं॥१७॥ कृतवांतिवि
रेकस्य सुस्निग्धस्याप्युवासनं॥ आस्थापनं चिरोत्थेस्मिन् देयं दोषाद्यपेक्षया॥१८॥ दोषसंसर्गजे
कार्यं भेषजाहारकल्पनं॥ ऊर्द्धं देहस्थितं वांत्याप्यधस्थं रेचनैर्हरेत्॥१९॥ पाचनं तिक्तबहुलं प
थ्यं च परिकल्पयेत्॥ विकाराम्यवगो धूमकृतांस्तीक्ष्णविवर्जितान्॥२०॥ भक्षयेच्चाजसक्तूंश्च

१'

313

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सिक्षौद्रयुतं पिबेत्॥ त्वग्विहीनयवैर्वासाधात्रीभिः क्वथितं पयः॥२१॥ त्रिसुगंधिमधूपेतमम्ल
पित्तं व्यपोहति॥ अम्लपित्तिनरः खादेद्द्राक्षापेतां हरीतकीं॥२२॥ सगुडां वा पिबेत्क्षौद्रं कटुकां वा सिता
न्वितां॥ पटोलत्रिफलानिंबक्वाथं क्षौद्रयुतं पिबेत्॥२३॥ अम्लपित्तज्वरच्छर्दिदाहशूलं कफान्वितः
कं दारिकामलतावासाकषायं मधुसंयुतं॥२४॥ अम्लपित्तं जयेच्छीताश्वासकासं वमिज्वरं॥ प्रस्थघ
तं पयः प्रस्थं क्षीरं दद्याच्चतुर्गुणं॥२५॥ मूलकल्कं शतावर्याः पचेन्मंदाग्निना बुधाः॥ अम्लपित्तह
रेदेतद्वातपित्तामयानपि॥२६॥ रक्तपित्तं च संतापं श्वासं मूर्छां तृषामपि॥ इति शतावरीघृतं॥ त्रिकु
ली हृतकूष्मांडखंडात्स्वल्पशतं पचेत्॥२७॥ प्रक्षिप्य हि तुलं नीरं आर्द्रस्विन्नांस्ततो नयेत्॥ तानि कूष्मां
डखंडानि दृढवस्त्रेण पीडयेत्॥२८॥ घर्मे संशोषयेत्किंचित्तान् शूले बहुधा व्यधेत्॥ क्षिप्त्वा ता
म्रकटाहे तु दद्यादष्टपलं घृतं॥२९॥ भर्जयित्वा घृते किंचित् पूर्वोक्तं तज्जलं क्षिपेत्॥ खंडं तु पलश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० तं दद्यात् सर्वमेकत्र संपचेत् ॥ ३०॥ पक्वे स्मिन् पिप्पलीशुंठीजीरकं द्विपलं पृथक् ॥ धान्यकाद्दै पलं चा
१५७ त्रपत्रैलामरिचत्वचां ॥ ३१॥ प्रत्येकैकं पलार्द्धं च घृतार्द्धं च माक्षिकं ॥ प्रक्षिप्य चालयेद् दत्त्वा विद्वानेवं तु
साधयेत् ॥ ३२॥ स्वादेदग्निबलं वीक्ष्य रक्तपित्ती क्षयी ज्वरी ॥ शोषतृष्णायुत छर्दिकासश्वासः क्षतातु
रः ॥ ३३॥ कूष्मांडकावलेहोयं प्रशस्तो बालवृद्धयोः ॥ इति कूष्मांडावलेहः ॥ कुर्यात् कूष्मांडविधिना खं
डामलकसाधनं ॥ ३४॥ इति खंडामलकं ॥ शुद्धसूतं च गंधं च [illegible]तं ताम्राभ्ररोचनं ॥ तुल्यांशं मर्द्दयेद्धा
मं रुह्या लघुपुटे पचेत् ॥ ३५॥ अक्षं धात्री तथा पथ्यां भागवृद्धि [illegible] विपाचयेत् ॥ जले रष्टगुणे ग्राह्यं जल
मष्टावशेषितं ॥ ३६॥ तेनैव भावयेत् सूर्वं तच्च सर्वं पुनः पुनः ॥ पंचविंशतिवाराश्च पश्चान्मार्कव
भ्रैर्द्रवैः ॥ ३७॥ भावयेच्छुष्कचूर्णं तत् भक्षयेत्स्वं च गुंजकं ॥ घृतक्षौद्रयुतं तेन विहन्यादम्लपित्तकं
३८॥ रसो लीलाविलासोयं प्रोक्तः सर्वरसोत्तमः ॥ इति लीलाविलासो रसः ॥ अम्लं विदाहि
१८

315

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कटुकमुष्मपिष्टान्नपित्तले॥ वर्षमेकं तदर्धं वा प्यम्लपित्तान्वितस्त्यजेत्॥ २९॥ इतिश्रीलक्ष्म
णोत्सवेग्रंथेशीतपित्तोदर्दकोठाम्लपित्तकथनंनामाष्टचत्वारिंशत्तमोध्यासः॥ ४८॥ अथविसर्प
रोगस्यनिदानं॥ चिकित्सामाह॥ कट्वम्ललवणोष्णाद्यैर्नीयंतेकुपितैर्मलैः॥ विसर्पः सप्तधाज्ञेयः
सर्वतः परिसर्पणात्॥ १॥ एकैकयुग्ममिलितैर्वातपित्तैः कफैर्भवेत्॥ अग्न्याख्योवातपित्तोथोग्र
न्थाख्यः कफपित्तजः॥ २॥ पित्तश्लेष्मसमुद्भूतोयः सकर्दमकः स्मृतः॥ सिध्यंत्येकैकदोषोत्थावि
सर्पाः सर्वसंभवाः॥ ३॥ नसिध्यंतिकृतः पित्तान् -- श्यामोनसिध्यति॥ इतिनिदानं॥ अथचि
कित्सा॥ विरेकवमनालेपरसस्रग्मोक्षैरुपाचरेत्॥ प्रविभज्ययथादोषं विसर्पान्विदाहिभिः॥ कु
ष्ठधात्रीकवाहीशताह्वासुरदारुच॥ ५॥ मुस्तातगलवंशाकं कृष्णगंधः प्रयोजयेत्॥ घृतंच
सेचनेलेपेविसर्पमियशांतये॥ ६॥ न्यग्रोधोदुंबराश्वत्थप्लक्षवेतसवल्कलैः॥ प्रसेकः परिषे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० कुष्ठविसर्प्पार्त्तिहरः परः ॥७॥ चंदनोशीरमधुकपद्मकैर्वा प्रशस्यते ॥ प्रसेकः परिषेकश्च
१५८ विसर्पार्त्तिविनाशनः ॥८॥ विसर्प्पेपि तजे आनाकदंबाशंखशैवलं ॥ शुक्तिर्वा गैरिकं सास्यं गु
ड्रामूलेन शस्यते ॥९॥ गुंड्रा वंटकुशारं भागर्भश्चैव मृणालकं ॥ शतावर्याघृतोपेतैरेभिर्लेपः सु
खावहः ॥१०॥ शिरीषमासीरजनीद्वयेलामृष्टीनतेश्चंदनबालुकुष्टैः ॥ साज्यो विलेपः कथितो
दशांगो विसर्प्पकुष्टव्रणशोफहारि ॥११॥ इति दशांगः ॥ सेकलेपनयोर्जंबूशिरीषोदुंबरो हि
तः ॥ श्लेष्मांतकत्वचो लेपो विसर्प्पः श्रुतिनाशनः ॥१२॥ पटोलनिंबपत्रत्वग्गडूची खदिरा द्
— सिद्धमेभिर्घृतं हंति विसर्प्पाकुष्टगुल्मकं ॥१३॥ वासापटोलत्रिफलागडूची समसैद्धार्दिष्टज
कल्के सिद्धं ॥ त्रिदोषविस्फोटविसर्पकंडूस्तसंचातिकं घृतमाशुहंति ॥१४॥ हरेणुकावामुसूराश्च मु
द्गाश्चैव सुशालयः ॥ पृथक्पृथक्प्रदेयोश्च सर्वे वा सर्पिषा सह ॥१५॥ मसूरैः खंडितेर्मुद्गैश्च

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाके: समकुष्टकैः॥ येवेश्म निस्रुखे स्तद्धस्ते पीते सर्पनाशनः॥ १६॥ मुस्तारिष्टपटोलानां क्वाथं स
र्वविसर्पनुत्॥ धात्रीपटोलमुद्गानामथवा घृतसंयुतः॥ १७॥ अमृतवृषपटोलं निंबकल्कैरूपेत्रिफ
लखदिरसारं साधितं सर्वतुल्यं॥ क्वथितमिदमशेषं गुग्गुलोर्भागमुक्तं जयति विषविसर्पंकुष्टमष्टादशा
ख्यं॥ १८॥ इत्यमृतादि॥ अमृतवृषपटोलं मुस्तकं सप्तपर्णं खदिरमसितवेत्रं निंबपत्रे हरिद्रे॥ विषविवि
धविसर्पान् कुष्ठविस्फोटकंडूनूरपनयति मसूरीशीतपित्तज्वरं च॥ १९॥ लवणं दधि घर्मं च तैलं क्रोधं तथा
सवं॥ मासमेकं त्यजेन्मर्त्यो मुक्तो वीसर्पकैरपि॥ २०॥ इति लक्ष्मणोत्सवे ग्रंथे विसर्परोगनिदानं चिकि
त्साकथनं नामैकोनपंचाशत्तमोऽध्यायः॥ ४९॥ अथ विस्फोटकनिदानं चिकित्सा॥ रूक्षातिकटुतीक्ष्णोष्म
क्षाराजीर्णविदाहिभिः॥ क्रुद्धा दोषास्त्वसृग्मांसादीनि संदूष्य कुर्वते॥ १॥ अग्निदग्धनिभान् घोरान् स्फो
टान् ज्वरपुरःसरान्॥ क्वचिद्वा सर्वदेहे वा भवेद्धि स्फोटकामयाः॥ २॥ इति निदानं॥ अथ चिकित्सा॥ भ्

318

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ स॰ त्रिंबानिंबपृथ्वाद्रुमुस्तवासापटोलकं ॥ पर्प्पटत्रिफलोशीरकुटजंचसमांशकं ॥ ३ ॥ द्वादशांगमिदंप्रो
१५९ क्तंसर्वविस्फोटनाशनं ॥ पटोलवासकारिष्टामृताभूनिंबपर्प्पटैः ॥ ४ ॥ खदिरोद्यैःकृतक्वाथोविस्फो
टज्वरनाशनः ॥ हिंस्राशारसरीषैर्यःसनागाकैर्विलेपनं ॥ ५ ॥ तद्विसर्प्पान्सविस्फोटानाशीघ्रमेवविनाशयेत् ॥ चंदनंसारिवानागपुष्पंजातीघनःस्वनः ॥ ६ ॥ शिरीषवल्कलंचेतिलेपोविस्फोटदाहहृत्
तुष्टतोयंतथामद्यंविदाह्यन्यशनानिच ॥ ७ ॥ निदाघंचत्यजेन्मर्त्योमांसविस्फोटकोमितः ॥ इतिविस्फोटचिकित्सा ॥ अथस्नायुकनिदानंचिकित्सामाह ॥ दोषाःशाखागताःदुष्टाःकुर्वंतिस्नायुकामयं ॥
८ ॥ विशोष्यविसितंश्लेष्मप्रकुर्यात्तंतुसन्निभं ॥ स्नायुकंतेनचांगेषुकंडूशोथश्चजायते ॥ ९ ॥ पिंडिकामग्निदग्धाभ्यांकृत्वाभित्वाततस्तनं ॥ तयाहाराद्वहिर्यातिस्नायुकोजनयेद्व्यथां ॥ १० ॥ तन्निर्गमात्सुखंविंद्याभंगात्स्यात्स्वपथुःसरुक् ॥ कुष्ठरामठशीग्रूणांकल्कःशुंठीसमन्वितः ॥ ११ ॥ निहन्या

९१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्नायुकरुजं लेपतः पानतो पिव ॥ गोघृतं त्रिदिनं पीत्वा अहात्रिर्गुडिकारसं ॥१२॥ पिबेत्स्नायुकम
स्कंगुंशी घ्रमेवं निवारयेत् ॥ मूलं सुरवध्या हिमवारि पिष्टं पानाद्दिनात्तं नुगदं प्रवंडं ॥ शांतिं नयेत्सव्रणमा
शु पुंसां गंधर्वगंधेन घृतेन पीतः ॥१३॥ मुस्ताविषापिप्पलिविश्वमार्डी बिभीतकानां विहितं सुचूर्णं ॥ उ
ष्णोन तोयेन निपीयमानं प्रणाशयेत्स्नायुकरोगमुग्रं ॥१४॥ सोभांजनजटापत्रं कांजिकेन ससैंधवं ॥१५
पिष्टं हंति विलेपेन स्नायुकं तीव्रवेदनं ॥ धत्तूरार्कदलैः स्वेदते लाभ्यंगश्च शस्यते ॥१६॥ शोणितं श्रावयेत
द्रूयः स्नायुके शोथकारिणी ॥ अंगारसिद्धं तार्कं तैलं रामठसैंधवैः ॥१७॥ संयुतं स्नायुगं हंति मुखेव
बद्धं न संशयः ॥ इति स्नायुकचिकित्सा ॥ अथ मसूरिकानिदानं ॥ लवणक्षारकट्वम्लविरुद्धाध्यशना
दिभिः ॥ दुष्टोदकानिलैः दुष्टग्रहदृष्ट्या स्थितसंगतेः ॥१८॥ दोषैः क्रुद्धो भवेयुस्तु प्रायो देशे मसूरिकाः
मसूरसदृशाकाराः स्फोटाः प्रोक्ता मसूरिका ॥१९॥ पूर्वतास्तां ज्वरो गात्रभंगः कंडूभ्रमोरुचिः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ॰ स॰
१६॰

त्वचि शोथश्चैव वैवर्ण्यं संतापश्च प्रजायते ॥ २० ॥ सिताः श्यामारुणाः पीताः हिक्कामूर्छाप्रलापदाः स्थू-
ला खराश्च बहुलाः असाध्याः स्युर्मसूरिकाः ॥ २१ ॥ इति मसूरिकानिदानं ॥ अथ चिकित्सामाह ॥ सर्वासां
वमनं पूर्वं वासारिष्टपटोलकैः ॥ २२ ॥ कषायैश्च वचावत्सयष्ट्याह्वाफलकल्कितैः ॥ हरिद्राचूर्णसंयुक्तं
कारवीपत्रजं रसं ॥ २३ ॥ पिबेद्रोमारिविस्फोटं मसूरिज्वरशांतये ॥ पटोलघनभूनिंबगडूचीधान्य
वासकैः ॥ २४ ॥ यवासकटुकारिष्टपर्पटैः क्वथितं जलं ॥ पीतं मसूरिकाआमाशमयेत्पाकसंपु
तं ॥ २५ ॥ शोधयेच्च ज्वरः शीघ्रं विस्फोटोत्थं विनाशयेत् ॥ इति पटोलादिः ॥ निंबपटोलकं पाठा
पर्पटं कटुरोहिणी ॥ २६ ॥ धात्री दुरालभा वासोशीरकं चंदनद्वयं ॥ निंबादिकं कषायोयं पीतः श
र्करया सह ॥ २७ ॥ मसूरिकां त्रिदोषोत्थां ज्वरं हन्याद्विसर्पिणं ॥ उत्थाय प्रविशेयुर्याः स्ताः पुनर्बा
ह्यतो नयेत् ॥ २८ ॥ निंबादिः ॥ खदिरारिष्टवासाकपटोलत्रिफलामृता ॥ क्वाथः पीतो जयेदाशु

९१

324

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

सकंडूका मसूरिका ॥ २९ ॥ खदिराष्टकं ॥ केसरं मातुलिंगस्य पिष्टा सौवीरसंयुतं ॥ मसूरिका च यच्छ्रे
पादाहं चाशु विनाशयेत् ॥ ३० ॥ पिटिका पाददेशे स्यात् पाददाहं करोति या ॥ तत्र सेकप्रकर्तव्यो बकुश:
संतुल्लोदके: ॥ ३१ ॥ लिह्याद्धुदरसंभूतं चूर्णं गुडसमन्वितं ॥ मसूरिका विपच्यंते तेन शीघ्रं त्रिदोषजा
३२ ॥ मसूरी क्लेदनी पंचवल्कैले रवचूर्णयेत् ॥ आपाकभस्मना वापि यद्वा गोमयभस्मना ॥ ३३ ॥ शीघ्रं मि
पातनिव स्पर्श धूपयेत्सरलादिभि: ॥ शौचे खादिरसारेण प्रभुंजीत भृतं जलं ॥ ३४ ॥ पटोलमूलरजनीधा
त्रीरक्तघनसनं ॥ एतत्क्वाथं पिबेज्जंतु मसूरीज्वरशांतये ॥ ३५ ॥ मसूरीरोगमुक्तो पि मासमेकं विवर्ज
येत् ॥ मथ्यान्निद्रुष्टतोयाभि । विदाहि न्यशनानि च ॥ ३६ ॥ इति मसूरिरोगश्चिकित्सा ॥ इति श्री लक्ष्मणो
त्सवे ग्रंथे पंचाशत्तमोध्याय: ॥ ५० ॥ अथ वल्मीकज्वालागर्दभादीनां च क्षुद्ररोगाणां निदानचिकित्सा च
निरोजोग्रंथिता स्निग्धा सवर्णा मृदुसंयुता ॥ पिटिका कफवातोत्था बालानामजगल्लिका ॥ १ ॥ स्वा

322

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰स॰ ३६१ ताश्चांधालजीकच्छपिका तद्रूपसंस्थितिः ॥ करग्रीवांसकक्षांससंधिभागे त्रिदोषजा ॥ २ ॥ ग्रंथीअ
नभिरेणेष वांतिवल्मीकरूपता ॥ अवद्धिः प्रान्ते वंक्रैरनेकैः परिसर्प्यति ॥ ३ ॥ विरोत्थितं तु वल्मीक
मसाध्यत्वं प्रपद्यते ॥ हनुसंधिस्थितः शोथो वातश्लेष्मसमुद्भवः ॥ ४ ॥ शिरोमंदम्मथः स्निग्धः स्म
तः पाषाणगर्दभः ॥ कर्णस्थानांतरोद्भूताः पिडिकातीव्रवेदना ॥ ५ ॥ स्थिरा पनसिका नाम सेयावा
तकफोद्भवाः ॥ निपाकः स्वपृथुः सूक्ष्मायः सर्पति विसर्पवत् ॥ ६ ॥ दारदाहकरोज्वालागर्दभः स्या
त्पित्तजः ॥ निदानमुक्तं ॥ उपचारं जलौकाभिरपकायजगद्त्रिका ॥ ७ ॥ शुक्तिसोराष्ट्रिकाक्षारक
ल्कै रालेपयेन्मुहुः ॥ श्लेष्मविद्रधिकल्पेनानुशायीं तु निवारयेत् ॥ ८ ॥ विसर्पवज्जयेज्वालाग
र्दभीमिरिवेल्लकं ॥ गर्दभीमिंद्रमुमं च विवत्सां गंधनामकं ॥ ९ ॥ मधुरौषधसिद्धेन घृतेनोपा
चरेद्व्रणं ॥ बहुभिः स्वेदनैरक्षावसेकैरपतर्पणैः ॥ १० ॥ जयेद्धिहारिकांलेपैः शिग्रुदेवद्रुमोद्भ

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे:॥ जयेत्सनसिकामेवं विधिना कच्छपीरपि॥११॥ स्वपथ्यान् कटीनानम्मान् जयेद्देवंब्रदोषजं॥
अंध्रालजीकच्छपिका तथा पाषाणगर्दभं॥१२॥ देवदारुशिलाकुष्टैः स्वेदकृत्वा विलेपयेत्॥ मरुत
कपोतस्यशीपकंप्रलेपः पाषाणगर्दभे॥१३॥ छित्वाशस्त्रेण वल्मीकं साधयेत्क्षारवन्हिना॥ चंद
नागरुसूक्ष्मेला भल्लातकमनःशिला॥१४॥ वक्रजातीदलान्येते निंबतैलं विपाचितं॥ नाशयेद्दृढ
वल्मीकं बहुच्छिद्रं बहुस्रुतं॥१५॥ निंबतैलं॥ शिरायातत्लसोधन्यावेधनंपाददारिणि॥ रालसैंध
वयोश्चूर्णं घृतक्षौद्रसमन्वितं॥१६॥ कटुतैलेविनिमिथ्यपादाभ्यंगं समाचरेत्॥ करंजबीजमथुकं
हरिद्रामधुरोचना॥ हरितालं सकासीसं अलसेलेपनं हितं॥ लोहपात्रे हरिद्रायाः स्वरसेनहरीत
की॥१८॥ धन्तात्तद्रवकल्केन लिप्यं लेप्यं सुनःपुनः॥ पद्मिनीकटुके निंबनीरेणवमनं हितं॥१९
घृतं निंबोद्वेकसिद्धं सक्षौद्रं पानमिष्यते॥ अहिपूतनके धात्र्याः स्तन्यं विशोधयेत्॥२०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह०सं० व्रणानां धावनं कुर्यात् काथेनैव फलत्वाहिरेः ॥ पानेहितं विलेपेच विशेषेण रसांजनं ॥ २२ ॥ गुदभ्रं
१६२ शे गुदं स्विन्नं हरन्मु आशु प्रवेशयेत् ॥ स्वेदयेच्च प्रविष्टं तद् बद्धं गोफणाधारतः ॥ २२ ॥ स्वादुः शर्करोपेतं को
मलं पयसि नीरजं ॥ नैव संजायते तस्य गुदनिःसरणं पुनः ॥ २३ ॥ आखोर्वसा विलेपेन गुदभ्रंशस्य मंत्रजे
त् ॥ स्विन्नेस्तस्य पत्रैर्वापि गुदं संस्वेदयेत् भ्रशं ॥ २४ ॥ शस्त्रेण क्षिप्त्वा जंतुमणीन् माषकान् च मंकोल
कान् ॥ मृद्देहे स्नावबन्धित्यांतथैव तिलकालकान् ॥ २५ ॥ गोवृंनेपिटिकामच्चनीलिका व्यंगशर्करा ॥ अ
भ्यंजनैः प्रलेपैश्च शिरावेधैश्च नाशयेत् ॥ २६ ॥ धान्याम्लोद्भवचालेपस्तारुण्यपिंडिकाहरेत् ॥ व्यंगेषु कुंकु
मत्वग्वा मंजिष्ठा वा समात्रकं ॥ २७ ॥ श्वेताश्च खुरसंभूतान् नवनीतासुतामपि ॥ विलिप्ता नाशयेच्छीघ्रं
व्यंगान् चिरतरोत्थितान् ॥ २८ ॥ प्रियंगुकुष्ठं मंजिष्ठा रक्तचंदनलोध्रकाः ॥ यवांकुरा मसूराश्च कांतिदा
व्यंगनाशनः ॥ २९ ॥ पिष्ट्वा घृतेन संयुक्ता तीक्ष्णशाल्मलिकंटकाः ॥ व्यंगनाशं प्रकुर्वंति वंक्रचकेम

११

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

लेपमं ॥ २०॥ मातुलिंगजटा सर्पिः शिला गोशकृतो रसः ॥ मुखकांतिकरो लेपः पिडिकातिलकापह
जित् ॥ २१॥ जलौकाभिरसक्मोक्षः शिरावेधेन वा कृते ॥ अरूंषिका यां वा निंबांबुसिक्ते शिरलेपनं ॥ २२
सैंधवेन प्रकर्तव्यं सुवर्चः पयसा सह ॥ पुराणपिण्याकयुतः पुरीषः कुक्कुटस्य च ॥ २३॥ मूत्रपिष्टविले
पनं शीघ्रं हन्यादरूंषिकां ॥ त्रिफलावंदनं निंबं मंजिष्ठा च निशाद्वयं ॥ २४॥ एभिः संसाधितं तैलं हंति
भृंगादरूंषिका ॥ तैलं गुंजाफलैः सिद्धं मार्कवस्परसेन वै ॥ २५॥ कंडूकुष्टवशमयेत्कपालव्याधिनाश
नं ॥ मार्कं युत्रिफला लोहकिट्टोत्पलविपाचितं ॥ २६॥ तैलं दारुणकं केशान् कुंचितान्कुरुते स्थितान्
भृंगराजे तैलं ॥ शिखां विध्यं इक्षुसेतुले पयेत्सरितस्ततः ॥ २७॥ शिलाकासीसतुल्याद्वैः तैलं च तत्कुतं
हितं ॥ कुटंनटं शिखी जाती करवीरकसंजैकैः ॥ २८॥ अवगाढपदं वापि पृच्छयित्वा पुनः पुनः ॥ लिंप
गुंजाफलैः केशभूमिसम्यक्समंततः ॥ २९॥ तेनेंद्रलुप्ते प्रशमो भवेत्केशप्ररोहणं ॥ इंद्रलुप्तं हरेत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स०
१६३

पान्सस्नेहैः क्रद्विकारसः ॥४०॥ रसांजनं दंतिदंतमषी केशान्प्ररोहति ॥ अविमूत्रेण संयुक्तं रूक्मीकर
णमुत्तमं ॥४१॥ लोहकीटजपापुष्पामलकैः स्नाति यो नरः ॥ त्रिफलानीलिनीपत्रं लोहभृंगरजः समं ॥
४२॥ पलितं तस्य नैवस्यात् सुखं तत्स्यात्तु तोयथा ॥ कासीसं तुल्यकं तालं रोचनाचरसांजनं ॥४३॥ अम्ल
पिष्टः प्रलेपोयं व्यषकच्छुहि पूतयोः ॥ कुंकुमं चंदनं पत्रं कुमुदं कमलं तथा ॥४४॥ रोचनोशीरमंजिष्टा
सारिवारजनीद्वयं ॥ यष्टीकं गैरिकं कुष्टं नागरं स्वर्णमाक्षिकं ॥४५॥ पतंगलोध्रफलिनी कालेयरक्तचं
दनं ॥ द्रव्यैरेतैः समैर्वैद्यः पृथगस्य प्रमाणकैः ॥४६॥ तैलप्रस्थं पचेत्सम्यक् तत्सिद्धं कुंकुमादिकं
अभ्यंजनं वरं स्त्रीणां शस्तं पुंसां च कामिनी ॥४७॥ नाशयेत्तिलकान् व्यंगान् पिटिकामुखदूषिकं ॥
श्यावतां त्वद्विवर्णत्वं शीघ्रं नाशयति ध्रुवं ॥४८॥ रूपं मनोहरं कुर्यात् वक्त्रमंबुजसन्निभं ॥४९॥
इति कुंकुमाद्यं तैलं ॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे वल्मीकादिक्षुद्ररोगाणां निदानं चिकित्सा कथनंना ९३

327

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मैकपंचाशत्तमोऽध्यायः ॥ ५१ ॥ अथ मुखरोगनिदानं ॥ अम्लमाषदधिक्षीरानूपमांसादिसेवनैः
दोषदुष्टा मुखस्यांतः कुर्वंति विविधान् गदान् ॥ १ ॥ वातेनौष्ठे मुखं स्याधो भवतस्तत्र कर्कशौ ॥ वातेन दर
नमापाद्यमानाविवरदच्छेदौ ॥ २ ॥ पित्तप्रकोपेदाहार्त्तौ पिटिकापाकसंयुतौ ॥ पीतवर्णौ च भवतः कफ
कोपेनपिच्छिलौ ॥ २ ॥ शीतौ गुरू सवर्णाभिः पिटिकाभिः समाचितौ ॥ ३ ॥ तस्यावारुणछायावनेकपि
टिकाचितौ ॥ ४ ॥ सन्निपातेन भवतः मेदसे दारुणवेदनौ ॥ रक्तेन दुष्टेनु रक्ताभौ रक्तं च श्रवतः सदा ॥ ५ ॥ मां
सेदुष्टे गुरोस्थूलौ नोउच्छ्रितौ मांसपिंडवत् ॥ मूर्छितिजंतवोदुष्टे मेदसुभयतोन्यथा ॥ ६ ॥ अकस्मादंतवेष्टे
ज्यो यस्या सक्तं संप्रवर्त्तते ॥ दंतमांसानि शीर्यंते दुर्गंधीनि समंततः ॥ ७ प्रक्लेदिनीवक्रस्मानि पचंतिच
परस्परं ॥ कफशोणितजं तस्य शीतादो व्याधिरुच्यते ॥ ८ ॥ अधिको जायते दंतो वायुना तीव्रवेदना ॥
जाते दंते वरं कृशांते रोमोपं वर्द्धनः स्मृतः ॥ ९ ॥ जिह्वामुन्नस्य जिह्वाग्ररूपोयः श्वपथुर्भवेत् ॥ जा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ स॰ लाकृतः कफरक्तोत्थः प्रोक्तः सेवाम जिह्वकः ॥१०॥ वक्त्रे दौर्गंध्य वैरस्य पाकः क्लेदाद्यस्तथा ॥ विशी
१६५ र्णदंतमांसाश्च जायंत्यन्ये मुखामयाः ॥११॥ इति मुखरोगनिदानं ॥ अथ चिकित्सा ॥ श्रीवेष्टगुग्गु
लुयष्टीदारुसर्जरसं तथा ॥१२॥ सर्वमेकीकृतं चूर्णं विदध्यात्प्रतिसारणं ॥ शिराणां वेधनं वापि विरे
कः परिषेचनं ॥१३॥ पित्तोपसर्गे शस्यं ते शीतैरेव विलेपनं ॥१३॥ कफोपसृष्टयोः कार्यमोष्ठयो
रक्तमोक्षणं ॥ त्र्यूषणं स्वर्जिकाक्षार यवक्षारैः समाक्षिकैः ॥१४॥ दुष्टपाके कफोद्भूते विदध्यात्प्र
तिसारणं ॥ चूर्णं च त्रिफलोद्भूतं सक्षौद्रं लेपनं हितं ॥१५॥ शीतादे शस्यते रक्तं हृते शुंठ्याज्यलेपनं
कुष्ठपाठाघनोदार्वी मंजिष्ठा तेजिनी निशा ॥१६॥ रोध्रश्चेति हितं चूर्णं दंतानामवघर्षणं ॥ रक्तस्रा
वं रुजं चैव कंडूं चैव निवारयेत् ॥१७॥ रक्तस्य मोक्षणं कुर्यात्तरुणे दंतपुप्पुटे ॥ दंतान् चलान् स्थिरा
न् कुर्यात् बकुलस्य च चर्वणं ॥१८॥ क्षारं स पंच लवणं सक्षौद्रं प्रतिसारणं ॥ पिप्पली माक्षिकोपे

१

329

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं धारयेद्दशनेधृतं ॥१९॥ दंतशूलहरं प्रोक्तं प्रधानमिदमौषधं ॥ पतंगलोध्रमधुकलाक्षाचूर्णैः
समाक्षिकैः ॥२०॥ विस्राविते दंतवेष्टे प्रकुर्यात्प्रतिसारणं ॥ सौषिरे हृतरक्ते तु रोध्रमुस्तारसांजनैः
२१॥ लेपः शस्तो मधूपेतैः गंडूषः क्षीरिभिः कृतः ॥ दंतमूलानि शस्त्रेण सम्यक्कृत्वा परिशोधयेत्
२२॥ क्षारं पश्चात्प्रयुंजीत ततः शीतविधिं चरेत् ॥ दंतनाडीं प्रकुर्वीत विधिं नाडीव्रणोदितं ॥२३॥
मुखे धार्याः स्नेहकवलाः सर्पिषस्त्रिवृतस्य च ॥ निर्गुंडीश्वानिलघ्नानां दंतहर्षविनाशकः ॥२४॥ भ
द्रदार्व्यग्निवर्षाभूलेपैः स्निग्धैश्च भोजनैः ॥ हिंगु सोष्मं च मतिमान् कृमिदंते प्रलेपयेत् ॥२५॥ दं
तधावनरूक्षान्नशीतांबु कठिनानि च ॥ फलान्यम्लानि च सदा दंतरोगी विवर्जयेत् ॥२६॥ उपजि
ह्वां तु संछिद्य सक्षारेण प्रतिसारयेत् ॥ शिरोविरेकगंडूषधूमैश्चैनामुपाचरेत् ॥२७॥ वन्हिक्षा
राभ्यामोषचूर्णमेतत्प्रघर्षणं ॥ कफरक्तोद्भवा तालुमूले स्यात्कंठशुंडिका ॥२८॥ छित्वा सैंधव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊ.स.०
३६५

ओषो ग्रासस्यौद्रैः प्रतिसारयेत् ॥ स्वयं याति स्तनु हि क्षीरै स्तैः पिता गलशुंडिका ॥ १९ ॥ वचा प्रतिविषा रास्ना पा
ठा तिक्ता सनिंबका ॥ धारयेत् क्वाथमित्यातु कवलं चात्र बुद्धिमान् ॥ २० ॥ तुंडिकेपूडबीलकेषसंघाते तालुपुप्पुटे
एष एव विधिः कार्यो विशेषः शस्त्रकर्मणि ॥ २१ ॥ पित्तप्रशमनं कर्म तालुपाके समाचरेत् ॥ तालुशोषे चरे
त् स्वेदस्नेहो वातहरं विधिः ॥ २२ ॥ रोहिणीनां तु साध्यानां कुर्याच्छोणितमोक्षणं ॥ गंडूषं धूमपानं छर्द
नं नस्यकर्म च ॥ २३ ॥ हृतास्त्रं कंठशालूकं साधयेत्तुंडिकेरिवत् ॥ अधिजिह्वां प्रशमयेत् उपजिह्वां क्रक
र्मणा ॥ २४ ॥ छेदयेन्मंडलाग्रेण तीक्ष्णैः संघर्षणादिभिः ॥ शोधनं तु विधिं कुर्याद्देकवं देहतास्रके
२५ ॥ रोगाः श्रोत्काग्नि तार्ष्यस्तच शस्त्रेण शोधयेत् ॥ कंठामये षसकृ मोक्षं तीक्ष्णैर्नस्यादिकं न्मयेत्
२६ ॥ क्वाथं पिबेत्तु दार्वी लकुनिंबतार्क्ष्यकलिंगजं ॥ पथ्याहरीतकी क्वाथं पिबेन्माक्षिकसंयुतं ॥ २७ ॥
कलिंगातिविषा पाठा कटुका मुस्त दारुभिः ॥ गोमूत्रे साधितं क्वाथं पिबेत्कंठामयापहं ॥ २८ ॥ गृह

९१

231

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धूमस्त्रिकटुकं क्षारः पाठा रसांजनं ॥ चित्रकं त्रिफला रोध्रं तेजोव्हा चेति चूर्णितं ॥ ३९ ॥ माक्षिकेन सम
मायुक्तं गलरोगान् विनाशयेत् ॥ कालकं नाम चूर्णं तु हंतास्य गलरोगनुत् ॥ ४० ॥ मनःशिलादारूतिक्ता
हरितालं ससैंधवं ॥ यवक्षारश्च त्रिचूर्णं माक्षिकेण विमिश्रितं ॥ ४१ ॥ मूर्छितं घृतमज्ञेण कंठरोगेषु
धारयेत् ॥ कथितं पीतकं नाम हितं वक्त्रामयेष्वपि ॥ ४२ ॥ पीतकं चूर्णं ॥ यवाग्रजनिशाकृष्णादारुपाठार
सांजनं ॥ तेजोवतीं च मधुना गुटिकेयं प्रकल्पिता ॥ ४३ ॥ धारिता वदने हंति गलरोगानशेषतः ॥ मुखरं
पाके शिरावेधं शिरसश्च विशोधनं ॥ ४४ ॥ प्रकुर्यात्सततं धात्रीपत्राणां च विचर्वणं ॥ मुखपाकाजये
त्वक्काथं शीतो गंडूषधारणात् ॥ ४५ ॥ जातीच्छदामृतापाठादार्वीद्राक्षाफलत्रिकैः ॥ पटोलमालतीनिं
बजं बीभ्रनवपत्रैर्वै ॥ ४६ ॥ पंचपल्लविकाः सिद्धकाथो वक्त्रस्य धावने ॥ तुलां खदिरसारस्य जल
द्रोणे पचेद्बुधः ॥ ४७ ॥ अष्टभागावशेषे तु तत्र चूर्णं विनिक्षिपेत् ॥ जातीकंकोलकर्पूरकमुकानां

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० विचक्षणः ॥४८॥ गुटिका सा प्रकर्तव्या मुखसौभाग्यदायिनी ॥ मुखदंतोष्ठरोगघ्नी जिह्वातालुगमहा
२६६ पहा ॥४९॥ इति खदिरादिगुटिका ॥ बकुलस्य फलं वज्रं वदन्तीव चतुरंगुलं ॥ बंधूकासनरोध्रश्च वा
जीकर्णारिमेदकं ॥५०॥ एषां कल्ककषायाभ्यां सिद्धं तैलं मुखे धृतं ॥ दंतानां चलतां कुर्यात् स्थैर्यं त
द्भावनेन च ॥५१॥ बकुलाद्यं तैलं ॥ इति श्रीलक्ष्मणोत्सवग्रंथे मुखरोगकथनं नाम द्विपंचाशत्तमो
ध्यायः ॥५२॥ अथ कर्णरोगनिदानं ॥ कर्णस्थाः कुपिता दोषाः कुर्वंति विविधामयान् ॥ नाम
भियो निकैर्वैद्यस्तान्सर्वान्लक्षयेद्भिषक् ॥१॥ कर्णशूलं कर्णनादं बाधिर्यं क्ष्वेडमेव च ॥ वायुः
कुप्यति कर्णस्थो यथा दोषानुबंधनं ॥२॥ जलेन पूरणाद्दंतः पाकान्कृमिसमुद्भवान् ॥ इत्यादितः
प्रजायन्ते बहुधा कर्णजा रुजः ॥३॥ इति निदानं ॥ अथ चिकित्सा ॥ शृंगवेरकपित्थाम्लमातुलिंगो
द्भवे रसैः ॥ सुखोष्णैः पूरयेत्कर्णं कर्णशूलोपशांतये ॥४॥ शृंगवेरं च सिंधूत्थं कटुतैलं समा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षिकं॥ निक्षिप्तं कर्णयोर्हन्यात्तीव्रकर्णरुजं॥५॥ साधितं सार्षपं तैलं हिंगुतुंबुरुनागरैः॥ क
र्णयोः पूरणेनैतत्कर्णशूलं व्यपोहति॥६॥ लशुनं च कदल्या वा सूर्यावर्तस्य वा रसः॥ शिग्रुमूलस्य वा
श्रृंगवेरस्य स रसोथवा॥७॥ तैलसिंधूत्थमधुभिः संयुक्ताश्च पृथक्पृथक्॥ पंच योगा इमे कर्ण
शूलघ्नाः कर्णपूरणात्॥८॥ तिलतैलयुतः शिग्रुनिर्यासः कर्णपूरणात्॥ निवारयति कर्णस्य शूलं तु
सह वेदनं॥९॥ अजागमूत्रेण कर्णस्य नरमूत्रेण वै कृतं॥ कोष्णेन पूरणं हंति कर्णशूलं न संशयः॥१०॥ क
पित्थः स्वरसैः क्षौद्रयुक्तं पंचकषायजं॥ चूर्णं कर्णे विनिक्षिप्तं कर्णस्रावं व्यपोहति॥११॥ सर्जत्वक्चूर्ण
संयुक्तः कार्पासीफलजो रसः क्षौद्रेण सहितं कर्णस्रावं हंति प्रपूरणात्॥१२॥ स्नेहस्वेदौ प्रकुर्वीत प्रतिनाहे
तु कर्णयोः॥ ततो विरक्तशिरसः क्रियां कुर्याद्यथोचितां॥१३॥ तैलेन क्लेदयित्वा तु स्वेदेन प्रविलाप्य च॥
शोधयेत्कर्णपूयं तु भिषक्शुद्धशलाकया॥१४॥ निर्गुंडीरससिंधूत्थतैलधूमरजोगुडैः॥ ससौद्रैः पू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० रयेत्कर्णं पूतिकर्णो पशांतये ॥१५॥ लांगलीमूलजरसः सिंदुवाररसस्तथा ॥ सर्पावर्त्तरसश्चैव त्र्यूषणेन
१६७ समन्वितः ॥१६॥ एतद्रसत्रयं कर्णपूरणात् कृमिरोगजित् ॥ कुष्टदारुवचाहिंगुशताह्वाविश्वसैंधवैः ॥१७
बस्तमूत्रेश्रृतं तैलं पूर्णं कर्णामयापहं ॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे कर्णरोगत्रिपंचाशत्तमोध्यायः ॥५३
अथ नासारोगनिदानं ॥ पीनसः पूतिनस्यं च नासापाकस्तथैव च ॥ रक्तपित्तं पूयरक्तं क्षवथुं भ्रंशथुस्तथा
१॥ नासानाहः परिश्रावी शोषो नासाश्रवस्तथा ॥ चत्वार्यर्शांसि शोफाश्च चत्वारोर्बुदसप्तकं ॥२॥ प्रति
श्याय सप्त पंचैव तत् एते त्रिंशत्प्रकीर्तिताः ॥ नासारोगाः स्मृतान् विद्यात् नामलिंगाविवेचनात् ॥३॥ इ
तिनिदानं ॥ अथ चिकित्सा ॥ व्योषाम्लवेतसं चव्यं तालीसं जीरकं तथा ॥ चित्रकं तिंतिडीकं च प्रत्येकं कर्षमा
त्रकं ॥४॥ त्रिशाणं त्रिसुगंधं च गुडं स्यात्कर्षविंशतिः ॥ त्र्यूषणादिगुटी नाम पीनसः श्वासकासनुत् ॥५
हृत्रिसरप्रदारम्या ता प्रतिश्यायप्रणाशिनि ॥ ओषादिगुटिका ॥ आद्रीशीग्रुवचादंतीरसत्र्यूषणसैंधवैः ॥

१

335

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साधितेनावनं तैलं पूतिनासामयं जयेत् ॥ नासापाके विधिश्चैव बाह्यमाभ्यंतरं तथा ॥ ७ ॥ हरिद्रुत्वेक्षीर
वृक्षत्वक् घृते सेकलेपने: ॥ बिल्वत्र्यूषणमञ्जीका कल्क क्वाथ विपाचितं ॥ ८ ॥ तैलं मद्याघृतेन स्पैक्षव
थुव्याधिनाशनं ॥ नासानाहे पिबेत् स्नेहं स्निग्धं धूममथापि वा ॥ ९ ॥ दीप्तरोगे तु पित्तोत्थे कुर्यात्पित्तहरं वि
धिं ॥ पित्तरक्तोत्थयोः सर्पिः पिबेन्मधुरसाधितं ॥ १० ॥ परिसेकान्प्रदेहांश्च प्रकुर्याच्छीतलान्बुधः
प्रतिश्याये तु वातोत्थे घृतं पेयं यथाक्रमं ॥ ११ ॥ पंचभिर्लवणैः सिद्धं प्रथमेन गणेन वा ॥ नस्यादिषु वि
धिं कृत्स्नमवेक्ष्येतार्दितेरिते ॥ १२ ॥ यवाग्वा तिलमाषाभ्यां स्निग्धया वा कफामये ॥ वामयेत्सर्पिषा
स्निग्धं श्लेष्मघ्नं च विधिं चरेत् ॥ १३ ॥ कुष्ठबिल्वकणाशुंठी द्राक्षाकल्ककषायकं ॥ साधितं तैलमाज्यं
वा नस्यात्क्षवथुनाशनं ॥ १४ ॥ गृहधूमकणादारुक्षारनक्ताह्वसैंधवैः ॥ सिद्धं शिखरिबीजैश्च तैलं ना
सार्षसां हितं ॥ १५ ॥ इति श्री लक्ष्मणोत्सवे ग्रंथे नासारोगे चतुःपंचाशत्तमोऽध्यासः ॥ ५४ ॥ अथ नेत्ररो

336

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ स॰ गनिदानमाह॥ उष्माभितप्तस्य सलिलप्रवेशाद्दूरदर्शनात्॥ वा स्वप्नविपर्ययाभिघाताभिमैथुनात् स्वेदसेवना
१६८ त्॥१॥ विण्मूत्रवातबाष्पांबुरोधसूक्ष्मनिरीक्षणात्॥ निद्राविपर्ययाच्चैवाम्लमद्यनिषेवणात्॥२॥ दो
षा नेत्रेषु संदुष्टा विकारान् कुर्वते बहून्॥ चतुर्नवतिराख्याताः रोगाः षट् समतिः परे॥३॥ इति निदा
नं॥ अथ चिकित्सा॥ लंघनैः स्वेदनैर्लेपैः शिरामोक्षैर्विरेचनैः॥४॥ उपाचरेदभिष्यंदानंजनाद्यैश्चि
कित्सितैः॥ ज्वरव्रणप्रतिश्यायकुक्षिनेत्रामयानपि॥५॥ पंचैते पंचरात्रेण शमं गच्छंति लंघनात्॥ श्री
वासरोध्रातिविषासुचूर्णैरन्यसैंधवैः॥६॥ अभ्यक्तोऽक्षिगदे कुर्यात् स्नातस्विन्नगुडनं बहिः॥ बिडाली
याद्यदा नेत्ररोगं सुव्यक्तलक्षणं॥७॥ कुर्यादाश्च्योतनं पीडानिग्रहार्थं तथा भिषक्॥ आश्च्योतनं तु वातो
त्थे क्वाथो बिल्वादिको हितः॥८॥ एरंडपत्रवल्कलाभ्यां संसाधितं पयः॥ कंटकार्याश्च मूलेन सु
खोष्णं सेचनं मतं॥९॥ ततः संप्राप्तदोषस्य प्राप्तमंजनमाचरेत्॥ मध्यंदिनेऽजनं शस्तं हेमंते शिशिरे

१६

337

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तथा ॥१०॥ प्रातःकाले पराह्ने वा दिनाद्यंतेऽशिरस्यपि ॥ वर्षासु नभ्रे नात्युष्णे वसंते च सदैव हि ॥११॥ वर्ति
श्च हरेणुमात्रां कुर्यात्तीव्रां जने सदा ॥ मंदे द्विगुणमात्रं च मात्रां च मध्यमां विदुः ॥१२॥ रसक्रियाणां वर्तीनां
मानमेतत् विडुंगकं ॥ मध्यमं हि विडुंगं स्यात् उत्तमं त्रिविडुंगवत् ॥१३॥ द्विशलाकं प्रयोक्तव्यं वेदे चणिक
चूर्णिकं ॥ त्रिशलाकं मदे कुर्यात् वत्तस्त्रे स्नेहिकं जने ॥१४॥ सुवर्णरूप्यताम्राणां कांस्यलोहाश्मना
मपि ॥ अंजनाय शलाका स्यु रष्टांगुलमिता हिता ॥ मुंडे रंडजटाबिल्वं शिग्रुमूलं च सैंधवं ॥ अजाक्षीरद्रु
ता वर्त्ति रेषा वाता त्रिरोगहृत् ॥१६॥ हरिद्रे द्वे च मद्वीका मधुकं दारु पेषितं ॥ अजाक्षीरेण संयुक्तं मभिष्यं
दे जने हितं ॥१७॥ निंबामलकयष्ट्याह्व पेटं यत्र्यैः प्रसमुते ॥ शीतं लेमीक्षिकोपेतैः सकः पित्तास्रिरोग
नुत् ॥१८॥ कफोत्थे लंघनं नस्य स्वेदतीक्ष्णौः प्रधावनं ॥ तीक्ष्णैरेवोपनाहं च कुर्यात्तिक्तादि भोजनं ॥१९
पिंडो नेत्रे घृतः शुंठी निंबपत्रैः ससैंधवैः ॥ कृतः सुखोष्णो नयने शोफकंड्वामयापनुत् ॥२०॥ निं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ॰स॰ निंबोदुंबरवातारिबिल्वकपुष्पाद्रुवंदनैः ॥ कृतापिंडी धृता नेत्रे हन्यात्पीडां त्रिदोषजां ॥२१॥ तिंतिडीकंघ
१६९ नोयष्टीशर्करात्रिफलाद्वैवैः ॥ पिष्टैकैः शीतैर्लेपैको रक्ताभिष्यंदनाशनः ॥२२॥ पानं घृतस्य तिक्तस्य
जलौकाभिः समंततः ॥ असृग्विमोक्षणं कुर्यात् विरेकं च पुनः पुनः ॥२३॥ पित्ताभिष्यंदशांत्यर्थं वि
धिरेष उदाहृतः ॥ दार्वीगैरिकसिंधूत्थपथ्यातार्क्ष्यसमांशकैः ॥२४॥ जलपिष्टैर्बहिर्लेपः सर्वनेत्रा
मयापहः ॥ बिल्वच्छदरसः साज्यवस्त्रपूतः ससैंधवः ॥२५॥ खल्वे वराटिका घृष्टा धूपिता गोमया
ग्निना ॥ पयसा लोडितश्चाक्ष्णोः पूरणः शोफशूलनुत् ॥२६॥ अभिष्यंदेधिमंथे च श्लेष्मोत्थे च शस्यते
मंथेषु विविधान्यो विधिर्योऽयमुदीरितः ॥२७॥ आश्तान्तभेषजे मंथे भ्रुवोरूर्ध्वं तु दाहयेत् ॥ नेत्र
पाके प्रकुर्वीत जलौकापातनं भिषक् ॥२८॥ विरेकं च शिरावेधं लेपान्सेकांश्च शुक्लवत् ॥ त्रिफलाक्वाथः
कृतः क्वाथो लोहपात्रे सशर्करः ॥२९॥ सर्वान्नेत्रामयान्हन्यात्पीतः सप्तदिनावधिः ॥ अक्ष्णोरागा

१६९

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तुत्रे दोषे सेदनं वस्नोष्मणा ॥३०॥ कुर्य्यादाश्चोतनं स्वेन्ये पित्तस्रतविधिं ततः ॥ विद्युत्सूर्य्यप्रतापाग्नि
प्रमुखैर्दूषिते क्षिति ॥३१॥ तर्पणं हिममुस्निग्धैः प्रकुर्यात्रिफलाश्रितं ॥ सायंकाले पिबेत्तेन नश्य
न्ते नेत्रोपघातरुक् ॥३२॥ गडूचीत्रिफलाक्वाथः पिप्पलीचूर्णसंयुतः ॥ ससौद्रःशीतलोपेतः सर्वान्ने
त्रामयान्जयेत् ॥३३॥ वासाविश्वामृताहार्व्वीरक्तचंदनचित्रकैः ॥ भूनिंबनिंबकटुकापटोलत्रिफ
लाबुदैः ॥३४॥ यवैः कलिंगकुटजैः क्वाथः सिद्धोक्षिजान्रुजः ॥ सर्वा एव जयेत्क्षिप्रं प्रातः प्रातस्त
पानतः ॥३५॥ शुक्लं च व्रणतं च रागं दाहं च नाशयेत् ॥ तिमिरं च तथा शोथं रोगानन्यांश्च नेत्र
जान् ॥३६॥ वैश्वर्य्यं पीनसं कासं शमयेदुरसः क्षतं ॥ वासादिक्वाथः ॥ घृतेन त्रिफलां पिबेत् गव्या
त्तैलेन पित्तजे ॥३७॥ तिमिरे तु कफोद्भूते नित्यं क्षौद्रयुतां बुधः ॥ त्रिफलायाः कषायेन प्रातःकाले तु
नेत्रयोः ॥३८॥ प्रक्षालनेन जयति नेत्ररोगानशेषतः ॥ पथ्याबंचा मागधिका कुष्ठं चैव मनःशिला
३९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ॰ स॰
१७०

विभीतकस्य मज्जा वा शंखनाभिस्तथोषणं ॥ सर्वमेकीकृतं चूर्णं अजाक्षीरेण पेषयेत् ॥ ५०॥ व
र्त्तिश्चंद्रोदयो नाम तिमिरं हंति दारुणं ॥ अधिकानि च मांसानि पटलान्यर्बुदानि च ॥ ५१॥ निशांध्यं
च यथा कंडूरोगान्यन्यांश्च नेत्रजान् ॥ इति चंद्रोदया वर्त्ती ॥ जातीपुष्पाणि पंचाशत् षष्टी मागधतं
डुलान् ॥ ५२॥ अशीतिस्तिलपुष्पाणि मरिचान्यत्र षोडश ॥ चूर्णः प्रकृतिमा वर्त्तिः कुसुमिकाभिधा ॥
५३॥ छायाशुष्कां जलेनैनेषां गतं चक्षुर्निवर्त्तयेत् ॥ क्वाथैः कल्कैर्घृतैस्तुग्धैः सिद्धं त्रैफलसंभवैः
सायं पीतं हरेत्सम्यक् तिमिराणि न संशयः ॥ ५५॥ इति त्रिफलाद्यं घृतं ॥ पिप्पली सैंधवं द्राक्षा
त्रिफलायोद्भवं रजः ॥ मार्कवस्य रसे घृष्टं गुटिकांजनमुत्तमं ॥ ५६॥ कंडूं च तिमिरं शुक्लं काचं ना
र्जुनकादिकान् ॥ नेत्ररोगांस्तथान्यांश्च शीघ्रमेव व्यपोहति ॥ ५७॥ गैरिकं सैंधवं पथ्या पलाश
द्रुमशोणितं ॥ क्रमवृद्धमिदं चूर्णं शुक्लानामपि विलेखनं ॥ ५८॥ शंखो माक्षिकसंयुक्तं कतकं सैंधव ९१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेनव॥ शितयार्णवफेनोवा पृथगंजनमर्जुने॥४९॥ दार्वहारवचातालं संपिष्य सुरसाद्रवैः॥ तगरंवाभ
या काथैः पिष्टं पिष्टक विनाशनं॥५०॥ अंतर्मुखानि रोमाणि पक्ष्मजानि शनैः शनैः॥ संदंशेनोद्धरेत् पक्ष्मद
हेदुमशलाकया॥५१॥ अक्षिसंरक्ष्यलेनतुष्टरोमजनआयते॥ निंत्राममेषुत्रिफला घृतं चैव सदाहितं॥५२॥
क्षौद्रं शतावरी चैव पाल्लक्यं तंडुलीयकं॥ पानाभ्यंगोयवा मुद्गा सैंधवाद्यं सदाहितं॥५३॥ कारवेल्लपटोला
नि सादिनेत्रामयेहितं॥ मैथुनं कटुतीक्ष्णाम्लं गुरुहम्नं च विदाहि यत्॥५४॥ माषपिण्याकवेल्लुरमत्स्याने
त्रामयेसुजेत्॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे नेत्ररोगनिदानं चिकित्साकथनं नाम पंचाशपंचाशत्तमोध्या
यः॥५५॥ अथ शिरोरोगनिदानं॥ दोषाः शिरोगतादुष्टाः शिरोरोगान्प्रकुर्वते॥ तेचैकादशधा प्रो
क्ताहेतुलक्षणभेदतः॥१॥ वातात्पित्तात्कफाद्दोषत्रयात् रक्तात्क्षयादपि॥ कृमिभ्यश्च तथा सू
र्यावर्तास्युर्मूर्द्धाभारुजः॥२॥ अनंतवातार्द्धभेदशंखेभ्यश्च यथातथं॥ एकादशशिरोरोगान् लक्षयेत्ता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० नृपृथक्पृथक्॥३॥ अकस्मात्या शिरःपीडा निशि चैवाधिका भवेत्॥ शाम्येत् प्रतापनैर्वैधैः सामस्त
२७१ कोपजाः स्मृताः॥४॥ रात्रौ शीतेन च शान्तिः स्याद्दिवायस्या तितीव्रता॥ अतिदाहश्च सन्तोषः शिरोरोगश्च पैत्ति
कः॥५॥ शिरोगुरुश्च तिस्तब्धं शीतं शूना क्षिकूटकं॥ सशीवंनं वेदनस्य शिरस्तापं कफाद्भवं॥६॥ इत्यादिलक्षणे
रन्यान् शिरोरोगांश्च लक्षयेत्॥ इति शिरोरोगनिदानं॥ अथ चिकित्सा॥ वातोद्भवे शिरस्तापे स्नेहः स्वेदान्
प्रकल्पयेत्॥ उपनाहांश्च वातघ्नैर्नावनं च समाचरेत्॥८॥ एरंडमूलकुष्ठाभ्यां लेपो कांजिकसंयुतः॥ शि
रस्तापं हरेत् क्षिप्रं पुष्पं वा मुचकुंदजं॥९॥ पंचमूलैः सतैर्दुग्धैर्नस्यकर्म प्रकल्पयेत्॥ क्षिप्रं तेन शाम्यं
ति शिरोर्तिरतिदुस्तरा॥१०॥ चर्मणा वेष्टमूर्धानं चतुर्मुष्टिसमूर्छितं॥ तस्मिन्नधो माषकल्कैः सम
तास्य रिलेपयेत्॥११॥ निश्चलस्योपविष्टस्य कोष्णं तैलं विनिःक्षिपेत्॥ तैलं चर्ममध्यस्थं धारयेद्याव
न्मुखं॥१२॥ यामं वाथ तदर्धं वा शिरोवर्तिरमं जयेत्॥ शिरोरोगान्समुद्भूतान् हन्याक्षिकर्णजान्॥१३

१७

343

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अन्याश्च विविधान्हन्यादर्दितं मूर्द्धकंपयन् ॥ शिरस्तापे तु पित्तोत्थे स्निग्धं सम्यक् विरेचयेत् ॥ १४ ॥ द्रा
क्षाफलत्रिकेक्षूणां रसैः स्निग्धैर्घृतैरपि ॥ शर्करासलिलक्षीरैर्मूर्द्धि कुर्यात्त्रिषेचनं ॥ १५ ॥ शतधौतं तथा
सर्पिर्नित्यं शिरसि धारयेत् ॥ शीताश्च पवना सेव्याः शीतस्पर्शाश्चंदनलेपनं ॥ १६ ॥ चंदनोशीरमधुकबला
व्याघ्रीनखोत्पलैः ॥ साधितं चंदनानंतामञ्जिष्ठातुघृतं हितं ॥ १७ ॥ नस्यं तु शर्करायष्टीद्राक्षाभिः पै
त्तिके हितं ॥ रक्तजे तु शिरस्तापे शस्यते पित्तवद्विधिः ॥ १८ ॥ भोजनं सेचनं लेपं शीतमेव प्रकल्पयेत्
भक्तमोक्षे विशेषोयं व्यस्तासस्तु ह्यशृंगी तयोः ॥ १९ ॥ लंघनं स्वेदनं रूक्षैलक्ष्म शस्तं कफोद्भवे ॥ शस्ताश्च
कवलास्तीक्ष्णानश्यं धूमास्तथैव च ॥ २० ॥ रुहस्या कुशुंठी युष्टा द्रुशताह्वापाटलास्थिरैः ॥ तोयपिष्टै
र्विलेपोयं मूर्द्धशूलविनाशनः ॥ २१ ॥ कुष्ठं नखं देवदारु शुंठी च नलदान्वितैः ॥ एभिः सकांजिकैर्लेप
स्तैलयुक्तः शिरोर्त्तिहृत् ॥ २२ ॥ एकैकदोषजे प्रोक्ता क्रिया कार्या त्रिदोषजे ॥ पुराणघृतपानं तु विशेषा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऌ॰सं॰ दृत्र शस्यते ॥ २३ ॥ ओषाश्वगंधारजनीरास्नापुष्करबीजजः ॥ कषायः पानतो हंति शिरःशूलमन्य
१७२ नेकशः ॥ २४ ॥ शुंठीकल्कयुतं क्षीरं योजितं नस्यकर्मणि ॥ नानादोषसमुद्भूतं शिरःशूलं व्यपोहति ॥
२५ ॥ सूर्यावर्ते प्रकुर्वीत नस्यकर्मादिभेषजै ॥ घृतं बिबहुडोपेतं घृतपूरांश्च भक्षयेत् ॥ २६ ॥ सूर्या
वर्ते हितं नस्यं क्षीरज्याभ्यां प्रकल्पितं ॥ जीवनीयैः स्तिलैः क्षीरपिष्टैः स्वेदः प्रशस्यते ॥ २७ ॥ कुंकुमं
शर्करोपेतं घृतभ्रष्टं प्रकल्पयेत् ॥ नस्यकर्मणि वातासृक्संभूते मस्तकामये ॥ २८ ॥ भ्रूशंखक
र्णनयनस्सूर्यावर्ते विशस्यते ॥ महौषधं स्वरसं वचापिप्पलिभिः कृतं ॥ २९ ॥ अवपीडं प्रदातव्यं
सूर्यावर्तनिकृंतनं ॥ इयमेव क्रिया कार्या त्रिविधेर्धावभेदके ॥ ३० ॥ दारुनिशासमंजिष्ठापद्मको
शीरसारिवा ॥ एतदालेपनं शीघ्रं शंखकार्तिं विनाशयेत् ॥ ३१ ॥ अयमेव विधिः कार्यः शिरःशू
ले क्षयोद्भवे ॥ जयेदनंतवातार्तिं क्षीरं पीतं सशर्करं ॥ ३२ ॥ नारिकेलस्य वा क्षीरं शिरावेधश्च

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

शास्यते ॥ एरंडमूलं तगरं जीवंति भृंगसैंधवं ॥ ३३ ॥ शतावरी यष्टिकारास्ना बिडंगं विश्वभेषजं ॥ तैलं कृष्ण
तिलोद्भूतमजाक्षीरेण संयुतं ॥ ३४ ॥ एभिः पक्वं भृंगराजरसे तैलं चतुर्गुणे ॥ तेनोषध्निं तु नामेदं तस्य षट्बिं
दवो स्यात्तु ॥ ३५ ॥ सन्निमुक्तान् शिरोरोगान् वातपित्तकफोद्भवान् ॥ हन्युः सर्वान् चलान् केशान् स्थिरान् कु
र्यान्मनोहरान् ॥ दंतानां दंतमूलानां दृढीकरणमुत्तमं ॥ षट्बिंदु संज्ञकं तैलं ॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे शिरो
रोगनिदानं चिकित्सा कथनं नाम षट्पंचाशत्तमो ऽध्यायः ॥ ५६ ॥ अथ प्रदररोगनिदानं ॥ विरुद्धाध्यशनाजीर्णा
भिघातैः स्वपनैर्दिवा ॥ मद्यपानात् शोकादि कर्षणात् गर्भपातनात् ॥ १ ॥ स्त्रीणां मैथुनवैशम्यात् जायते सकृ
दरामयाः ॥ मदस्तथाग्निदौर्बल्यं दाहस्तृष्णा च पांडुता ॥ २ ॥ भ्रमः श्रमः प्रलापश्च तस्मिन्वृद्धे प्रजायते ॥
वातपित्तकफोद्भूतः सन्निपातोद्भवस्तथा ॥ ३ ॥ प्रदरस्याचतुर्भेदो यथावत्तं विवेचयेत् ॥ इति निदानं ॥
अथ चिकित्सा ॥ यष्टीसौवर्चलाजाजीनीलोत्पलमिदं समं ॥ ४ ॥ पिबेद्धाम थूपेत्वा तास्गदरनाश

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उ०स० नं ॥ वासकस्य गडूच्याः स्वरसं नारी तु यापि बेत् ॥ ५ ॥ यष्ट्या रोहीतकजटाकल्कं सा सकृद्रंजयेत् ॥ धात्री
१७३ लज्जा जलोपेता पांडुप्रदरनाशिनी ॥ ६ ॥ शिलाचूर्णं क्षौद्रयुतं धात्रीचूर्णं वा प्रदरं जयेत् ॥ धातुकीकुसुमं क्षौ
द्रं सितोपेतं तु भक्षयेत् ॥ ७ ॥ अश्वमांसं घृतेन सिद्धं पांडुप्रदरनाशनं ॥ मूलं वा काकजंघायाः मूलं कार्पास
कस्य च ॥ ८ ॥ सिताक्षौद्रयुतं लीढं पांडुप्रदरनाशनं ॥ रसांजनं तंडुलीयं मूलं माक्षिकसंयुतं ॥ ९ ॥ तंडु
लांबुयुतं पीतं सर्वासृक्प्रदरनाशनं ॥ कुशमूलं तु या पिष्ट्वा पिबेत्तंडुलवारिणा ॥ १० ॥ दिनत्रयेण सा ना
री प्रदरं नाशयेद्ध्रुवं ॥ क्षौद्रयुक्तं फलरसं काश्मर्युं बरिंजयेत् ॥ ११ ॥ असृग्दरविनाशाय सशर्करं पयोन्न
भुक् ॥ पाठारसांजनं मुस्तं मज्जा जंब्वाम्रयोस्तथा ॥ १२ ॥ अंबष्ठकिंशिलोद्भेदसमंगापद्मकेसरं ॥ बिल्व
मोचरसं रोध्रं वा ह्रीकं गैरिकं तथा ॥ १३ ॥ विश्वौषधं कट्फलं च मरिचं रक्तचंदनं ॥ कटुकं धातुकी द्रा
क्षा नंता मधुकमर्जुनं ॥ १४ ॥ वत्सकातिविषे वेति पुष्येणोद्धृत्य बुद्धिमान् ॥ तुल्यभागानि सर्वाणि सू
३१

347

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्माणि च विचूर्णयेत् ॥९५॥ तच्चूर्णं मासिके पेतं पानं तंडुलवारिणा ॥ जये दृशं स्मृतौ सारं तथा रक्तं प्रवा
हिकां ॥९६॥ बालानां कृमिरोगांश्च योनिदोषांश्च योषितां ॥ रजोदोषं तथा सर्वं प्रदरान् दुस्तरानपि ॥९७॥
पीतनीलारुणश्वेतान् सर्वानेव विनाशयेत् ॥ चूर्णं पुष्यानुगं नाम पूर्वमात्रेय भाषितं ॥९८॥ पुष्यानुगं
चूर्णं ॥ मुद्गमाषयष्टैः शुंठीरास्नाचित्रकसंयुतैः ॥ घृतं सपिप्पलीबिल्वैः पक्वं हन्याद् असृग्दरं ॥९९॥ मुद्ग
घृतं ॥ इति प्रदर चिकित्सा ॥ अथ योनिदोषनिदानं ॥ विरुद्धाहारचेष्टाभिः सततं वेगधारणैः ॥ अयुक्त
मैथुने गर्भपातनाद्यैः प्रकोपितुः ॥१॥ दोषा योनिगताः कुर्यात् व्यापदो योषितां भृशं ॥ गणनायां तु
नामानि तासां मुक्तानि सविंशः ॥२॥ नाम मुक्तैव लिंगानि सम्यक् वैद्यो विभावयेत् ॥ वातासृक्त्वकार्क
श्यं शुक्रावर्तं विनाशनं ॥३॥ पित्तदाहः परिश्रावः पाकाद्याश्च उपद्रवाः ॥ कफात् क्लैव्यकंडूघाः दोषा
सेपाभिषग्वरेः ॥४॥ इति निदानं ॥ अथ चिकित्सा ॥ योनिव्यापत्सु सर्वासु विधिं वातहरं चरेत् ॥ वस्त्र

348

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०त्स० भ्यंगपारीशोके प्रलेपपिचुधारणं॥५॥ वचाकुष्ठोपकुंचीचवासासैंधवचित्रकं॥ अवक्षारोजमोदाच
१७४ जीरकंसितयासह॥६॥ प्रसूताप्रसन्नयालोड्य रसादेतघृतभर्जितं॥ योनिरोगास्तु पार्श्वार्तिहृद्रोगार्शो
सिनाशयेत्॥७॥ दंतीगडूचीत्रिफलाक्काथेनुपरिषेचनं॥ घृतंहरतिनारीणां योनिदोषानशेषतः॥८
देवदारुनतंकुष्ठंभंगाकोसैंधवंसमं॥ एभिस्तैलंसतंयोनौ पिचुधार्योरुजापहः॥९॥ योनीनामपितत्तुष्टा
नांसेकाभ्यंगः पिचुक्रिया॥ सर्वापितत्रहराकार्या शीतंभोजनमौषधं॥१०॥ बलासेनप्रदुष्टायां योनावु
ष्णांसमाचरेत्॥ रूक्षंचभेषजंपथ्यंनित्यंसेवेतयत्नतः॥११॥ पिप्पलीमाषमरिचशताह्वाकुष्ठसैंध
वैः॥ वर्तिः प्रदेशिनीतुल्या धृतायोनिविशोधिनी॥१२॥ लक्ष्मणात्याजरापुष्पाधृता पिष्टाचकन्यया॥ स्र
लंतैलघृतदुग्धाभ्यांपीता स्त्रीणांसुतप्रदा॥१३॥ इतियोनिदोषचिकित्सा॥ अथवंध्यात्वप्रतीकारः॥ अ
तिक्रोधदिवास्वप्नाधिक्याद्विषममैथुनात्॥ अभिघातात्क्षतांश्चैवयोनौदोषाः प्रकोपिनः॥१४॥ पू १

349

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

यशोणितसंयुक्तं कुर्वते मृधुविंदत्तिं ॥ योनिकंदं तु तं प्राकु आधि गर्भाधिरोधकं ॥ १५ ॥ इति निदानं ॥ अ
थ चिकित्सा ॥ अनंतामधुकं शुक्ला भार्गी काचैव सारिवे ॥ सारिवा च ह्यस्ठा च चंतीयावेंदुवारुणी ॥ १६ ॥
अश्मंतकस्तिला: कृष्णास्ताम्रवल्लीशतावरी ॥ श्वदंष्ट्रा च पृथक्पर्णी शीग्रु पृष्टीवला तथा ॥ १७ ॥ क
सेरु मधुकं द्राक्षा शृंगाटकसितावषं ॥ अर्द्धश्लोकसमासास्तु: पंचयोगा इमे पृथक् ॥ १८ ॥ पयेयुता यो
निकंद गर्भश्रावहरा: स्मृता: ॥ त्रिफला मधुकं कुष्ठं विशाला कटुफलं वचा ॥ १९ ॥ विडंगं पिप्पली मुस्तं
द्वे निशे कटुरोहिणी ॥ द्वे निशे द्वे च काकोल्यौ चंदनं रक्तचंदनं ॥ २० ॥ हिंगुरास्ना शताह्वा च सारिवाद्रुप्रियं
गुका ॥ अजमोदा च दंती च वर्कमूलं शर्करा तथा ॥ २१ ॥ जातीपुष्पं तुगाक्षीरी कल्कैरेभिस्तु कार्षिकै: ॥
जीवद्दलैकवृणिया माज्यप्रस्थं गवां पचेत् ॥ २२ ॥ चतुर्गुणेन पयसा पचेद्धारण्यगोमये: ॥ शुद्धे पु
ष्पनक्षत्रे मंजुले ताम्रजे तथा ॥ २३ ॥ ततः पिबेच्छुभदिने नारी वा पुरुषोथवा ॥ एतत्सर्वं नरः पीत्वा स्त्री

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०सं० ष्पुसर्पिस्संरक्षाप्यते ॥२५॥ पुत्रानुत्पादयेत् श्रेष्ठान् वंध्यापुत्रं प्रसूयते ॥ अनायुषं या जनयेत्या च स्रुतापु
१७५ नः स्थिता ॥ पुत्रं प्राप्नोति सा नारी बुद्धिमंतं चिरायुषं ॥ एतत्फलघृतं नाम भारद्वाजेन भाषितं ॥२६॥ अनुक्ते ल
क्ष्मणामूलं क्षिपेत्तत्र चिकित्सकाः ॥ इति फलघृतं ॥ रुक्मकांचनताम्राणां भस्मक्षौद्रान्वितं लिहेत् ॥२७॥
शुद्धान्ती सा पिबुंयोगाद्गर्भं धत्ते न संशयः ॥ वाजिगंधामृता साद्री क्वाथं स्नानदिने पिबेत् ॥२८॥ सा पिबुंयो
गमात्रेण गर्भं धत्ते न संशयः ॥ बीजपूरस्य मूलं वा सद्यः पयघृतान्वितं ॥२९॥ क्षीरभुक् सा पिबुंयोगा
द्गर्भं धत्ते न संशयः ॥३०॥ इति वंध्यत्वप्रतीकारः ॥ अथ गर्भरक्षा ॥ एरंडगोक्षुरकुशकाशमूलैः सृतं पि
बेत् ॥ दुग्धं सितायुतं गर्भशूलं तेनोपशाम्यति ॥३१॥ शृंगाटकैरंडपद्मोत्पलैः शतपत्रीयुतैः ॥ कसेरुजो
वं मेपेऽश्वसिद्धं शर्करयायुतं ॥३२॥ दुग्धं पीतं जयेद्गर्भशूलानि विविधान्यपि ॥ गर्भिण्याश्चलितं गर्भं
स्थिरं प्रकुरुते नरं ॥३३॥ पद्मोत्पलकसेरूणि मुद्गपर्णी सयष्टिका ॥ शृंगाटकं सितान्वितं चूर्णं क्षीरसमन्वि

९१

351

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

तं॥ नरः क्षीरान्नभुक्तिश्च गर्भश्रावव्यथां जयेत्॥ पाठा मयूरकुटजसिंहास्यः स्वरसा पृथक्॥ ३५॥ ना
भिबस्तिभगालेपाः स्त्रीणां सूतिकराः क्षणात्॥ वासकस्य स्थिरा या वा मूलं पिष्ट्वा विलेपितं॥ बस्तौ नाभौ
भगे चैव मूढगर्भापकर्षणं॥ मातुलुंगशिफा यष्टिर्मधूकं घृतसंयुतं॥ ३७॥ पीत्वा प्रसूतिसमये सुखं
नारी प्रसूयते॥ पंचमूलसृतं तैलं समलोहसमन्वितं॥ ३८॥ पीत्वा नारी जयेत्सर्वान् रोगान् सूतिसं
भवान्॥ पिप्पली पिप्पलीमूलं विडं सौवर्चलं तथा॥ ३९॥ त्रिशेद्धजीरके द्वे च शुंठी चैव यवानिका
एभिरेकीकृतैः पिष्टैः राजनालं पचेद्भिषक्॥ ४०॥ वज्रकांजिकनामेदं आमवातविनाशनं॥ रुच्यं
कफहरं वह्निदीपनं बलवर्द्धनं॥ ४१॥ मक्कल्लशूलशमनं परं शीराभिवर्द्धनं॥ सेवनीयं प्रसूताभि
र्नारीभिर्दिरर्द्दमौषधं॥ ४२॥ इति वज्रकांजिकं॥ शोथं स्तनोद्भवं दृष्ट्वा कुर्याद् दुग्धिवद्विधिं॥ आ
मे दाहयुतैश्चैव पक्वे वापि स्तनामये॥ ४३॥ स्तनपीडां हरेत्क्षिप्रं विशाला मूललेपनं॥ विषशोव्यव

352

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सत्त

ल०त्स० णाहरं यदन्य च्चापि भेषजं ॥ ५५ ॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे प्रदररोगयोनिदोषसूतिकास्तनदोष
१७६ चिकित्साकथनं नाम पंचाशत्तमोऽध्यासः ॥ ५७ ॥ अथ बालचिकित्सा ॥ बालस्त्रिविधो ज्ञेयः क्षीराश्री
भयभोजनः ॥ दुग्धाभ्यां स्याद्दुजातोभ्यामदुग्धाभ्यामरोगता ॥ १ ॥ बालस्य रुजा यतो रोगो धात्र्या दुग्धान्ने
भोजनैः ॥ हिताशनैर्भवेत्तस्य बालस्य समधातुता ॥ २ ॥ इति निदानं ॥ अथ चिकित्सा ॥ कुष्ठं ब्राह्मी व
चा पथ्याकतकं सान्यमाक्षिकं ॥ लेहोयं बालकस्याक्षौ वर्णायुःकान्तिवर्द्धनं ॥ ३ ॥ क्षीरमांजं च गव्यं च स्त
न्याभावे प्रदापयेत् ॥ तद्गुणं तच्च कथितं सात्म्येजाते शनैः शनैः ॥ ४ ॥ मस्तिष्के नाग्निना तप्तक्षीरसिक्ते
न सोष्मणा ॥ स्वेदयेद्बुस्थितां नाभिं शोथस्तेनोपशाम्यति ॥ ५ ॥ यष्टिप्रियंगुरजनीरोध्रैः पक्वेन
शस्यते ॥ अभ्यंगो नाभिपाकस्य तैरेवाप्यवचूर्णितं ॥ ६ ॥ पश्चान्निशाद्वयं सिंही बीजानि कटुजस्य
च ॥ क्वाथो ज्वरः श्वासवमिकासार्तीसारजित् शिशोः ॥ ७ ॥ लोध्रं इन्द्रयवधात्र्याक्रधातुकी बिल्ववा
१

353

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लेह्यैः ॥ लेहः समाक्षिको वान्तिज्वरातीसारजित् शिशोः ॥ ८ ॥ पृश्निपर्णीशृता क्वाथ पथ्याकंटारिका
दृपं ॥ हरिद्रा दारु सरला लेहः क्षौद्रयुतान्वितः ॥ १० ॥ एषोऽग्निदीपनो ग्राही ज्वरे वातार्तिनाशनः ॥ गृह
धूमकामलां पांडुरोगं चाशु व्यपोहति ॥ शृंगी प्रतिविषा कृष्णा चूर्णं लीढं समाक्षिकं ॥ शिशूनां नाशये
त्कासं ज्वरं च वमनं तथा ॥ ११ ॥ धातकी बिल्व वासाग्निः सलोध्रं गजपिप्पली ॥ लेहः क्वाथोऽथवा दे
योऽतीसारे क्षौद्रसंयुतः ॥ १२ ॥ शुंठी द्रुमयव मुस्तानां बालकातिविषा सतं ॥ पाययेत् बालकं प्रातः सर्वा
तीसारशांतये ॥ १३ ॥ त्रिफलायष्टी सिताकल्कैः स्तैलक्षौद्रसमन्वितैः ॥ रूध्या ह्लास्यले होयं रक्तस्रावं प्र
बाहिकां ॥ १४ ॥ पथ्याकुष्ठवचाकुष्ठं सक्षौद्रं न्यस्तसंयुतं ॥ पीत्वा शिशुं जयेदाशु दुःसहं तालुकंटकं ॥ १५
रात्रिकेंद्रयवाकुष्ठं गृहधूमो निशा शिशोः ॥ लेपस्तक्रेण जयति पामा सिध्म विचर्चिका ॥ १६ ॥ वासा
कणाभयाद्राक्षा चूर्णं कुर्यात्समाक्षिकं ॥ लेहः श्वासं च कासं च तमकं च जयेच्छिशोः ॥ १७ ॥ यवासाग्नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल॰ स॰ विषाश्रृंगी मागधी पौष्कराह्वयं ॥ चूर्णं क्षौद्रयुतं बाले पंचकासान्व्यपोहति ॥१८॥ पंचमूली का
१७७ थ सिद्धं सघृतं सगुडं पयः ॥ सशृंगवेरं शिशिरं पीतं हिक्कां जयेच्छिशोः ॥१९॥ दोषास्त एव रोगाश्च ते
तूष्णा धातवश्च ते ॥ अतस्तदेव भेषज्यं शिशोर्मात्राल्पकं ह्यपते ॥२०॥ सर्पनिर्मोकलशुनाहिंगुपत्रवचस
र्षपाः ॥ बिडालविट् वचा मूर्वा छागरोम भसृंगिका ॥२१॥ क्षौद्रं चेति शिशोर्धूपो ज्वरग्रहविनाशनः ॥ क्षीरे
दशगुणे सर्पिर्वाजिगंधासुकल्किता ॥२२॥ साधितं तु कुमाराणां नित्यं पाने प्रशस्यते ॥ अश्वगंधा
घृतं ॥ वचा ब्राह्मी स्थिरा कुष्ठकणा सैंधव सर्षपैः ॥ सर्पिः सिद्धं कुमाराणां नित्यं पाने प्रशस्यते
स्मृतिमेधाकरं भूतपिशाचादिविनाशनं ॥ अष्टमंगलकं नाम बालकानां सदाहितं ॥ अष्टमंगलघृ
तं ॥ इति श्रीलक्ष्मणोत्सवे ग्रंथे बालचिकित्साकथनं नाम अष्टपंचाशत्तमोऽध्यासः ॥ अथ विषप्रती
कारः ॥ स्थावरं जंगमं चेष द्विविधं कथ्यते विषं ॥ मूलाद्यं स्थावरं प्रोक्तं सर्पजाद्यं तु जंगमं ॥१॥ रो

१७

355

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मांचतोदनं क्लेददाहशोथमपाचनं ॥ अतीसारं तथा निद्रां जंगमं कुरुते विषं ॥ २ ॥ दंतहर्षं ज्वरं हि
क्काछर्दिं फेनं गलग्रहं ॥ मूर्छा श्वासारुचिश्चैव स्थावरं कुरुते विषं ॥ ३ ॥ इति निदानं ॥ अथ चिकि
त्सा ॥ समाहं श्वेतमरिचं शिरीषकुसुमद्रवैः ॥ भावितं सर्पदष्टस्य नस्यपानांजनेहितं ॥ ४ ॥ ऊर्ध्वं
दष्टप्रदेशस्य बंधनं चतुरंगुलं ॥ कुर्यात्सोमादिभिर्गाढं मंत्रैर्वा मंत्रतत्त्ववित् ॥ ५ ॥ सेतुनांबु यथा
रुद्धं बंधनेन विषं तथा ॥ रुद्धं सर्पति नो वेगात् शिरामार्गावरोधनात् ॥ ६ ॥ सर्पदष्टो नरः सर्वं गृहो
त्थायद्विवर्जयेत् ॥ पश्चात्पिबेत् घृतं गव्यं न विषेणाभिभूयते ॥ ७ ॥ गरुडोऽहमिति ध्यायन् नीलकं
ठोस्मि वेत्ति च ॥ निर्भयत्वात्द्रूपं न स्यात्तद्दष्टस्यापि विषात् क्वचित् ॥ ८ ॥ नक्तमालफलं बिल्वजटा
व्योषं निशाद्वयं ॥ पुष्पवासोरभंमूत्रमाजेवा बोधनेंजनं ॥ ९ ॥ भाविताागस्तिपत्रेण वंध्याकर्को
टिकाजटा ॥ कांजिकेन समुत्पिष्टा विषं न स्यात् विनाशयेत् ॥ १० ॥ तब तप्तष्टीविशाले द्वे द्वे हरि

ल०स० द्रे कटु त्रिकं ॥ मंजिष्ठा वक्रलवणान्येतान्येकत्र चूर्णयेत् ॥ शृंगे चूर्णं निदध्याच्च सर्वं तत्तैसो द्
१७८ समुद्रं ॥ पानाभ्यंगांजनालेपात् तेन कुर्याद्विषार्दितः ॥ ९२ ॥ योगो महागदो नाम विषवेगं जये
त्क्षणात् ॥ इति महागदयोगः ॥ मंजिष्ठा रजनी देशम धूम श्रलवणोत्तमः ॥ ९३ ॥ विषं जयेत्प्रलेपो यं क
पिकाया श्रवपानतः ॥ कुठेरकस्य बीजानि भानोदुग्धेन भावयेत् ॥ तल्लेपेन शमं याति विषं रश्चिकसंभ
वं ॥ हरिद्राक्षौद्रसिंधूत्थसंयुक्तं घृतमुत्तमं ॥ ९५ ॥ शस्यते दिग्धविद्धेषु पानं मूत्रविषेषु च ॥ गोजिह्वा सोम
वल्कश्च कर्णी दशापदी निशा ॥ ९६ ॥ गैरिकं चेति लेपायं नरवदंत विषापहः ॥ वचापाठा विडंगानि पिप्प
ली हिंगु सैंधवं ॥ ९७ ॥ औषधं प्रतिविषे सेष काश्यपेन विनिर्मितं ॥ इत्यंगा स्योगहे पीतः सर्वकीट विषं
जयेत् ॥ ९८ ॥ भयं च मैथुनं क्रोधं विरुद्धाध्यशनं तथा ॥ दिवानिद्रां च सततं वर्जयेद्विषपीडितः ॥ ९९ ॥
इति श्रीलक्ष्मणोत्सवे ग्रंथे विषचिकित्साकथनं नाम षष्टितमोध्यायः ॥ ६० ॥ अथ वाजीकरण

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधिः ॥ वाजी वाति बलो येन यात्यप्रतिहतां गतिः ॥ तस्य वाजीकरं विद्धि देहस्योर्जीकरं परं ॥१॥ रसर
त्नसमुच्चयात् ॥ चिरं सोमानसं यस्य नैस्तैभावैर्विहन्यते ॥ अहृष्येऽपि न तस्य क्लैब्यं नो तिष्ठते ध्वजः ॥२॥
अत्यम्ललवणोष्णाद्यैः सौम्यधातुक्षये सति ॥ दोषैर्विहन्यते शुक्रं क्लैब्यं पुंसश्च जायते ॥३॥ नि संसुर
तशीलो यो न च वाजिक्रियारतः ॥ शुक्रक्षयेण तस्यापि ध्वजभङ्गस्तु जायते ॥४॥ स्वाभाविकमसाध्यं १
स्यात् मर्म्मच्छेदाभिघातजं ॥ साध्यं क्लैब्यं तु यत्तस्य कुर्याद्वाजीकरं विधिं ॥५॥ विदारीकन्दजं चूर्णं स्वर
सेनैव भावितं ॥ सितासौद्रघृतैर्युक्तैः लीढ्वा क्षीरं ततः पिबेत् ॥६॥ नरः वृद्धोऽपि पुरुषो नारीषु तरुणा
यते ॥ श्वदंष्ट्रा तिविषा नागबलावस्फरकोवरी ॥७॥ मर्कटीवापि बेच्चूर्णं सक्षीरं निशि पुष्टये ॥ शता
वरीचूर्णप्रस्थं प्रस्थं गोक्षुरकस्य च ॥८॥ वाराह्या विंशतिपलं गडूच्याः पञ्चविंशतिः ॥ भल्लातकानां
द्वात्रिंशत्पलान्यत्र समाहरेत् ॥९॥ पलानि दश चित्रस्य निस्तुषाश्च तिलास्ततः ॥ प्रस्थमात्रं क्षिपेद्धो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न॰सि॰ बंपलाष्टकमिदं क्षिपेत् ॥ पलानि सप्तति श्चात्र प्रदातव्या सितोपला ॥ माक्षिकं शार्करार्द्धेन मधुनार्द्धे
१७९ नैव घृतं ॥ ११ ॥ शतावरीसमं देयं विदारीकंदजं रजः ॥ तच्चूर्णं गोघृते स्निग्धे भांडे सर्वं विधारयेत् ॥ १२
तस्माद्वार्द्धमितं चूर्णं भक्षयेत्प्रतिवासरं ॥ अन्नपानविहारेषु नीयमा नेह विद्यते ॥ १३ ॥ सर्वान्रोगां
श्च शमयेन्मासमात्रेण योगतः ॥ वातोद्भवांश्च पित्तोत्थान् श्लेष्मोद्भूतान् त्रिदोषजान् ॥ १४ ॥ रोगा
न्पांड्वश्मरीकुष्ठकासपीनसकामला: ॥ मूत्रकृच्छ्रान्प्रमेहांश्च प्लीहोदर भगंदरान् ॥ १५ ॥ ग्रहण्य
र्शोविकारांश्च नेत्रश्रोत्राहिकामयान् ॥ वातरक्तादिकान्सर्वान् रोगानाशु विनाशयेत् ॥ १६ ॥ स
तताभ्यासतो मर्त्यो वलीपलितवर्जितः ॥ रूपेण कामसदृशो बुद्धींद्रियबलान्वित ॥ १७ ॥ जायते से
वनादस्य जरामरणवर्जितः ॥ नारसिंहाह्वयं चूर्णं वाजीकरणमुत्तमम् ॥ १८ ॥ रसायनं च परमं पीयू
षवद्दिंदस्मृतं ॥ सकांचनाभो मत्तगराजवेगतः तुरंगमादश्यति जातवेगतः ॥ स्त्रीणां शतं गच्छति

१७

359

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

मातिरिक्तः सुहृष्टकश्चाटकको यथातथा ॥१९॥ इति नारसिंहचूर्णं ॥ अश्वगंधा दशपला तन्मा
त्रो वृद्धदारकः ॥ चूर्णाद्विसो भमं विहान् घृतभांडे निधारयेत् ॥२०॥ कर्षैकं पयसा पीत्वा नारिभि
र्नैव तृप्यति ॥ भवेद्दगत्वा प्रमदा बली पलितवर्जितः ॥२१॥ अश्वगंधाद्यं चूर्णं ॥ श्वदंष्ट्रा वानरी बी
जगंडूची सत्वशर्करा ॥ शाल्मली मुशली कंदामलका नि विचूर्णयेत् ॥२२॥ घृतेना लोड्य तच्चू
र्णं पिबेत् क्षीरसमन्वितं ॥ षंढोपि स्त्रीशतं गच्छेत् प्रभावान्नात्र संशयः ॥२३॥ चेतोहृत्कुषकरं य
स्या तवं हर्णं मधुरं गुरु ॥ स्निग्धं च जीवनं सर्वं तद्वाजीकरणोत्तमं ॥२४॥ सुरूपा योवनोपेता नारी
ललितविभ्रमा ॥ सुरूपा यौवनोपेता मदघूर्णितविह्वला ॥२५॥ सुवेषा स नुरागा या सा वाजीक
रणं परं ॥ स्फुरद्दीपे सुरूपाढ्ये गृहे शय्या समुज्वला ॥२६॥ पुष्पचंदनतांबूलमित्याद्यं चैवकामकृत
तां बूलं मधु कुसुमस्त्रजो विचित्राः कांतारे वरतनवा विलासवस्त्रः ॥ गीतानि श्रवणहरा णि भि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

360

ल० त्स० शमन्नं स्त्रीणामपि जनयंति पंचबाणं ॥ २७ ॥ इति वाजीकरणं ॥ इति श्री लक्ष्मणोत्सवे ग्रंथे षोडश चि-
१८० कित्साकथनं नाम षष्टितमोऽध्यायः ॥ ६० ॥ अथ रसायनविधिः ॥ यद्भेषजं जराव्याधिहरमायुर्विवर्द्ध-
नं ॥ तद्रसायनमित्युक्तं सेव्यं पूर्वं तु वार्द्धकात् ॥ १ ॥ रसायनं निषेवेत सम्यक्शुद्धतनुर्नरः ॥ शुद्धमेर
वांबरं सम्यगादद्यात् रोगमुत्तमं ॥ २ ॥ लेपयेत्त्रिफलाकल्कैर्नवमायसभाजनं ॥ अहोरात्रोषितं लेपं
तत्क्षौद्रोदकसंयुतं ॥ ३ ॥ पिबेत् जीर्णे तु तस्मिन् स्निग्धं भोजनमाचरेत् ॥ जरारोगविनिर्मुक्तो
जीवेद्वर्षशतं नरः ॥ ४ ॥ भृंगराजरसः पीतो मासमेकं निरंतरं ॥ क्षीराशिनः प्रकुरुते शतवर्षाणि
जीवति ॥ ५ ॥ भृंगराजस्य पत्राणि खादेत्तक्ष्या तिलैः सह ॥ क्षीराशी पलितव्याधिहीनो जीवेच्छ-
तं समाः ॥ ६ ॥ क्षीरेणाज्येन वा पीता वाजिगंधा निरंतरं ॥ क्षीणबालकवृद्धानां कुर्यात् पुष्टिं च जीवि-
तं ॥ ७ ॥ शुंठीचूर्णं घृतं क्षौद्रं गुडैः संमर्द्य भाजने ॥ स्निग्धे निधाय तत्सात्रे धान्यराशौ निधापयेत्
॥ ८ ॥ १८

मासत्रये व्यतीते तु उद्धृत्य शुभवासरे ॥ खादेच्छुद्धतनुः शुंठीं बिडालपदमात्रया ॥ ९ ॥ दिनसप्तप्र
योगेण सर्वरोगैः प्रमुच्यते ॥ षण्मासाभ्यासतो मर्त्यो जीवेद्वर्षशतद्वयं ॥ १० ॥ ग्रहस्यान्तिसमो बुध्याव
लीपलितवर्जितः ॥ शतावरीरसे श्चूर्णं वन्हदारकमूलकं ॥ ११ ॥ भावितं सप्तदिवसान्नक्तमात्रं घृतान्वि
तं ॥ भक्षितं मासमात्रेण मेधास्मृतिकरं परं ॥ १२ ॥ हस्तिकर्णरजः प्रातर्भक्षितः सर्पिषा सह ॥ आयु
र्मेधांबलं वीर्यं कुर्यात्पलितनाशनं ॥ १३ ॥ सौभाग्यपुष्टिबलभुक्तिविवर्द्धनानि किं सन्ति नो भुवि वरू
नि रसायनानि ॥ कंदर्पवर्द्धिनि परं तु सिताज्ययुक्ता दुग्धाद्रतेन मम कोपमतः प्रयोगः ॥ १४ ॥ मंडू
कपर्ण्याः स्वरसः क्षीरेण सह योजितः ॥ मत्स्यमधुकचूर्णं वा परमेतद्रसायनं ॥ १५ ॥ गडूच्याः स्वर
सः शंखपुष्पी वा क्षीरसंयुतं ॥ आयुर्बलाग्निचूर्णानां वर्द्धिकुर्याद्रसायनं ॥ १६ ॥ वणपत्राभपत्रा
प्यारहं सारव्या महौषधीः ॥ आतन्द्रशूरदंतीनसूक्ष्मांतोविंदुवर्षिणी ॥ १७ ॥ पीतारक्तासिताह्र

362

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स०६ ह्मा न्नेयासेवं चतुर्विधा ॥ तांनीत्वा मूलपत्राद्यां शुक्लपक्षे शुभे दिने ॥ १८ ॥ छायाशुष्कांतु तां कृत्वा सू
२८१ क्ष्मचूर्णं तु कारयेत् ॥ विरेकं वमनं कृत्वा त्रिशुगलपदमात्रया ॥ १९ ॥ भक्षयेत्प्रत्यहं चूर्णं घृतक्षौद्रसमन्वि
तं ॥ जीर्णे तस्मिंस्तु भुंजीत क्षीरान्नं संयमी नरः ॥ २० ॥ एकमासप्रयोगेण सर्वरोगविवर्जितः ॥ दृष्टका
मोऽति तेजस्वी वलीपलितवर्जितः ॥ २१ ॥ चिरमायुरवाप्नोति बलवीर्यसमन्वितः ॥ इतिरुदंती प्रयोगः
उषःकाले पिबेत्क्षीरमष्टप्रसृतिमात्रया ॥ २२ ॥ सर्वरोगान्जयेन्मर्त्यश्चिरमायुरवाप्नुयात् ॥ पारदा
दिकृते श्चान्यै रसैर्नित्यं निषेविते ॥ २३ ॥ जरारोगविनिर्मुक्तो दीर्घमायुरवाप्नुयात् ॥ इति श्रीलक्ष्मणो
त्सवे ग्रंथे रसायनं नामैकषष्टितमोऽध्यायः ॥ ६१ ॥ अथ पंचकर्मविधिः ॥ तत्रादौ स्नेहपानमाह ॥ स्ने
हपक्वमपक्वं वा पिबेद्धीमान्यथोचितं ॥ तिलतैलं स्थावरेषु जंगमेषु घृतं वरं ॥ १ ॥ पिबेत्त्र्यहं चतुरहं
पंचाहं षडहानि च ॥ सप्तरात्रात्परं स्नेहं सात्म्यीभवति सेवितं ॥ २ ॥ देशकालाग्निवयसां बलं दृष्ट्वा २८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रयोजयेत् ॥ हीनां च मध्यमां श्रेष्ठां मात्रां स्नेहस्य बुद्धिमान् ॥ ३ ॥ अहोरात्रेण महती जायते ह्नि तु मध्य
मा ॥ जीर्यते स्वल्पा ह्निनार्द्धेन सा मात्रा स्यात् सुखावहा ॥ ४ ॥ केवलं पैत्तिके सर्पिर्वातिके लवणान्वितं ॥ पेयं ब
हुकफे वापि व्योषक्षारसमन्वितं ॥ ५ ॥ रूक्षक्षतविषार्त्तानां वातपित्तविकारिणां ॥ हीनमेधास्मृतीनां
च सर्पिः पानं प्रशस्यते ॥ ६ ॥ कृमिकोष्ठानिलविषप्रवृद्धकफमेदसः ॥ पिबेयुस्तैलं सात्मीये स्तैलं दा
र्ढ्यार्थिनश्च ये ॥ ७ ॥ इति स्नेहपानविधिः ॥ अथ स्वेदविधिः ॥ स्वेदाश्चतुर्विधाः प्रोक्ताः तापोष्मा स्वे
द संज्ञकौ ॥ उपनाह द्रवस्वेदौ सर्वे वातार्त्तिनाशनाः ॥ ८ ॥ स्वेदो तापो ष्मजो श्राय्यः श्लेष्मघ्नौ समुदीरि
तौ ॥ उपनाहस्तु वातघ्नः पित्तसंसृष्टो द्रवो हितः ॥ ९ ॥ स्वेदाद्धानुस्थिता दोषाः स्नेहक्लिन्नस्य देहिनः
द्रवत्वं प्राप्य कोष्ठं तु गत्वा यांति विरेकतां ॥ १० ॥ स्विद्यमानशरीरस्य हृदयं शीतलैः स्पृशेत् ॥ स्नेहाभ्य
क्तशरीरस्य शीतैराच्छाद्य चक्षुषी ॥ ११ ॥ अजीर्णी दुर्बलः स्कंदी क्षतः क्षीणः पिपासितः ॥ अती

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स० सारीरक्तपित्ती न स्वेद्यो गर्भिणी तथा ॥१२॥ अतिस्वेदात्संधिपीडा दाहस्तृष्णा क्लमो भ्रमः ॥ पित्तास्र
८२ कृ पिटिकाकोपस्तत्र शीतैरुपाचरेत् ॥१३॥ इति स्वेदविधिः ॥ अथ वमनविधिः ॥ शरत्काले वसंते
च वर्षासु च विशेषतः ॥ वमनं च विरेकं च विदधीत प्रयत्नतः ॥१४॥ बलवत्कफव्याप्तहृल्लासादि
निपीडितं ॥ तथा वमनसात्म्यं च धीरसत्त्वं च वामयेत् ॥१५॥ विषदोषस्तन्यरोगे मंदेग्नौ श्लीपदेर्बुदे ॥
हृद्रोगे कुष्ठवीसर्पे मेहाजीर्णभ्रमेषु च ॥१६॥ वमने चापि वेगास्युरष्टौ पित्तांत उत्तमः ॥ षड्गामध्य
मावेगाश्चत्वारस्त्ववरा मताः ॥१७॥ कफकटुकतीक्ष्णोष्णैः पित्तं स्वादुहिमैर्जयेत् ॥ सस्वादुलवणाम्ला
ष्णैः संसृष्टं वायुना कफं ॥१८॥ कृष्णामदनसिंधूत्थसंतं कोष्णं कफे पिबेत् ॥ पटोलवासानिंबैश्च
पित्ते शीतं सतं पिबेत् ॥१९॥ सश्लेष्मवातपीडायां सक्षीरं मदनं पिबेत् ॥ अजीर्णे सैंधवोपेतं कोष्णं
पीत्वा जलं वमेत् ॥२०॥ वमनं पाययित्वा तु जानुमात्रासने स्थितं ॥ कंठमेरंडनालेन स्पर्शांतं वाम १८२

365

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येन्तु भिषक् ॥२१॥ अतिवांतो भवेत्तृष्णा हिक्कोद्गारो विसंज्ञता ॥ जिह्वानिःसरणं चाक्ष्णोः आवर्त्तिर्ह
नुसंहतिः ॥२२॥ नवामनीयस्तिमिरी नगुल्मी वा स्तथोदरी ॥ कृशोतिवृद्धो भीरुश्च सस्थूलः क्षतपीडि
तः ॥२३॥ इति वमनविधिः ॥ अथ विरेकविधिः ॥ स्निग्धः स्विन्नस्य वांतस्य दद्यात्सम्यग्विरेचनं ॥ अ
वांतस्य त्वधःस्रस्तो ग्रहणीं छादयेत्कफः ॥२४॥ मंदाग्नी गौरवं कुर्यात् जनयेद्वा प्रवाहिकां ॥ अथ वापा
चनैरामं बलासं च विपाचयेत् ॥२५॥ स्निग्धस्य स्वेदनं कार्यं स्वेदैः स्विन्नस्य रेचनं ॥ पित्ते विरेचनं दद्या
दामे शूलगदे तथा ॥२६॥ उदरे च तथाध्माने कोष्ठशुद्धौ विशेषतः ॥ शरदृतौ वसंते च देहशुद्धौ विरेच
येत् ॥२७॥ अन्यदा सात्यिके कार्ये शोधनं शीलयेद्बुधः ॥ जीर्णज्वरी गदव्याप्तो वातरक्ती भगंदरी ।
२८॥ अर्शःपांडूदरग्रंथी हृद्रोगारुचिपीडितः ॥ योनिरोगप्रमेहार्तो गुल्मप्लीहव्रणार्दितः ॥२९॥
विद्रधी छर्दिविस्फोटविसूचीकुष्ठसंयुतः ॥ प्लीहशोफाग्निरोगार्तो क्रिमिक्षारानलार्दिताः ॥३०

366

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शा॰सं॰ शूलवान् मूत्रघातार्त्तो विरेकार्हो भवेन्नरः ॥ महीमात्रामृदौ कोष्ठे मध्यकोष्ठे च मध्यमा ॥ २१ ॥ क्रू
१८२ रातीक्ष्णा मताहृद्यैर्मृदुमध्यमतीक्ष्णकैः ॥ मृदुर्द्राक्षापयश्चंचुतैलैरपि विरच्यते ॥ २२ ॥ मध्यमस्तृत
वतिक्ता राजवृक्षैर्विरच्यते ॥ क्रूरास्नुक्पयसा हेमक्षीरीदंतीबलादिभिः ॥ २३ ॥ मात्रोत्तमा विरेक
स्य त्रिंशद्वेगैः कफांतका ॥ वेगविंशतिभिर्मध्या हीनोक्ता दशवेगकैः ॥ २४ ॥ बालवृद्धावतिस्निग्धः
क्षतक्षीणो भयान्वितः ॥ श्रांतस्तृषार्त्तः स्थूलश्च गर्भिणी च नवज्वरी ॥ २५ ॥ नवप्रसूता नारी च
मंदाग्निश्च मदात्ययी ॥ शल्यार्दितश्च रूक्षश्च न विरेच्या विजानता ॥ २६ ॥ इति विरेकविधिः ॥ अथ
बस्तिकर्मविधिः ॥ बस्तिर्द्विधानुवासाख्यो निरूहश्च ततः परं ॥ यः स्नेहैर्दीयते स स्यादनुवास
नवामकः ॥ २७ ॥ कषायक्षीरतैलैर्यो निरूहः स निगद्यते ॥ अनुवास्यस्तु रूक्षः स्यात्तीक्ष्णाग्निः
केवलानिली ॥ २८ ॥ नानुवास्यस्तु कुष्ठी स्यान्मेही स्थूलस्तथोदरी ॥ नास्थाप्या नानुवास्याश्च जीर्ण

१

367

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्मादहतवायुतः॥ शोकमूर्छार्दिविभ्रमश्वासकासक्षयातुरः॥ बस्तिनेत्रं च बस्तेश्चानुवासननिरू
हयोः॥ ५०॥ लक्षणानि प्रकाराश्च नोक्तेनारदादिह॥ इति बस्तिकर्माधिकाराः॥ अथ नस्यविधिः॥ कफ
पित्तानलध्वंसि पूर्वमध्ये परान्हिके॥ ५१॥ दिनस्य गद्यते नस्यं रात्रावप्युत्कटे गदे॥ न स्यं स्नाने भोजनांते
तुर्दिने चापतर्पणे॥ ५२॥ तथा नवप्रतिश्यायी गर्भिणी गरदूषितः॥ अजीर्णे दत्तबस्तिश्च पीतस्ने
होदकासवः॥ ५३॥ क्षुद्धः शोकाभिभूतश्च तृष्णार्तो वृद्धबालकौ॥ वेगावरोधी स्नातश्च स्नातुका
मश्च वर्जयेत्॥ ५४॥ अष्टवर्षस्य बालस्य नस्यकर्म समाचरेत्॥ अशीतिवर्षादूर्ध्वं च नावनं नैव दी
यते॥ ५५॥ नासिकारंध्रयोरष्टौ षट् च तारश्च बिंदवः॥ प्रत्येकं रेचने योज्या मुख्यमध्यांतमात्रया
५६॥ नस्यकर्मणि दातव्यं शाणैकं तीक्ष्णमौषधं॥ हिंगुः स्याद्यवमात्रं तु माषैकं सैंधवं मतं॥ ५७
क्षीरं चैवाष्टशाणं स्यात्पानीयं च त्रिकार्षिकं॥ कर्षैकं मधुरं द्रव्यं नस्यकर्मणि योजयेत्॥ ५८॥

368

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०स० वमनं रेचनं नस्यं निरूहश्चानुवासनं ॥ एतानि पंचकर्माणि कथितानि मुनीश्वरैः ॥ ४९ ॥ इति श्री
८५ लक्ष्मणोत्सवे ग्रंथे पंचकर्मकथनं नाम द्विषष्टितमोऽध्यायः ॥ ६२ ॥ अथ दीपनपाचनादिलक्षणानि
पचेन्नामं वन्हिकृद्दीपनं तद्यथा मिशिः ॥ पचत्यामं तथा कुर्याद्दनलं तद्धि पाचनं ॥ १ ॥ नागकेसरवा
द्विंयात् चित्रोदीपनपाचनः ॥ नशोधयति नद्वेष्टि समान्दोषान् तथोद्धतान् ॥ २ ॥ शमीकरोति य
त्स्वंदुं वमनं तद्यथामृता ॥ कृत्वापाकं मलानां यत् भित्वाबद्धमधो नयेत् ॥ ३ ॥ तच्चानुलोमनं ज्ञेयं
यथोक्ता च हरीतकी ॥ पक्तव्यं यदपक्वं वा श्लिष्टं कोष्ठमलादिकं ॥ ४ ॥ नयत्यधः स्रंसनं स्यात् यथा
स्यात् कृतमालकः ॥ मलादिकमबद्धं यत् बद्धं वा पिंडितं मलैः ॥ ५ ॥ भित्वाधः पातयेत् तस्यात् भे
दनं कटुकी यथा ॥ विपक्वं यदपक्वं वा मलादि द्रवतां नयेत् ॥ ६ ॥ रेचनं स्यापि तज्ज्ञेयं रेचनं तत्तोय
था ॥ स्थानाद्दुरिर्नयेदूर्ध्वमधो वा मलसंचयं ॥ ७ ॥ देहसंशोधनं तत्स्यात् देवदालीफलं यथा

१८५

369

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्लिष्टान् कफादिकान् दोषान् उन्मूलयति यद्बलात् ॥८॥ छेदनं तद्यथा क्षारा मरिचानि शिलाजतु ॥ धा
तून्मलान्वा देहस्य विशोष्योल्लेखयेच्च यत् ॥९॥ लेखनं तद्यथा क्षौद्रं नीरमुष्णं वचा यवा ॥ दीपनं
पाचनं यत्स्यादुष्णत्वाद्द्रवशोषकं ॥१०॥ ग्राहि तच्च यथा शुंठी जीरकं गजपिप्पली ॥ रौक्ष्यात्सौक्ष्म
कषायत्वात् लघुपाकाच्च जायते ॥११॥ वातकृत्स्तंभनं तत्स्यात् यथा वत्सकटुल्लकं ॥ यस्मात् द्रव्या
द्भवेत् स्त्रीषु हर्षो वाजिकरं च यत् ॥१२॥ यथा नागबला धात्री बीजं च कपिकच्छुजं ॥ यस्माच्छुक्रस्य वृ
द्धिः स्यात् शुक्रलं च तदुच्यते ॥१३॥ यथाश्वगंधा मुशली शर्करा च शतावरी ॥ दुग्धं माषाश्च भल्लात
फलमज्जाफलानि च ॥१४॥ प्रवर्तकानि कथ्यंते जनकानि च रेतसः ॥ प्रवर्तनी स्त्री शुक्रस्य रेचनं
बृहतीफलं ॥१५॥ जातीफलं स्तंभकं च शोषकं च हरीतकी ॥ देहस्य सूक्ष्मछिद्रेषु विशेद्यत्सूक्ष्ममु
च्यते ॥१६॥ तद्यथा सैंधवं क्षौद्रं निंबतैलं रुबूद्भवं ॥ पूर्वं व्याप्याखिलं कायं ततः पाकं च गच्छति
॥१७॥

370

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ऊ० त्स० अवाये तद्यथा भंगा फेनं वाहि समुद्भवं ॥ संधिर्वेधा स्तृ शिथिल्यान् यत्करोति विकाशितत् ॥१८॥ वि
१८५ श्लेषो यश्च धातुभ्यो यथा कृमुक कोद्रवाः ॥ बुद्धिं लुंपति यद्द्रव्यं मदकारितदुच्यते ॥१९॥ तमोगुणप्रधा
नं च यथा मद्यसुरादिकं ॥ अवायी च विकाशी स्यात् सूक्ष्मं छेद्यमदावहं ॥२०॥ आशु यज्जीवितहरं योग
वाहि स्मृतं विषं ॥ निजवीर्येण यद्द्रव्यं श्रोतोभ्यो दोषसंचयं ॥२१॥ निरस्यति प्रमाथी स्यात् तद्यथा मरि
चं वचा ॥ पैच्छिल्याद्गौरवाद्द्रव्यं रुध्वा रसवहाः शिराः ॥२२॥ धत्ते यद्गौरवं तत् स्यात् दभिष्यंदी यथा द
धि ॥ एकें १ तु १ वद्रा १ नल ३ वार्द्धि ४ कूश्मिः कलैक भागैः क्रमशो भिमिश्रैः ॥ स्तुता भृंगं धोषणा
क्षौह शारैव त्लाम लाभ स्मविषं सुपिष्टं ॥१॥ मुंड्या हिंका नो सुरदारु भृंगार सेन मर्धं द्विवसत्रयं च ॥ प्र
सूतिताप नल दंतबंधान् आर्द्रां बुनाधोरसुसन्निपातानु ॥२॥ निजानुपाने निजपथ्ययुक्ते सर्वातिसारा
न् गृहणीगदांश्च ॥ प्रतापलंकेश्वरनामधेयो रसः प्रयुक्तोपि निराजपुत्र्याः ॥३॥ इति प्रतापलंकेश्व
१८

371.

CC-0. In Public Domain Kavikulguru Kalidas Sanskrit University Ramtek Collection

रस:॥ इतिश्रीलक्ष्मणोत्सवे ग्रंथे द्रव्यस्वभाववीर्यविवेचनं नाम त्रिषष्टितमोध्यासः॥६३॥ अथ
मिश्रकवर्गनिरूपणं॥ एका हरीतकी योज्या द्वौ च योज्यौ विभीतकौ॥ चत्वार्यामलकान्येव त्रिफलेषा
प्रकीर्तिता॥१॥ पिप्पली मरिचं शुंठी त्रयमेकत्र मिश्रितं॥ त्र्यूषणं त्रिकटु व्योषं कटुत्रिकमथोच्य
ते॥२॥ पिप्पली चव्य विश्वाख्य पिप्पलीमूल चित्रकैः॥ पंचकोलमिति ख्यातं रूक्षं दीपनपाचनं॥
३॥ एलात्वक्पत्रकैस्त्र्यं त्रिसुगंधं त्रिजातकं॥ गजकेसरसंयुक्तं जातुर्जातं तदुच्यते॥४॥ का
कोलीक्षीरकाकोली जीवकर्षभकौ तथा॥ मेदा च महामेदा जीवंती मधुकं तथा॥५॥ मुद्गपर्णी
माषपर्णी जीवनीयो गणस्त्वयं॥ द्वे मेदे द्वे च काकोल्यौ जीवकर्षभकौ तथा॥६॥ द्वे वृद्धी चेति तैः स
र्वैः स्यादष्टवर्ग उदाहृतः॥ मुस्तं चातिविषा शुंठी त्रयमेतत्त्रिकार्षिकं॥ गडूची संयुतं चैतच्चातुर्भद्रक
मिष्यते॥ सिंधुसौवर्चलं चैव बिडं सामुद्रिकं गडं॥ एकद्वित्रिचतुःपंचलवणानि क्रमाद्विदुः॥ ते

372

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कु०स० पृथक्स्थं सैंधवं स्याद्द्वन्द्वे तत्प्रयोजयेत् ॥९॥ सैंधवाद्यं शेषमकांतं स्याल्लवणपंचकं ॥ सर्जिकायाव
१८६ शूकश्चखारयुग्ममुदाहृतं ॥१०॥ सैसैवह्निसमौक्षारौ सर्जिकायावशूकऔ ॥ उदुंबरवटाश्वत्थवे
तसः प्लक्षवल्कलैः ॥११॥ एकत्रमिश्रितैरेतैः पंचवल्कलमुच्यते ॥ शालिपर्णीपृष्टपर्णीकंटकारी
चगोक्षुरः ॥१२॥ बृहतीगोक्षुरतावात्र पंचमूलीकनीयसी ॥ श्रीपर्णीपाटलाबिल्वस्योनाकेचाग्नि
मंथकं ॥१३॥ पंचमूलंबृहद्वेयं दशमूलमुभेस्मृतं ॥ धान्यंमरीचपिप्पल्यो नागराआजिधातुकं ॥
पिप्पलीमूलसंयुक्तं वेषवारं बुधैः स्मृतं ॥ मांसीकुष्ठहरिद्राभिर्मुराचंपकशैलजैः ॥१५॥ मुस्ताय
गंधाकर्चूरैः सर्वौषधिकमुच्यते ॥ कंकोलकंपूगफलंलवंगैश्च समन्वितं ॥१६॥ जातीफलानिकर्
पूरमेतत्सर्वसुगंधकं ॥ कुंकुमंचंदनंतुल्यं परार्द्धमभिधीयते ॥१७॥ त्रिभागकुंकुमंचात्र तदुक्तं
वासपुष्पकं ॥ कर्पूरागारुकस्तूरीचंदनंघुसृणं तथा ॥१८॥ महासुगंधमित्युक्तं कथ्यतेयक्षकर्द १८

373

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मः॥ सर्षपः सर्पिषाभ्यक्ताः शीतोदकपरिप्लुता॥ न सान्द्रा नद्रवा चापि मन्थ इत्यभिधीयते॥
गोक्षीरं गोमयं मूत्रं दधि सर्पिः समन्वितं॥ सममेयोजितमेकत्र पञ्चगव्यं विनिर्दिशेत्॥ निंबस्य पत्र
पुष्पाणि त्वक् मूलं फलमेव च॥ पंचनिंबमिति ख्यातं नामतः शास्त्रकोविदैः॥ इति मिश्रकवर्गः
औदार्यगांभीर्यविवेकधैर्यदाक्षिण्यशीलादिगुणैककेतोः॥ ज्येष्ठः सुतस्तु जो अमरसिंहनाम्नः सर्वा
र्त्तिदुःसारसमुद्रसेतोः॥ कायस्थमाथुरकुलाब्धिजनकल्पवृक्षः श्रीलक्ष्मणः सकललोकहितै
कदक्षः॥ विद्वन्मुखेन कुरुते स्म शुभं निबंधं संततः समीकुरुत तत्र पदस्य बंधं॥ आयुर्वेदपयो
निधेरभिनवं पीयूषसारं सुधीनीत्या यं प्रकटीकरोति सकलं श्रीक्षेमशर्मा भिषक्॥ तस्माद्धिदु
र्दुरीरयन्नपि कविः स्याद्दशर्मा निविंतं सम्यक् लिखितो स्म सन्मतिवरो मासश्च वृद्धामोदरः॥
क्षेमाणिन्वन्तरिः साक्षात् सोभवत्पुरुषोत्तमः॥ त्रिमुमाणनिबंधस्य युक्तायुक्तविवेचकः॥ अ

374

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दं॰सं॰ १८७ भूजगद्धीरितिचारुसभ्यः सधर्मसाहित्यविवेकमध्यः॥ आसद्वितीयोत्र तथाहदासः साधुत्वसत्की
र्तिकृतः प्रकाशः॥ रसूश्रीमशरद्वेकैः ख्यातविक्रमवत्सरे॥ मार्गेशुक्लेहरिद्दिने पूर्णोग्रंथो भवेद्बुधे।
कल्याणभाजः सकलाभवंतालोकाघनोवर्षतु साधुकाले॥ संतोलुभे सासतलंयशांसिप्राप्नोतिध
मोजयमत्रनित्यं॥ यावज्जीरनिधौनीरं दिविभानुनिशाकरौ॥ स्तोयो मेरुकुलंतावतं लक्ष्मणस्य
हनंदनात्॥ इतिश्रीमाथुरकायस्थवंशावतंसामरसिहात्मजलक्ष्मणनामप्रथितेश्रीलक्ष्म
णोत्सवेग्रंथेमिश्रकनामचतुःषष्टितमोध्यासः॥ ६४॥ ग्रंथसमाप्तः॥ वैद्योमाध्यपसष्टश्च
भैषज्यंपरिचारकः॥ एतेपादाश्चिकित्सायाः कर्मसाधनहेतवः॥ ज्ञातशास्त्रकृतिः शूरोल
घुहस्तोकृतोद्यमः॥ सच्छिकर्मीकृतीधर्मीसभिषक्पादउच्यते॥ आढ्यारोगीभिषग्वश्योद्द
क्षिणोज्ञापकोरुजां॥ मः सर्वलक्षणंपथ्यशीलः पादः परोमतः॥ देशकालवयोदेशमात्रा

१८

375

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रकृतिरेतसां॥ सा स्यं यदुष्यजं तस्यात्परः पादश्चिकित्सिते॥ अबद्धाशीजितः स्वप्नो हितधर्मार्थकोविदः॥ बुद्धदर्शी कर्मदक्षः पादः स्यात्सपरिचारकः॥ भोगशांतो नुपो रोगी स्नाता सम्यक् न पूजयेत्॥ भिषजं तस्य नश्यंति पुण्यमायुर्यशो धनं॥५॥ इति लक्ष्मणोत्सवे संपूर्णं॥
संवत् १९१८ शके १७८४ भादुमा मासे आषाढ वद्य ९ गुरुवासरे सखाराम भट जोसि कोपरगावकर आत्म पठनार्थं लिखितं श्री रेणुका देव्यंबार्पणमस्तु॥ मंगलमस्तु। कल्याणमस्तु॥ ॥
कवीद्रावी महाद्रावी मधुकर्पूर पारदः॥ केतकीरज मादाय लेपो मंवीर्यवर्द्धनं॥ अन्यच्च मरहव्याघ्रशूलस्तकं मधुकं सह॥ तेनैव लिंगलेपेन रामा भवति किंकरी॥ अन्यच्च॥ वाजिकः सूतसमभागयुक्तं क्रमेणात् भूषणा नागवंगं श्वेतां बुदमानमारणं॥ कस्तूरिका केतक टंकयुग्मं जातीफलेः नारसेन बध्वा॥ रतीप्रमाणां गुटिका विधेया एका प्रदीयात्तु पुनर्द्वितीया॥ वाजी

376

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल०सू०
१८८

कर्षवीर्यदृढं सकामं सितासमं वा दृढदुग्धपानं ॥ बलप्रदं आयुविवर्द्धनं च बलाबलं चैव विचार्य देयं
रसेंद्रचूडामणियोगमुक्तं रसेंद्रचूडामणिनामधेयं ॥ १ ॥ रसबलिसमभागं हिंगुलं तस्य भागं द्विगुणि
तमहिफेनं धूर्तबीजेन तुल्यं ॥ अखिलविहितचूर्णं कोद्रवशांशं विषं स्यात् हरिजलधिशोषी सूतराजो
रसस्य: ॥ १ ॥ घृतमरिचसमेतं गुंजमात्रं प्रवाहो हरति घुणतिसारं ओरजातीफलेन ॥ त्रिकटुकमधुयु
क्तः सर्वातीतं सशूलं ज्वरमपि हरती त्थं वह्निमांद्यं त्वनिद्रः ॥ २ ॥ इति अगस्तिसूतराजरसः ॥ अथ
मालिनीवसंतरसः ॥ स्वर्णं मुक्ता दरदमरिचं भागवृद्ध्या प्रयोज्यं खर्परमर्धं तदनु नवनीतेन मर्द्यं नि
बांबुना वा ॥ यावत्स्नेहो व्रजति विलयं मर्दयेत्तावदेव गुंजामात्रं मधुकणतया सर्वरोगेव संत: ॥ १ ॥
जीर्णज्वरे धातुगते तिसारे रक्तानिलेरक्तमेव वृद्धे दोषे ॥ घोरस्वप्ये पित्तभवे विकारे बालामये दुग्धयु
तंच पथ्यं ॥ प्रदरं नाशयेदाशु तथा दुर्नामशोणितं ॥ विषमनेत्ररोगंच गजेंद्रमिव केशरी ॥ २ ॥ इति १

377

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मालिनी यसंनरसः॥ त्वगजेलशुनं कुर्यादावृहशापलानिव॥ गवांक्षीरेः पचेत्तं त्र्यं पंचविंशात्
पलैः शुभैः॥ क्षीरे जीर्णे घृतं देयं गवांचपलपंचकं॥ तज्जीर्णे समनुताप्य सिता सार्धपलद्वयं॥ पं
चगोधूमचूर्णस्य क्षिप्त्वा सर्वं विलोडयेत्॥ पचेन्निष्कसहास्वादे हृद्रुमूत्रप्रशांतये॥ गंधवर्णरस
स्पर्शाक्षीरेणाक्षरतोम्यवात्॥ वृत्तिरसोन्पिंडीकरणं रसरत्नाकरात्॥ ॥ बालचिकित्सा॥ कटुकफ
ट्फलं शृंगी पुष्करं पिप्पली घनः॥ समस्तानेकशो वापि पेशयेत् भिषग्वरः॥ एतान् चूर्णान् कृतान्
दद्यात् मध्वार्द्रकरसप्लुतान्॥ कफज्वरारुचिः श्वासछर्दिशूलानिलापहः॥ सोऽयं पुकुन्त्यासंयुक्तः
श्वासकासज्वरापहः॥ प्लीहानं हंति हिक्कांच बालानां तु प्रशस्यते॥ १॥ मारगवधः सातिविषः समुस्ता
तिक्ताकषायेज्वरमाशुहन्यात्॥ सामं सशूलं सवमिं सदाहं साध्मानबंधं सकफः सवातः॥ २॥ छिन्ना
शाठिपुष्करमूलतिक्ता शृंगी सपाठा मनबल्लरीभिः॥ दुरालभातिविश्वकिरातनिक्ता समस्तदोषापह

378

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ल० स० रोगणोयं॥४॥वासाव्याघ्रीकृणालेहःशीतज्वरविनाशनः॥पिप्पलीरेणुकाक्वाथः सहिंगुः समधुः क
१८१ नः॥हिक्कांवक्रांविधांहन्यादिदंधन्वंतरेर्वचं॥१॥सुवर्णगैरिकांपिष्ट्वामधुनासहलेहयेत्॥शीघ्रंसुख
मवाप्नोतितेनहिक्कार्दितःशिशुः॥२॥

K.K.S.U. LIBRARY
RAMTEK
441 106
M-1778
Dist. Nagpur

379.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=01.07.20 13:23
,TRANSFERRED=2020/07/01 at 14:33:19
,PAGES=381
,TYPE=STD
,NAME=S0003241
,Book Name=M-1778-LAXMANOTSAV GRANTH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF
,FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF
,FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF
,FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF
,FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF
,FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF
,FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,FILE250=00000250.TIF
,FILE251=00000251.TIF
,FILE252=00000252.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE253=00000253.TIF
,FILE254=00000254.TIF
,FILE255=00000255.TIF
,FILE256=00000256.TIF
,FILE257=00000257.TIF
,FILE258=00000258.TIF
,FILE259=00000259.TIF
,FILE260=00000260.TIF
,FILE261=00000261.TIF
,FILE262=00000262.TIF
,FILE263=00000263.TIF
,FILE264=00000264.TIF
,FILE265=00000265.TIF
,FILE266=00000266.TIF
,FILE267=00000267.TIF
,FILE268=00000268.TIF
,FILE269=00000269.TIF
,FILE270=00000270.TIF
,FILE271=00000271.TIF
,FILE272=00000272.TIF
,FILE273=00000273.TIF
,FILE274=00000274.TIF
,FILE275=00000275.TIF
,FILE276=00000276.TIF
,FILE277=00000277.TIF
,FILE278=00000278.TIF
,FILE279=00000279.TIF
,FILE280=00000280.TIF
,FILE281=00000281.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE282=00000282.TIF
,FILE283=00000283.TIF
,FILE284=00000284.TIF
,FILE285=00000285.TIF
,FILE286=00000286.TIF
,FILE287=00000287.TIF
,FILE288=00000288.TIF
,FILE289=00000289.TIF
,FILE290=00000290.TIF
,FILE291=00000291.TIF
,FILE292=00000292.TIF
,FILE293=00000293.TIF
,FILE294=00000294.TIF
,FILE295=00000295.TIF
,FILE296=00000296.TIF
,FILE297=00000297.TIF
,FILE298=00000298.TIF
,FILE299=00000299.TIF
,FILE300=00000300.TIF
,FILE301=00000301.TIF
,FILE302=00000302.TIF
,FILE303=00000303.TIF
,FILE304=00000304.TIF
,FILE305=00000305.TIF
,FILE306=00000306.TIF
,FILE307=00000307.TIF
,FILE308=00000308.TIF
,FILE309=00000309.TIF
,FILE310=00000310.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE311=00000311.TIF
,FILE312=00000312.TIF
,FILE313=00000313.TIF
,FILE314=00000314.TIF
,FILE315=00000315.TIF
,FILE316=00000316.TIF
,FILE317=00000317.TIF
,FILE318=00000318.TIF
,FILE319=00000319.TIF
,FILE320=00000320.TIF
,FILE321=00000321.TIF
,FILE322=00000322.TIF
,FILE323=00000323.TIF
,FILE324=00000324.TIF
,FILE325=00000325.TIF
,FILE326=00000326.TIF
,FILE327=00000327.TIF
,FILE328=00000328.TIF
,FILE329=00000329.TIF
,FILE330=00000330.TIF
,FILE331=00000331.TIF
,FILE332=00000332.TIF
,FILE333=00000333.TIF
,FILE334=00000334.TIF
,FILE335=00000335.TIF
,FILE336=00000336.TIF
,FILE337=00000337.TIF
,FILE338=00000338.TIF
,FILE339=00000339.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE340=00000340.TIF
,FILE341=00000341.TIF
,FILE342=00000342.TIF
,FILE343=00000343.TIF
,FILE344=00000344.TIF
,FILE345=00000345.TIF
,FILE346=00000346.TIF
,FILE347=00000347.TIF
,FILE348=00000348.TIF
,FILE349=00000349.TIF
,FILE350=00000350.TIF
,FILE351=00000351.TIF
,FILE352=00000352.TIF
,FILE353=00000353.TIF
,FILE354=00000354.TIF
,FILE355=00000355.TIF
,FILE356=00000356.TIF
,FILE357=00000357.TIF
,FILE358=00000358.TIF
,FILE359=00000359.TIF
,FILE360=00000360.TIF
,FILE361=00000361.TIF
,FILE362=00000362.TIF
,FILE363=00000363.TIF
,FILE364=00000364.TIF
,FILE365=00000365.TIF
,FILE366=00000366.TIF
,FILE367=00000367.TIF
,FILE368=00000368.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE369=00000369.TIF
,FILE370=00000370.TIF
,FILE371=00000371.TIF
,FILE372=00000372.TIF
,FILE373=00000373.TIF
,FILE374=00000374.TIF
,FILE375=00000375.TIF
,FILE376=00000376.TIF
,FILE377=00000377.TIF
,FILE378=00000378.TIF
,FILE379=00000379.TIF
,FILE380=00000380.TIF
,FILE381=00000381.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection